amaj Foundation Chenn

GAIRVANI 1974

omain. Gurukul Kangri Co

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

077925

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

077925

STOCK VERIFICATION
Central
Library
2024-25 G.K.D.U., Hdr.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

दूरध्वनिः – "संस्कृतम्"

COMPILED

वाणीं भजत गैर्वाणीम् !

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूर. (आं. प्र.) भारतम्.

संपुटः १२ | 15th JANUARY 1974 | क्रमांकः १

077925



STOCK VERIFICATION
Central
Library
2024-25 G.K.D.U., Hdr.

प्रमादोच-पुण्याङ्कः

मूल्यम्
०–४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूचिका

१. सभा विलपति १

२. हा ! हन्त ! २

३. श्रद्धांजलिः ३

४. शोकप्रस्तावः ४

५. व्यासानुग्रहं - पुराणानि ६

६. साहित्ये चित्रलेखनम् ८

७. गैर्वाणीगीर्गौरवम् १२

८. गांधीकथा १३

९. गैर्वाणीप्रशंसा १४

१०. मुकुन्दविलासः १५

११. भक्त्या तुष्यति माधवः १७

१२. लभतां शान्तिमात्मनः २१

१३. श्रीयादवगिरिक्षेत्रमाहात्म्यम् २२

१४. अन्तिमवचनम् २४

१५. का राष्ट्रभाषा २७

१६. धिग्दैवसमञ्जसम् २८

१७. प्रमादीच - दक्षिणायनपरीक्षासु उत्तीर्णे २८

१८. श्रीशंकराचार्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

सभा विलपति

"अग्र:"

(पितरमुपरतं पश्यन्ती रोदिति सभा-पुत्री)

हा तात! मे तात! क्व गतोऽसि?
किं न शृणोषि? बहु दूरतोऽसि?
विलपामि प्रलपामि किं किं कथं?
नैव, शक्नोम्यवस्थातु मेतत्कथं!!

श्रान्तस्य ते भूमिशय्या कथं!
शयानस्य तेऽर्पिता माला कथं!!
चित्तं समाधाय मौनी भवान्!
नेत्रे निमील्य किं योगी महान्!!

विश्वसिमि निश्श्वसिमि नेत: परम्,
न भवामि प्रभवामि नेतः परम्,
हीनाऽस्मि दीनाऽस्मि मां पश्य भोः!
स्तब्धाऽस्मि रुद्धाऽस्मि मां पश्य भोः!!

कुपितोऽसि वा मे, भवान् पश्यतु,
को वाऽद्य मां त्वदृते पश्यतु?
लीलाविभूतिं विहायाऽद्य मां
नित्यां विभूतिं गतः किं भवान्!!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हा ! हन्त !!

श्रीमान् ति. कं. तिरुवेङ्कटाचार्यः, संस्कृतभाषाप्रचारिण्याः सभायाः प्रधानमन्त्री, सभायाः जन्मदाता, गताश्वयुजमासे सभारजतोत्सवनिर्वाहकः, संस्कृतप्रचारकाणां उत्साहोत्सवमूर्तिः इतः परं नाऽस्तीति महानशनिपातश्च ।

१४-१२-७३ भृगुवासरे अयमाचार्यः दिवा १०-३० समये स्वाचार्यचरणं गत इति दुर्वार्ता कर्णताडिताऽसीत् । पञ्चविंशतिवर्षेभ्यः प्रागारभ्य सभास्थापनप्रभृति संस्कृतसेवां आतन्वानः आचार्यवर्यः **सभापति** रासीत्; सभा-संस्कृत-प्रचारकाणां कुलपतिरासीत् । **"नः सभापति, नः कुलपतिः, नेतः परं नः"** इति हा ! महान् खेदः ! ! हन्त ! हतभाग्याः स्मो वयं सभाकार्यकर्तारः !

दुर्दिनमिदं सभायाः, उत्साहभंगः संस्कृतप्रचारककुलस्य, शोकसागरः कुटुम्बस्य, विषादवार्ता बन्धुमित्राणां गाढान्धकारः सभाकार्यकर्तॄणाम् ! ! !

आचार्यवर्यस्य परमपदप्राप्त्या सभायाः यो लोपस्समजनि स नूनं अपूरणीयः, अविस्मरणीयश्च । सभाजीवनविधाने भगवल्लीलेयं परीक्षा संवृत्ता । सभायाः, कुटुम्बसभ्यानां च भगवान् दुःखं व्यपनोदतु, अस्मांश्च आचार्योपदिष्टमार्गे कर्तव्यनिष्ठानातनोतु इति प्रार्थयितुमेव केवलं वयं शेषाः स्मः ।

शान्तिः शान्तिः शान्तिः ! ! !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धाञ्जलिः

स्वामिन्! आचार्यवर्य! तिरुवेङ्कडाख्यया भवान् भगवन्तं परब्रह्मभूतं श्रीनिवासं स्वशेषत्वविभवेन हृदि निधाय आराधयन्नासीः किल! किं भगवान् तत्रभवन्तं परमपदे निजनित्यकैङ्कर्याय आह्वयत्? यतस्तत्र भवान् हठात् अस्मादृशान् अकिञ्चनान् विहाय, संस्कृतसभां निरालम्बां कृत्वा, कुटुम्बसभ्यान् दुःखार्णवे निमज्जय्य स्वाचार्यचरणं गतः!!

महतीं किल स्वार्थचिन्तां मुमुक्षोस्तत्र भवतस्तर्कयामि, यदद्य संस्कृतस्य विशेषरूपेण प्रचारावश्यकतायां सत्यां, सभां प्रसूय, प्रवर्ध्य, पुत्रीनिर्विशेषेण प्रेम्णा स्वान्तिके निधाय, विधाय च तद्भवनं सुचारुरूपेण, रजतोत्सवसमारोहेण आरूढयौवनां तां स्वयंवरमण्डपे प्रवेशयित्वा स्वयं निर्गतस्तत्रभवान्!

पतिंवराऽपि इयं सभा न स्वयंवरायोत्सहते। न हीयं क्षत्रियकन्या; भवादृशस्य गुरोः सुता ब्राह्मेणैव विधिना उपयन्तुमुत्सहत इति सहजं किल! अस्यामवस्थायां तत्रभवतः मुमुक्षुमार्गं गतवतस्सतः, विवाहोचितायाः भवत्पुत्र्याः सभायाः वोढारं कमिह समुपस्थास्यति विधिः? इति महती चिन्ता नः क्लेशयति।

संस्कृतसेवाविधानेन अस्मादृशान् संस्कृतशिशून् संकलय्य संस्कृतप्रचारककुलं कल्पयामास किल तत्र भवान्। कुलपतौ तत्रभवति, वर्धमाने चाऽस्मत्प्रचारककुले, केयमसहिष्णुता दुष्टदिष्टस्य, यद्भवान् कालसर्पेण दष्टः।

दूरदूरेऽपि देशे वर्तमानं, इतस्ततः संसरन्तं, पथः स्खलितं मादृशं "अवर"मपि प्रवरं भाव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन् स्पर्शमणिरिवाऽसीः; आकर्षणविद्यया मादृशान् वारं वारं आकर्षन्नयस्कान्तवदासीः; परमाणुकेन्द्रवद्विद्यमानस्य तत्रभवतः परितः अस्मादृशाः बहवः संस्कृतप्रचारकाः स्वे स्वे कर्मण्यभिरताश्चरन्ति स्म। इदानीं केन्द्रबिन्दुविहीना मादृशा अणुकणाः कथं वा स्व-स्वकक्ष्यासु चलितुं प्रभवेयुः?

नूनं वयं हताः स्मः, गतोत्साहा मन्दभाग्याः स्म; यतस्त्वं गतोऽसि, निर्गतोऽसि विहायास्मान्, हृतोऽसि, अपहृतोऽसि लोकादस्मात्।

स्वामिन्! श्रीमन् तिरुवेङ्कडाचार्य! अङ्गीकुरुष्व इमां श्रद्धाञ्जलिं मदीयां विषादविह्वलाम्। किमितः परं शिष्टं भवद्विषये किञ्चित्कर्तुं नः।

—"अवरः"

शोकप्रस्तावः

अस्य विद्यापीठस्य प्राचार्यः परिवाराः छात्राश्च वयं वज्राघाततुल्यां चित्तूरु संस्कृतभाषाप्रचारिण्याः सभायाः प्रधानमन्त्रिणां श्री ति. कं. तिरुवेङ्कटाचार्याणामकालमृत्युवार्तांश्रुत्वा नितरां दुःखिता भवाम।

पण्डितप्रवराः श्री तिरुवेङ्कटाचार्याः अतीतपञ्चविंशतिवर्षेभ्यः संस्कृतप्रचारे बद्धश्रद्धाः आसन्। तेषां हृदयपूर्विकया सेवया संस्कृतभाषाप्रचारिणी सभा विविधाः परीक्षाः पञ्चविंशतिवर्षेभ्यः प्रागारभ्य अविच्छेदेन प्रचालयति, तथा गतैकादशवर्षेभ्यः गैर्वाणीनाम्नीं मासिकीं पत्रिकां प्रकाशयति। परीक्षास्वन्विता बहवः संस्कृतज्ञानमलभन्त।

तेषां द्युलोकगमनेन संस्कृतलोकः विशिष्टेन श्रद्धालुना व्यवसायिना च संस्कृतप्रचारकेण कविवरेण विशेषज्ञपत्रिकासंचालकेन च वियुक्तः महान्त क्लेशमनुभवति।

सपरिवारः विद्यापीठप्राचार्यः तद्वियोगदुःखमनुभवतां संस्कृतभाषाप्रचारिणी सभापरिवाराणां श्री तिरुवेंकटाचार्यकुटुम्बस्थानां च कृते स्वीयं दुःखं समाश्वासवचनं च प्रेषयति। दिवंगतानां तेषामात्मनः शान्तिं भगवान् श्रीनिवासः प्रयच्छतु इति च प्रार्थयते।

***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

M. ANANTHASAYANAM AYYANGAR,
Ex - Governer of Bihar.

Tirupati,
19—12—1973

I am extremely sorry to learn of the demise of Sriman T. K. Thiruvengadacharyulu. He could have lived easily a hundred years but God has willed otherwise. Please accept my heart felt condolences and convey the same to the members of the family.

Yours sincerely,
M. Ananthasayanam Ayyangar.

Dr. B. Gopala Reddy,

Sudarsana Mahal
Nellore - 3.
22—12—73

Very sorry to learn of the demise of Sri T. K. Tiruvengadacharya on the 14 th December. He was a pillar of strength to our Samskritha Bhasha Pracharini Sabha. He was a great enthusiast of Sanskrit learning. He was for a long time member of our Sahitya Akademi. I am really sorry for his untimely death. Please convey my condolences to the members of the bereaved family.

with regards,
Yours in sorrow
B. Gopala Reddy.

Resolution under the auspices of the Sanskrit Parishat, Tirupati.

The Sanskrit Parishat, Tirupati, places on record its deep sorrow on the sad and sudden demise of **Sri T. K. Tiruvengadacharya** the Prathanamantri of Samskrit Bhasha Pracharini Sabha, Chittoor on 14—12—'73.

Tirupati.
22—12—73

D. Arkasomayaji.
President of the Sanskrit Parishat,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यासानुग्रहं – पुराणानि

लेखकः– श्री दर्भा चलमय्यशास्त्री, पेद्दापुरम्.

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषं ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिं ॥
अचतुर्वदनो ब्रह्म द्विबाहुरपरो हरिः ।
अफाललोचनश्शम्भुः भगवान् बादरायणः ॥

व्यास इति पदं आधिकारिकी पदं । व्यासः प्रतिद्वापरान्ते आविर्भूय वेदविभागं कृत्वा पुराणेतिहासान् रचयति । अद्यतन व्यासः सप्तविंशतितमः । एषोऽपि वेदान् चतुर्धा विभज्य पुराणेतिहासान् अरचयत् । सत्यवतीपराशरसूनुः यः श्रीकृष्णद्वैपायनेन व्यवह्रियते, स एव व्यासपीठमलङ्कृतवान् खलु । आगामिमन्वन्तरे अश्वत्थामः अष्टविंशतितमः व्यासो भविष्यति । सर्वाण्यपि पुराणानि अस्य व्यासस्य अनुग्रहः इति नात्र किंचित्संशय ।

विश्वस्य पूर्वावस्थानिरूपकं, व्यासादिमुनिप्रणीतं, वेदार्थवर्णनैकपरं, पञ्चलक्षणसमन्वितं शास्त्रं 'पुराण'मित्युच्यते बुधैः । पुरातनमपि पुराणम् नवीनम् भवति । अतिप्राचीनमपि अतीव नव्यततया शोभते । पुरा अतीत अनागतौ अर्थौ अणति इति 'पुराणम्' । भूतभविष्यत्कालीनविषयान् प्रबोधयति पुराणम् । ब्रह्माण्डपुराणे, स्कान्दपुराणे अपि एवमेवोक्तम् । त्रैकालिकी कथाः पुराणेषु दृश्यन्ते इत्यत्र सन्देहो न कर्तव्यः ।

तादृशानि पुराणानि अष्टादश, ब्रह्मपुराणम्, पद्मपुराणम्, विष्णुपुराणम्, शिवपुराणम्, भागवतपुराणम्, भविष्यत्पुराणम्, नारदपुराणम्, मार्कण्डेयपुराणम्, अग्निपुराणम्, ब्रह्मवैवर्तकपुराणम्, लिङ्गपुराणम्, वामनपुराणम्, स्कान्दपुराणम्, मत्स्यपुराणम्, कूर्मपुराणम्, वराहपुराणम्, गरुडपुराणम्, ब्रह्माण्डपुराणम् चेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव उपपुराणान्यपि अष्टादश–सनत्कुमारपुराणम्, नृसिंहपुराणम्, वायुपुराणम्, शिवधर्मपुराणम्, दुर्वासपुराणम्, नारदीयपुराणम्, उशनशपुराणम्, कपिलपुराणम्, वरुणपुराणम्, साम्बपुराणम्, कौशिकपुराणम्, महेश्वरपुराणम्, कल्किपुराणम्, पराशरपुराणम्, मारीचपुराणम्, भास्करपुराणम्, देवीभागवतपुराणम्, मानवपुराणम् चेति ।

भारतरामायणौ तु ऐतिहासिकग्रंथौ । पूर्वराजर्षीणां चरित्रं 'इतिहासनाम्ना' व्यवह्रियते । एते इतिहासा अपि पुराणसदृशाः एव । पुराणपद्यलक्षणम् तु - सर्गश्च - प्रतिसर्गश्च वंशोमन्वन्तराणि च, वंशानुचरितं चेति । तेषां मध्ये वंशस्य वंशानुचरितस्य च पुराणेषु प्राधान्यं दृश्यते । सर्गस्तु त्रिधा विभज्यते । प्रथमसर्गः, मध्यमसर्गः, अन्त्यसर्गश्चेति । प्रथमसर्गे मूलप्रकृतिचतुर्विंशतितत्वप्रादुर्भावं संप्रोक्तं । (प्रापञ्चिकसृष्टिः इति वक्तव्यः) । मध्यमसर्गे चतुर्दशमनूनां, प्रजापतीन्द्रदेवसप्तर्षीणां च प्रारम्भं व्याहृतं । अन्त्यसर्गे भूलोकीयानां मनुष्यपशुमृगपक्षिसरीसृपस्थावरविशेषाणां च शरीरनिर्माणं प्रोक्तं । त्रिविधसृष्टे प्रलयमेव प्रतिसर्गः भवति । एवमेव वंशः, मन्वन्तराणि, वंशानुचरितं च कीर्तितम् । दशलक्षणसमन्वितं भवति महापुराणम् । सर्गः, विसर्गः, प्रवृत्तिः, रक्षा, मन्वन्तरं, वंशं, वंशानुचरितं, संस्था (प्रलयं), हेतु, अपाश्रयं चेति । एतद्विषयमेव ब्रह्मवैवर्तकपुराणे सम्यक् कथितम् ।

पुराणेषु ऋषिदेशमहावीरचरितनि, भगवदवताराणि, युगादीनां सृष्टिः, लाजाविधिः, व्रतानि तीर्थानि इत्यादीनि बहूनि विषयाणि कथितानि । ज्ञानप्रदायका, भूगोलखगोलविषयाः बहवः सन्ति । भक्तिप्रदायकाः अनेकाः कथाः वर्तन्ते । शारीरकमानसिकसम्बन्धीयाः, आध्यात्मिकज्ञानप्रदाः, नियमनिष्ठाप्रबोधकाः बहवः कथाः च विराजन्ते । किं बहुना ? सर्वे विषयाः एतेषु पुराणेषु प्रतिपादिताः इति नात्र आश्चर्यः । मथनमनुसृत्य हि पुराणेषु विज्ञानामृतं उद्भवति । अत एव –

पुराणानि सदा स्मरणीयानि पूजनीयानि च भवन्तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साहित्ये चित्रलेखनम्

"राधा" (सूरम् श्रीनिवासः, एलूरु.)

मनांसि भावानां जन्मगृहाणि । शब्दाः भावानां धात्रीसमाः । मनोगृहे लब्धजन्मानः शब्दधात्री परिपुष्टाश्च भावाः अर्थप्रदानरूप-जीवनगम्यस्थानं गच्छन्ति । लब्धस्नेहप्रभावेन संलग्नममताकार-णेन च यथा भिन्नभिन्नमार्गेषु जीवनगम्यस्थानगमनम् तथा कथन-व्यक्त्यनुसारेण कथितमार्गानुसारेण च भावानां भिन्नभिन्नगत्या गम्यस्थानगमनम् । सर्वेषाम् मनस्सु प्रायशः भावोत्पत्तिः भवत्येव । किन्तु सर्वेऽपि ते भावुकाः एकेनैव मार्गेण भावान् न व्यक्ती-कुर्वन्ति । यदि स्यात् तादृशस्थितिः तर्हि कवयः, विमर्शकाः कथकाः, चित्रकाराः, शिल्पिनः इत्यादि विषयविभागोऽपि न स्यादेव । अत एव सर्वैरपि नाश्रीयते एकमेव व्यक्तीकरणविधा-नम् । कथने एकैकस्यापि व्यक्तिनः भेदो वर्तत एव । भावव्यक्ती-करणभेदश्च कलाभेदं प्रकल्पयति ।

न केवलं शब्दाः भावबोधकाः मूकादीनां चेष्टासु अतिव्या-प्त्यापत्तेः । यद्यपि तासु समग्रभावबोधनम् न दृश्येत तथापि भाव-बोधनम् स्वीयकार्यानकूलतया तत्रापि भवत्येव । बालादीनां व्यव-हारेऽपि तादृशातिव्याप्तिरेव भवेत् । अत एव न केवलं शब्दाः भावबोधकाः । विनैव शब्दान् चित्रकारादयोऽपि मनोज्ञभावाना-वेदयन्ति । अतः स्वीयचमत्कारविषयकभावप्रदानविधानुसारेणैव कलानां वैविध्यं समजनि ।

लोके चतुष्षष्टिकलाः वर्तन्ते । तासु च कलासु ललितकलाः इति कासांचिदेव व्यवहारः प्राधान्यम् च । संगीत-साहित्य-चित्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेखन - नाटय - शिल्पकलाः ललितकलाशब्दवाच्याः वर्तन्ते । अत्र साहित्ये समग्रतः, संगीते लेशतश्च शब्दानां भावावबोधकत्वम् । तदितरकलासु शब्दाः न वर्तन्ते । किन्तु तत्र मनोहररसस्फूर्तिः दृश्यत एव । आनन्ददायिकाश्च ताः भवन्ति । नाटये आंगिक-सात्विकाहार्यवाचिकाभिनयैरेव भावबोधनम् । तेन रसस्फूर्तिः । चित्रलेखने शिल्पे च तत्कर्तृकल्पितवर्णभेदः भङ्गीभेदश्च भाव-बोधकः भवति । रसानुगुण्येन यथा साहित्यादिषु शब्दोपयोगित्वं तथा रसानुगुण्येण शिल्पादिषु भङ्गीनिर्मातृत्वम् । एवं पञ्चाप्येताः कलाः शब्दसहिताः शब्दरहिताश्च भावबोधकाः ललितकलाः भवन्ति ।

आसु च कलासु परस्पराश्रयणमपि दृश्यते । संगीतस्य साहित्याश्रयणं वर्तते । विना साहित्यम् संगीतस्य प्राधान्यम् नास्ति । शिल्पे चित्रलेखने च वाच्यतया साहित्यस्थितिर्न किन्तु अतिगूढ-व्यंग्यतारूपेण तत्र साहित्यस्थितिः । साहित्ये पुनः तयोः समावेशो भवति । ते शिल्पचित्रलेखने साहित्ये अतीव प्राधान्यम् लभेते । साहित्येऽपि तयोः व्यंग्यमुखेनैव प्राधान्यम् । किन्तु स्फुटव्यंग्यता-रूपेण । नाटयस्यापि साहित्यापेक्षा किञ्चित् वर्तते । संगीते साहि-त्यस्य यादृशम् प्राधान्यम् तादृशप्राधान्यं साहित्ये संगीतस्यापि दृश्यते । अत एव गीतगोविन्दादीनां काव्यानां महाकाव्यत्वापत्तिः ध्वनिकारादीनां अपि स्तुतिर्जयदेवादीनां कृते । अत एव—

संगीतमपि साहित्यम् सरस्वत्याः स्तनद्वयम् ।
एकमापातमधुरम् अन्यदालोचनामृतम् ॥

इति वाक्योत्पत्तिः । सामवेदस्यापि संगीतप्राधान्यम् साहित्यमिश्रि-तत्वम् च दृश्यते ।

साहित्ये संगीतस्य यादृशम् प्राधान्यम् ततोऽप्यधिकप्राधान्यं चित्रकलायाश्च भवति । प्रायशः चित्रकारकव्योरभेद एव । द्वावपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तौ भावुकताभिभासिनौ। द्वयोरपि मनोहरदृश्यदर्शनेन मनसी नाट्यं कुरूतः। द्वयोरपि हृदये प्रकृतिराकर्षत्येव। दृश्यदर्शनेन कविहृदये यादृशभावोदयः स एव वा तत्तुल्यभावोदयो वा चित्रकारस्यापि हृदये भवति। किन्तु व्यक्तीकरणविधाने द्वयोरपि भेदं स्फुटतर एव। लोके मनसोरैक्येऽपि मार्गयोः वैविध्यम् खलु। प्रह्लादहिरण्यकशिपनिशाचरयोः हृदययोः विष्णुरेव अवर्तत। किन्तु भक्त्या एकस्मिन्, असूयया अन्यस्मिन्। तथापि द्वयोरपि कर्म वर्णसम्बन्धि एव। कविः वर्णप्राधान्यमाश्रयति। चित्रकारोऽपि वर्णप्राधान्यम् आश्रयति। कविः व्यंग्यं आश्रयति। चित्रकारोऽपि व्यंग्यं आश्रयति। कविः रचयति। चित्रकारोऽपि रचयति। भेदस्तु एक एव। कविकर्म शब्दैः, चित्रकारकर्म वर्णैः। वर्णानां समूह एव यद्यपि शब्दः तथापि न्यायोऽयं नात्र प्रवर्तते। अतः चित्रकारः वर्णाश्रयः। कविः शब्दाश्रयः। वर्णापेक्षया शब्दानां प्राधान्यम् खलु। अत एव चित्रकारापेक्षया कवेरपि प्राधान्यम्।

चित्रकारः स्वमनोगतान् भावान् यद्यपि साक्षात् प्रकटीकर्तुम् न शक्नोति तथापि सर्वभावपिण्डीकृतरूपेण चित्ररचनं करोति। कविरपि साक्षान् न प्रकटीकरोति किन्तु शब्दद्वारा। लोके अधिकसख्याकानाम् जनानाम् शब्दपरिचयः वर्तते न तु वर्णपरिचयः। अतः शब्दबोधिताः भावाः अनेकेषाम् कृते उपकुर्वन्ति। वर्णबोधितास्तु केषाञ्चिदेव कृते। चित्रकलागताः धर्माः रहस्याणि च कैश्चिदेव अनुभूयमानानि भवन्ति। चित्रकारस्य रचनावसरे शब्दाः नोपस्कारका भवन्ति। कवेस्तु काव्यरचनावसरे वर्णाः नित्योपस्करका भवन्ति। अत एव चित्रकारः चित्रलेखने साहित्यम् उपयोजितुं न शक्नोति कविस्तु काव्ये वर्णनात्मकचित्रलेखनमपि कर्तुम् शक्नोति। तस्मादेव चित्रकलायां साहित्यस्य स्थानाभावेपि साहित्यं चित्रकलायाः स्थानम् प्राधान्यं च दृश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीनैः मधुरकवित्वम् आशुकवित्वं चित्रकवित्वं बन्धकवित्वं चेति चतुर्विधकविताभेदाः प्रदर्शिताः। एषु चित्रकवित्व बन्धकवित्वे साहित्ये चित्रलेखनस्थाने उदाहरणत्वेन स्थातुम् शक्नुवन्ति इति केचन भ्रमिता भवन्ति तेषाम् अभिप्रायः साक्षात् भ्रम एव, साहित्यस्य परमं प्रयोजनं सद्यः परनिवृत्तित्वमेव। तच्च श्रव्यकव्यापेक्षया दृश्यकाव्येन सुसाध्यं भवति। अतः श्रव्यकाव्यमपि यत्र दृश्यकाव्यवत् दृश्यते तत्र चित्रलेखनं वर्तते इति वक्तव्यम् स्यात्। न तु चित्रबन्धकवितादिषु। तेषु झटिति अर्थस्फूर्तिरेव नास्ति। आदौ वाच्यार्थस्फूर्तिः अनन्तरम् व्यंग्यार्थस्फूर्तिः अनन्तरं च रसास्वादनम् इत्येतत् सर्वमपि झटित्येव स्यात् काव्ये। बन्धकवित्वे वा चित्रकवित्वे वा तादृशावकाश एव नास्ति। एकाक्षर-पद्यरचनेन वा पद्यबन्धादिरचनेन वा सद्यः परनिवृत्तिः साधयितुं शक्यत इति को वा सहृदयस्सन् ब्रवीति।

यत्र वर्णनम् चित्रपटवत् अस्माकम् पुरतः साक्षात् तिष्ठति तत्र तस्मिन् वर्णने चित्रलेखनसादृश्यं भातीति भाषितुम् शक्यते। अर्थात् वर्णनागतस्य यस्य भावस्य भावनया अस्मन्नेत्रयोः चित्रतया तस्य स्थितिः तादृश वर्णनात्मके भावे चित्रलेखनम् दृश्यते इति निगद्यते। प्रायशः सर्वेपि कवयः वर्णनाशक्ताः अलङ्कारसक्ताश्च भूत्वा अतिशयोक्त्युपमोत्प्रेक्षाद्यलङ्काराश्रयणम् कुर्वन्तः समग्रतया सहजतया च चित्रताम् नापादयन्ति भावस्य। केषाञ्चित् वर्णनानाम प्रत्येकतया प्रतिपद्यम् चमत्कृतिः दृश्यते किन्तु तत्पिण्डीभूतार्थभावनेन पुनः तादृश्य चमत्कारः नानुभूयते, यदा कदा वा जुगुप्साऽपि। अतः प्रायशः कवीनाम् वर्णनेषु चित्ररूपतया स्थितस्य सहजसुन्दरस्य भावस्य यथावत् चित्रणं न दरीदृश्यते। तस्मिन् दृश्यमाने सति तत्र साहित्ये कविना अप्रमत्ततया चित्रलेखनमेव कृतम् इति निर्णयस्वीकारे न स्यात् विप्रतिपत्तिः।

— (अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गैर्वाणीगौरवम्

कविः काव्यतीर्थ ज. व्यं. पल्लेवार उपाख्यः जयेशः, M.A. LL.B.

कुलकम्

संस्कृतं सुमनस्कानां मंगळं सुमनोहरम् ।
प्रसादगुणसंपन्नं प्रसन्नापार्थवर्षणम् ।।
नानारससमाकीर्णं नानालंकारमंडितम् ।
उच्चसाहित्यसंपन्नं वाग्सुधारसवाहकम् ।।
आनंददायकं नित्यं श्रवणातिमनोहरम् ।
नानाशास्त्रसमाकीर्णं माधुर्यरससंयुतम् ।।
मेदिनीमंडलेमान्यं महामानसमंडनम् ।
मंगलमंत्रमैत्रेयं मानव्यमनमापनम् ।।
समस्तभाषिकैर्वन्द्यं भाषाणां जनकं प्रियम् ।
शिष्टसंस्कृतिसंश्लिष्टं सुभाषितविभूषितम् ।।
सरस्वतीप्रतिष्ठानं संस्कृतिप्रियभाजनम् ।
परन्तु संस्कृतं नित्यं भारतभाप्रदीपकम् ।।

विशेषकम्

साहित्यरत्नसंपन्नं विचारैर्वीचिभिर्युतम् ।
कल्पनाकेलिकल्लोलं सारस्वतरसप्लुतम् ।।
अगाधज्ञानगंभीरं वेदोच्चारेण गर्जितम् ।
शब्दभण्डारसंभासं संस्कृतज्ञानसागरम् ।।
तरन्तु मानवाः सर्वे संसारोडुपचारिणः ।
स्वयं सिंधुविहारेण भवन्ति हि सुसंस्कृताः ।।

संस्कृतं संस्कृतीश्लिष्टं संस्कृतिः संस्कृताञ्चिता ।
संस्कृतं संस्कृतेर्मूलं मूलमंत्रमिदं खलु ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

गान्धीकथा

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

'मीरासोदरा' महात्मनः प्रियच्छात्रा भूत्वा तस्यैव निकटे प्रत्यहं शिक्षणं लभते स्म। जातु सा डा. 'अन्सारी' महोदयस्य गृहं जगाम। गृहे तत्र महान् अतिथिसत्कारो बभूव। अन्ते चर्वणार्थं ताम्बूलमपि दत्तम्। "नाहमभ्यस्ता" इति सा तद्दानम् तिरश्चकार।

"ताम्बूले सन्ति त्रयोदशगुणाः। भारते अस्यास्ति महत्-गौरवम्। अत एवोपहारस्वरूपेण सर्वत्रापि शुभकर्मसु इदं उपयुज्यते। आहारोपि अस्य प्रभावात् शीघ्रमेव जीर्णो भवति" इति महत्-व्याख्यानमेव ददौ डाक्टर महाशयः। आतिथेयस्य मनस्तृप्त्यै केवल-मनिष्टमपि अनभ्यस्तमपि ताम्बूलचर्वणं चकार सा। अमुं विषयं अपकृतमिति भावयित्वा 'अन्सारी', महात्मने गांधीमहाशयाय स्वयं पत्रमेकं लिलेख "मीराकृते यदि मयापराधः अव्यवहारो वा कृत-श्चेत् कृपया क्षमा तस्यास्तु" इति। सप्ताहाभ्यन्तर एव पत्रस्यो-त्तरं प्राप्तम्। "डाक्टर्महाशय! भवदाग्रहः सर्वथा अयुक्तः। साधकैः कदापि अनियतानां खाद्यवस्तूनां उपयोगः न कर्तव्यः। यद्यपि मुसल्मानाः नागवल्लीं आदरप्रतीकां भावयन्ति। किन्तु सा न जीवनस्य सर्वथापेक्षितवस्तु। विना ताम्बूलं मानवः जीवितुं शक्तः सर्वथा। एतादृशेषु व्यवहारेषु प्रतिपदं जागृतिरावश्यकी। साध-कास्तु कदापि व्रतभङ्गार्थं सिद्धा न भवेयुः। यदि अतीव क्षुद्रेषु प्रसङ्गेषु एतादृशेषु धैर्येण न व्यवह्रियते तर्हि नैव दुर्व्यसनरूपे परिणता भवन्ति। "सङ्गात्सञ्जायते कामः" इति।

अनेन ज्ञातुं शक्यम् महात्मा आत्मनो निकटवर्तिनां "भोज-नादि व्यवहारेष्वपि कीदृशीं सूक्ष्मां दृष्टिं ददाति स्म" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गैर्वाणीप्रशंसा

स्फूर्तिश्रीः

सर्वभाषाकुमारीणाम् माता सुधा पयस्विनी ।
काचिदस्तीह गैर्वाणी निर्जरैरपि सेविता ।।

यावज्जाता न गैर्वाणी तावन्मूकम् यथा स्थितम् ।
अन्धे तमसि निर्मग्नम् सर्वं जगच्चराचरम् ।।

भाषेयं चन्द्रलेखेव वितनोति सुसंस्कृतिम् ।
भाति मूर्धानमारुह्य कृत्वा सर्वं जगच्छिवम् ।।

सर्वशास्त्रमयी वाणी सर्वविद्यास्वरूपिणी ।
सर्वविज्ञानमञ्जूषा प्रेयश्श्रेयः प्रवर्षिणी ।।

प्राक्प्रतीची विदग्धानाम् अनर्घं मुखमण्डनम् ।
वरं गीर्वाणसाहित्यम् लोकालोकनदर्पणम् ।।

सत्यर्थे सति सौन्दर्ये सति नूतनयौवने ।
सत्सु सर्वाधिकारेषु न शोभा संस्कृतं विना ।।

अहो तेषाम् महाभाग्यम् यैराप्ता वाक् सनातना ।
सुवर्णत्वम् सुधर्मत्वम् भुवस्तेषु प्रतिष्ठितम् ।।

सुनिर्दिष्टा च या भाषा प्रकृतिप्रत्ययान्विता ।
तद्भाषिणोऽपि भूयासुः प्रकृतिप्रत्ययान्विताः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुकुन्दविलासः

श्री कुण्टिमद्दि शेषशर्मा, अनन्तपुरम्.

(पूर्वानुबन्धः)

अथ प्रौढमुकुन्दविलासः ।

ललितमधुरगन्धाश्चारु[1]पिष्टातपांशुं
सुरभिळमुखचूर्णं चाददन्यस्त्रिवक्राम् ।
अरचयदतिमात्रं रम्यगात्रां दयाळुः;
दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ।।

बहुळकुटिलतन्त्रै र्भागिनेयं जिघांसुं
सततरचितचिन्तं मातुलं संजघान;
[2]दशमिनमकरोद्यश्चोग्रसेनं महीपं;
दिशतु स तु मुकन्दो भव्यमव्याहतं नः ।।

असकृदभिपतन्ती र्योजरासन्धसेना
मगधनृपतिशेषा अतनोत्सङ्गरेषु,
पवनसुतहतं तं चाकरोदन्ततोयः;
दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ।।

यवनमनुसरन्तं प्रापयन्यो गुहान्तः
निभृत[3]शयनभङ्गक्रोधरूक्षेक्षणेन ।
अनयतमुचिकुन्देनान्तकावासभूमिम्;
दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ।।

---

[1] पटवासकः   [2] वृद्धं   [3] निद्रा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नरकदनुजकारागारनिर्बन्धिताना-
मपि युवतिसहस्राणां स्वयं षोडशापि ।
अरचितविचिकित्सं योहि जग्राह पाणौ
दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ॥

ललिततमविलासैः कल्पिताहार्यवन्या-
विहरणजलकेळीद्यूतसङ्गीतकैश्च ।
अजनयदखिलानां यो वधूनां प्रमोदं;
दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ॥

सुरमुनिवरवाणी सूचिकाभिः प्रभिन्नां
प्रणयकलहरुष्यद्भामिनीं सत्यभामाम् ।
चरणतलहतस्सन् दक्षिणो योऽनुनिन्ये;
दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ॥

अकुरुत समरं यो निर्जराणां च पत्या
कुपितदयितसत्याचित्तसन्तोषणाय,
अनयदपि धरित्रीं नान्दनं पारिजातं,
दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ॥

अपि सकलविभुषाभिस्तुलारोपितोपि
स्म भवति हि गुरुर्यस्सत्यया मानवत्या ।
लघुरपि तु तुलस्या रुक्मिणीभक्तिगुर्वा,
दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ॥

कुटिलशकुनिमायाद्यूतकेळीजिताया
अपि च समितिमध्ये कृष्यमाणाम्बरायाः ।
अवमतिमरुणद्योवस्त्रसन्दोहदाना
द्दिशतु स तु मुकुन्दो भव्यमव्याहतं नः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

(अनुवर्तते)

Digitized by Arya Samaj Foundation Chennai and eGangotri
पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

भक्त्या तुष्यति माधवः

रचयिता– श्री के. यम्. मुरलीधरः, शिरोमणिः, पाकाला.

अस्मिन् कलौ भक्तिप्रसरणार्थं श्रीमद्भागवताख्यं पुराणं उद्भूतम् । सर्वेषां आस्तिकानां धर्मादिज्ञान उपदेशार्थं प्रवृत्तेन श्रीमन्नारायणांशभूतेन भगवता श्रीवेदव्यासेन वेदोपबृंहणाय श्रीमन्हाभारतं, पुराणानि च रचितानि । तावता तृप्ति अलभमानः व्यासः नारदोपदेशात् सकृत् श्रवणमात्रेण जनानां भगवद्भक्तिः निरतिशयानन्दश्च भगवति यथावास्यात् तथा भागवताख्यं पुराणं व्यरचयत् ।

भगवद्भक्तः भागवतः । भागवतानां चरितं भागवतं इति कथ्यते । अष्टादशेषु पुराणेषु श्रेष्ठतमं भागवतमेव । श्रीमद्भागवतकथालापो वा श्रवणं वा सद्यःफलदायी । भक्तिप्रदायकानि पुराणानि अन्यानि वर्तन्ते एव, तथापि श्रीमद्भागवताख्यपुराणप्रवचनेन, श्रवणेन, सकललोकाधीश्वरे स्वामिनि निरतिशया भक्तिः यथा जायते, न तथा तैः पुराणैः । तथा चोक्तम् –

वेदोपनिषदां साराल् जाता भागवती कथा ।
अत्युत्तमात्ततो भाति पृथग्भूतफलोन्नतिः ।। इति ।

यथा वा पयसि घृतं वर्तते । तत्समये घृतस्य रसः अस्माभिः अनुभवितुं न शक्यते । पयोन्तर्गतस्य सर्पिषः पृथक्करणेन तादृश सर्पिषः रसः अनुभवितुं शक्यते ।

इक्षुखण्डमध्ये शर्करा व्याप्यमानापि इक्षुखण्डात् पृथग्भूत शर्करायाः यावती स्वादुता दृश्यते, तावती इक्षुखण्डे व्याप्यमानायाः शर्करायाः नास्ति । तद्वदेव वेदोपनिषत्सु भक्तिबोधकेषु अनेकेषु इतिहासेषु विद्यमानेष्वपि, भागवते विद्यमानैः इतिहासैः भगवति कमलनयने निरतिशया भक्तिः समुत्थाप्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमद्भागवतस्य पठन, श्रवणफलमपि च अनेकत्र अनेकधा दृश्यते ।

श्लोकार्धं श्लोकपादं वा पठेद्भागवतं च यः ।
नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ।।

अपि च –

यत्फलं नास्ति तपसा न योगे न समाधिना ।
अनायासेन तत्सर्वं सप्ताह श्रवणं मतम् ।। इति ।

पूर्णावतारस्य कृष्णस्य निरतिशयमाहात्म्यप्रतिपादकस्य ग्रन्थस्य महिमा केन वा वर्णयितुं शक्यते ?

नारदः कलियुगे धर्माः कथं वा वर्तन्ते इति ज्ञातुं पृथिवीं बभ्राम । तदानीन्तन धर्मस्थितिं वर्णयाञ्चक्रे । सत्यं न विद्यते । तपः नाचर्यते । दया न लक्ष्यते । दानं विलीनम् । सर्वे जनाः कूट-भाषिणः अविधेयाः । अनाचाराः । अधर्मपरायणाः । साधुजनदूषकाः भवन्ति । सद्विषयान् न श्रृण्वन्ति । किञ्च –

न योगी नैव सिद्धो वा न ज्ञाने सत्क्रियो नरः ।
कलिदावानले नाद्य साधनं भस्मतां गतम् ।। इति ।

अतः कलौ भक्तिमार्गेणैव एतानि दूरीकर्तुं शक्यते इति नारदः निश्चित्य धर्मबुद्धिप्रबोधनाय भागवतं रचयितुं व्यासं चोदयामास । अत एवोक्तम् –

कलौ भक्तिः कलौ भक्तिः भक्त्या कृष्णपुरस्थितः ।
भक्तिद्रोहकराये च ते सीदन्ति जगत्त्रये ।। इति ।

भजसेवायां इत्यस्माद्धातोः भावार्थे स्त्रियांतिनि भक्तिः इति भवति । भक्तिर्नाम भगवत्सेवा । भगवति निरतिशय आसक्तिरेव भक्तिरित्यभिधीयते । एषा आसक्तिः पात्रभेदेन अनेकधा भवति । स्वपितरि वात्सल्यरूपः अनुरागः उत्पद्यते । गुरौ अनुरागः अन्यो-विधः । कामिन्यां उद्भूतो अनुरागः प्रेम इति पदेन व्यवह्रियते लोके । एतादृश आसक्तिर्यदि भगवद्विषयिणी स्यात् तर्हि भक्ति-रित्यभिधीयते । भक्तिमार्गेण भगवत्साक्षात्कारं प्राप्य दुःख-रूपात् संसारात् निर्गत्य निरवधिकानन्दं अनुभवितुं क्षमते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।। इति ।

भक्तिः बहुविधा भवति । एवं नानारूपेषु साधनेषु येन-केनापि साधनेन पूजयितुं शक्यते । तावतैव भगवान् कमललोचनः तुष्टस्सन् अनुगृह्णाति अस्मान् । अत एव उक्तम् –

येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी ।
न ते पश्यन्ति कीनाशं स्वप्नेप्यमलमूर्तयः ।। इति ।

यन भक्तेन अविच्छिन्नया भक्त्या स्तूयते तेन दीयमानं वस्तु सरसं नीरसं वा स्वीकरोति हरिः । तथा च भगवद्गीतायां –

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतं अश्नामि प्रयतात्मनः ।। इति ।

अपि च –

अनपेतशुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ।। इति ।

किञ्च व्याधकुलोद्भूतया शबर्या स्वोच्छिष्ठ बदरीफलं प्रदत्तं रामचन्द्राय । भक्तपराधीनः श्रीरामचन्द्रः तदपि अशुच्यादिकं अविगणय्य तद्गतां निरतिशयां भक्तिमेव मनसि कृत्वा स्वीचकार । अहो! भगवतः भक्तपारवश्यम् । भगवान् कमलापतिः बाह्यगुणान् न स्वीकरोति । अपि तु आन्तरे विद्यमानां भक्तिमेव । भागवते इत्थं दृश्यते ।

न तपोभिः न वेदैश्च न ज्ञाने नापि कर्मणा ।
हरिश्च साध्यते भक्त्या प्रमाणं तत्र गोपिकाः ।। इति ।

"भवता सह रन्तु मिच्छामो वयं" इति देवै प्रार्थितः हरिः कृष्णावतारकाले गोपिकारूपं धरद्भि देवैः रेमे । किञ्च पाञ्चालीं श्रीकृष्णः परिरक्षिता कौरवकश्मलात् । भक्तिरेव सर्वासां उन्नतीनां निदानम् ।

एकदा श्रीकृष्णः हस्तिनापुरं अगच्छत् । तदा दुर्योधनः बाह्याडंबरैः कृष्णे स्वीयं आदरविशेषं प्रकटीकर्तुमैच्छत् । उपचारादिकं कर्तुं उत्सुक इव कृष्णं प्रत्यागच्छत । तदा कृष्णः तस्य बाह्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

डम्बरं अविगणय्य तात्विकीं भक्तिमेव श्लाघयित्वा भक्ताग्रेसरस्य विदुरस्य कुठीरमेव प्राप्तवान् । तदा विदुरः सन्तुष्टान्तरङ्गः आनन्दबाष्पपूरितनयनः भगवन्तं बहुविधैः उपचारैः सम्मानितवान् । संतुष्टः कृष्णः विदुरं करुणातरङ्गितया दृष्टया अनुगृह्णन् स्वकरेण तदङ्गं परामृशन् आसीत् । आनन्दमग्नः विदुरः फलसारं भूमौ प्रक्षिप्य नीरसां त्वचमेव भगवते अर्पयति स्म । भक्त्या विवशः कृष्णः त्वचमेव भक्षितवान् । श्रीकृष्णः राज्ञः दुर्योधनस्य उपचारं विहाय नीचकुलोद्भूतस्य दासीपुत्रस्य विदुरस्य आतिथ्यं स्वीकृतवान् । अत्र विदुरस्य आन्तरभक्तिरेव कारणम् । अत एवोक्तम् –

त्वन्तु भक्तप्रियेतस्य सततं प्राणतोऽधिका ।
त्वयाहूतस्तु भगवान् याति नीचगृहेष्वपि ।। इति ।

सा च भक्तिः द्विविधा दृश्यते । सख्यभावना, प्रतीपभावनाचेति । सख्यभावनया कैवल्यं प्राप्ताः ध्रुवः, गजेन्द्रः, विदुरः इत्यादयः । प्रतीपभावनया मुक्तिं गता हिरण्यकशिपुः, कंसः, रावणः इत्यादयः ।

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयापि च संस्पृष्टः दहत्येव हि पावकः ।। इति ।

तपसा, ज्ञानेन, योगेन, समाधिना दुस्साध्यं कर्म भक्त्या साधयितुं शक्यते । भगवता उक्तम् –

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्याय तपस्त्यागो यथा भक्ति ममोर्जिता ।।
यत्फलं नास्ति तपसा न योगे न समाधिना ।
तत्फलं लभते सम्यक्कलौ केशवकीर्तनम् ।। इति ।

अस्मिन् कलियुगे भक्तिद्वारेणैव भगवत्कटाक्षं प्राप्तुं शक्यते । न बाह्यादिगुणैः । अत एव भागवते उक्तम् – "**भक्त्या तुष्यति केवलं न च गुणैः भक्तप्रियो माधवः**" । इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

लभतां शान्तिमात्मनः

रचयिता विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

आचार्यस्तिरुवेङ्कटोऽद्य सहसा विष्णोः पुरं प्राप्तवान्।
गैर्वाणीसमुपासने सुनिरतः वार्तामिमं दुःखदाम् ।।
श्रुत्वा तेऽद्य वयं महार्तिकलिताः श्रीमद्वियोगादहो ।
हा धिक् ! तेऽद्य कृतान्त ! हंतक ! अहो ! प्राचार्य विध्वंसक ।।

सौजन्यादिगुणान्वितं गुरुवरं छात्रप्रियं पण्डितम् ।
आंध्रांग्लादि सरस्वतीपरिणतं साहित्यरत्नं तथा ।।
दृष्टवा कालमुखेह्यकाण्डपतितं चित्तूरुसंवासिनः ।
कालं तं हतकं कृपाविरहितं निर्भर्त्सयन्त्यन्वहम् ।।

गैर्वाणी तव पुत्रिका गुणयुता त्वन्मानसोल्लासिनी ।
धत्ते दुःखमहो भवन्तमधुना विद्याप्रवीणं विना ।।
त्वत्सृष्टा किल सा प्रचारनिरता गीर्वाणवाणी सभा ।
दिङमूढा तिरुवेङ्कटार्य ! सहसा विद्वन्मणि त्वां विना ।।

माला सा च मुकुन्दनामरचिता त्रैलिङ्गभाषादृता ।
ह्यन्यास्ताः कृतयश्च कीर्तिमधिकां लब्धास्समर्थास्तव ।।
"जातस्येहमृतिस्सदा च सहजा कार्या"व्यथा नेति य-
द्वाक्यं केवलमेकमेव सबलं ह्यस्मदव्यथावारणे ।।

सेवादीक्षा समायुक्तः
तिरुवेङ्कटपण्डितः ।
आत्मनो लभतां शान्तिम्
कृपया कमलापतेः ।।

077925
कांगड़ी विश्वविद्यालय हरिद्वार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री यादवगिरिक्षेत्रमाहात्म्यम्

रचयिता – श्री जंपनि लक्ष्मीनरसिंहशास्त्रि, एलूरु.

श्रीयादवगिरिः भुवनगिरिसमीपस्थं मनोहरं सुप्रसिद्धं च विष्णुदेवताधिष्ठितं पुण्यक्षेत्रम् । अस्मिन् क्षेत्रे श्रीलक्ष्मीनृसिंहस्वामी प्रतिवसति । अस्य क्षेत्रस्य अनतिदूरे पुरातनं नृसिंहस्वामिनः क्षेत्रान्तरमपि अवर्तत– यादवगिरौ चिरकालात् घोरतपः कुर्वतः कस्यचिन्महर्षेः अभीष्टसिद्धिं कल्पयितुं स्वामी अत्र आविर्बभूवेति प्रतीतिः । एतत् क्षेत्रं पुराणेष्वपि प्रसिद्धम् ।

पुरा उग्रतपस्वी नाम कश्चन महर्षी हिमवत्पर्वते तपः कुर्वति सति अष्टवर्षवयस्कः यादववंशीयः एकः बालः तं आश्रित्य शिष्यभावेन सेवां कुर्वन् आसीत् । काले गते स बालः षोडशवर्षपरिपूर्णः आसीत् । लोककल्याणकराणि धर्मानुष्ठानानि शिष्याय बोधयतः तस्य प्राणप्रयाणसमयः सन्निहितोभूत् । तदा सः स्वस्थितिं ज्ञात्वा शिष्यमाहूय "हे शिष्य ! मम शरीरत्यागसमयः समागतः इव । मयि गते अस्मिन् घोरारण्ये त्वयेकेनैव शिष्यते । अतः पर्वतान्तरं गच्छ । दक्षिणदेशे समशीतोष्णः तेजोवान् च एकः पर्वतः अस्ति । तस्मिश्च विष्णुतेजः वर्तते । भूलोके सुप्रसिद्धः सः । तत्र कृताः तपोविशेषाः अधिकपुण्यफलदाः भवेयुः । अतः त्वं तत्र गच्छ । तत्रैव ते परमेश्वरसाक्षात्कारोपि संभविष्यति । तवैव नाम्ना स पर्वतः चिरस्थायी भविष्यति इति उक्त्वा शरीरं अत्यजत् । ततः शिष्यः गुरुदेवस्य शरीरं संस्कृत्य शल्यानि पुण्यतीर्थेषु निक्षिप्य भिक्षाटनतीर्थयात्रादिकं कुर्वन् अचिरेण कालेन यादवगिरिपर्वतं प्राप्य तपश्चर्यां मग्नः अभूत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रायशः एकैकस्मिन् पर्वते एकैकः विशेषः परिदृश्यते, अत्र तु सर्वपुण्यपर्वतगतविशेषाः सर्वे वर्तन्ते । सर्वकामार्थसिध्यर्थं समस्त भोगभाग्यकल्पनार्थं भुक्तिमुक्तिप्रापणार्थं च पर्वतोयं प्रभवति । अस्मिन् आयुरारोग्यदायकौषधयः संजीविनीप्रभृतयः दिव्यशक्ति-पूरिताः ओषधयश्च सन्ति । श्रीलक्ष्मीनृसिंहस्वामी पूर्वोक्तधातु-रसायनमेव भक्तानां रहस्यतया ददातीति प्रतीतिः । अन्यच्च अस्मिन् पर्वते स्थिताः मृगाः क्रिमिकीटपशुपक्ष्यादयश्च परमेश्वर सान्निध्यं सुलभतया लब्धुं शक्नुवन्तीति बुधैः उच्यते । अभीष्ट-सिद्धिकरणे एषः पर्वतः प्रसिद्धिं अवाप । अत एव सहस्राधिकाः जनाः अत्र आगत्य प्रदक्षिणादि तपश्चर्यादिभिः स्वाभीष्ठं साध-यन्ति । यतः अयं पर्वतः जगत्कल्याणवर्तिनः वैकुंठवासस्य श्रीमन्ना-रायणमूर्तेः निवासस्थानम् । अत एव तस्य पर्वतस्य तादृशी महिमा आगता ।

अस्य यादवगिरिरिति नामकरणे कारणं ज्ञास्यामः । पूर्वोक्त उग्रतपस्विनः शिष्यः यादववंशीयः खलु । अयं साधुः तं पर्वतं प्रविश्य अनेकसंवत्सराः एकस्मिन्नेव कंदरे तपश्चकार । तदा विष्णुना "भो वत्स ! उत्तिष्ठ" इति आशीर्वादेन सः प्रबोधितः । अनन्तरं च विष्णुः "एवं प्रकारेण तपःकरणे कारणं किं? तवाभीष्ट-वरं वृणीहि इत्यपृच्छत् । स तु "त्वदनुग्रह एव मम अभीष्टवरः" इत्यकथयत् । तदा विष्णुमूर्तिः "मम साक्षात्कारस्य किं फलम् ?" तस्मात् यथेच्छं वरं वृणीष्व इत्यवोचत् । तदा सः मुनीश्वरः अस्मिन् प्रदेशे बहुरोगपीडया, दारिद्र्यबाधया, निस्सन्तानव्यथया च, अनेक-मानवाः पर्याकुला भवन्ति । तस्मात् एतेषां जनानां दुःखनिवार-णार्थं त्वं वैकुंठं त्यक्त्वा अस्मिन्नेव पर्वते वस । वैकुण्ठलोकादयः तदा विहारस्थानान्येव भवेयुः इत्यकथयत् । ततः श्रीमन्नारा-यणमूर्ती संतुष्य लोकानुग्रहकांक्षया तं वरं अङ्गीकृत्य, तव प्रत्येकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किंचित् दास्यामि कथय इत्यवदत् । तदा यादवकुलसंजातः सः ऋषिपुंगवः स्वार्थं अनवेक्ष्य कामाग्निदुःखतप्तानां प्राणिनां आर्तनाद नाश एव मे रोचते तद्देहि इति प्रार्थयामास । अनेन कारणेन यादवगिरिक्षेत्रं सुप्रसिद्धं अभवत् । एतस्य महर्षेः यादवकुलसंजातत्वात् अस्य पर्वतस्य यादवगिरिः इति नाम आसीत् । इदानीं जनव्यवहारे तस्य यादगिरिः इत्येव प्रसिद्धिः । अस्य क्षेत्रस्य समीपे पापविनाशिनी इति एका पुष्करिणी अस्ति । अत्र शिवचिह्नाः अपि दृश्यन्ते इति ।

अन्तिमवचनम्

"राधा" एलूरु.

(जनापवादेन सीता श्रीरामपरित्यक्ताऽभूत् । किन्तु श्रीरामः तां गंगादिप्रदर्शनव्याजेन लक्ष्मणद्वारा तत्याज । लक्ष्मणेन स्वकीयजनापवादं ज्ञात्वा सीता एव मवोचत् ।)

प्रियं प्रियं लक्ष्मण यत्त्वयोक्तं
सदग्रजाज्ञामिलितं वचस्तत् ।
वक्ष्ये किमन्यद्विधिबाधिताऽहं
ललाटरेखा न च लङ्घनीया ॥

इनकुलनृपमुख्येनार्यपुत्रेण तेन
अकरुणवचनं किं जल्पितं कल्पितं वा ।
मदपरवशचित्तैरन्धकैरात्मलुब्धैः
दहनसुपरिशुद्धिर्विस्मृतोऽप्रस्तुतो वा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्ताऽपि वा जाग्रदवस्थिता वा
मत्ताऽपि वा मन्मथबाधिता वा ।
माचिन्तयम् राममति विकारं
अकारणाज्ञासु निवेशितं च ।।

तदीयवाक्यश्रवणे तु दोषो
किं वा भवेल्लक्ष्मण तद्विहीने ।
स्वप्नेऽपि रामो गहनेषु सीतां
प्रियां परित्यक्तु महो कथं स्यात् ।।

जगत्समस्तं तमसा निरुद्धां
मे नेत्रयोरस्ति मतिं दधाना ।
भर्त्रा परित्यक्तमृगेक्षणानां
किं दृश्यते लोकमिदं प्रदीप्तम् ।।

इदं त्वदीयं वचनं मदीये
चित्तेऽस्ति वज्राधिकबाधनार्हं ।
तथाऽप्यहं भर्तृवशंचरा स्याम्
किमस्ति तस्मादबला जनानाम् ।।

यदा यथा वा भवतु प्रभूणा
माज्ञा तथा तस्य विधानमेव ।
कान्तागणानामुचितं तु पन्थाः
पतिव्रतानामयमप्रतीकः ।।

बाल्यात्समाराधनमेव तस्य
ब्रध्नान्वयाम्बोनिधिमण्डनस्य ।
श्रीरामचन्द्रस्य ममास्ति मुख्यं
किमेतदर्थान्तरतद्विघातः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिने दिने मे रघुपुंगवस्य
श्रीपादयोर्वन्दनमेव मुख्यम् ।
कथं न्त्विदानीमटवीं प्रविष्टा
निरन्तरं तत्सुखमाव्रजेयम् ॥

नासीद्रघूणां कुलदीपिकायां
ज्वालातिमात्रापि विषप्रभावा ।
न स्यादिदानीं मम वर्तनात्सा
युक्तं भवेत्काननवर्जनम् मे ॥

यदा यदा वाञ्छति जानकीं सः
श्रीरामचन्द्रो नृपवीरमुख्यः ।
तदा तदा ब्रूहि मदीयवार्तां
नागच्छतीति प्रियमप्रियं वा ॥

मया विहीने रघुवीरराज्ये
लभेत्प्रमोदं जनताऽतुलं च ।
मया विहीनं रघुवीरचित्तम्
लभेत्प्रशान्ति सततम् सुखं च ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

का राष्ट्रभाषा ?

रचयिता – ल. म. चक्रदेव, B. A. (Hons); M. Sc; C. I. I. Sc; मुंबई - ४.

न सा रा. भा. भवति बहुभिर् या च भाष्यते ।
या राष्ट्रे परमश्रेष्ठा सा रा. भा. भवितु मर्हति ॥

अन्ये केचन प्रतिपादयन्ति यत् संविधानस्य अष्टमे परिशिष्टे निर्दिष्टाः सर्वाऽपि भाषाः राष्ट्रभाषाः एव किन्तु तद् सर्वथा असत्यम् निराधारम् च; यतः, तस्य परिशिष्टस्य शिरसि तन्नाम लिखितमस्ति केवलम् "भाषाः" इति विना किम् अपि विशेषणम् । यदि किमपि विशेषणम् अध्याहृतम् अस्ति एव इति मन्तव्यम् चेत् तर्हि तत् संदर्भानुसारम्, अधिकाद् अधिकम्, "महत्त्वपूर्णाः" इति एव वक्तुम् शक्यम् न अन्यत् किमपि विशेषणम् ।

अतीव तथ्यं स्पष्टम् अस्ति, यद् अस्माकम् संविधानेन वा लोकसभया वा, अद्यावधि भारतस्य राष्ट्रभाषा नैव निर्णीता । 'भारतम्' अस्मिन् जगत्तले पुराणतमम् राष्ट्रम् । अखिले राष्ट्रे पूर्वतने काले का भाषा प्रयुक्ता आसीत् ? संस्कृतम् । कस्याम् भाषायाम् भारतस्य ९९% ग्रन्थाः रचितास्सन्ति ? संस्कृते । का भाषा भारते सर्वांगपरिपूर्णा तथा च भाषाशास्त्रीय आधारोपरि अधिष्ठिता ? संस्कृतमेव । अतः का भाषा अस्माकम् स्वयंसिद्धा राष्ट्रभाषा ? संस्कृतभाषैव । कस्मात् कारणात् ? सा अस्माकम् राष्ट्रस्य– सत्यतः अखिलस्य जगतः एव परमोत्तमाभाषा ।

तत् सत्यम्, सा सत्या व्याख्या अस्मिन् श्लोके ग्रथिताऽस्ति ।

न सा रा. भा. भवति । बहुभिर्याच भाष्यते ।
या राष्ट्रे परमश्रेष्ठा सा रा. भा. भवितु मर्हति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टमपुण्यतिथिप्रीत्यर्थम्

धिग्दैवसमञ्जसम्

कविः श्री या. वि. देवासकरः, वरपत्तनम्.

अकिञ्चनः सन् प्रमुखः स मन्त्रिणाम् ।
स कोमलाङ्गो दृढनिश्चयी सदा ॥
स वामनो ना, सुमहान्समुच्यते ।
न सन्ति याथार्थ्यविदो हि शास्त्रिणः ॥
सुधन्योऽसि, महामात्य, शास्त्रिन् ! "लालबहादूर" ।
अपूर्वं तव माहात्म्यं, "ताश्कंदे" शान्तिमण्डले ॥
स सुमुख्यप्रधानो नो धैर्यवांश्च सुधीः प्रधीः ।
नीतोऽकाले च कालेन, धिग्दैवसमञ्जसम् ॥

प्रमादीच - दक्षिणायनपरीक्षासु सर्वप्रथमतया उत्तीर्णे

परिचया
वै. राणी, पुदुच्चत्रम्, तंजावूरु

अभिज्ञा
के. यस्. श्रीमती, क्रोंपेट, मद्रास्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र राजसभायां पद्मपादेन बोधितः आचार्यः अमरुकदेहं विहाय चितागतं निजशरीरं प्राविशत् । तावदेव अग्निज्वाला मालाभिः परीतं शरीरं तत्र तत्र दग्धप्राय मासीत् । आचार्यः शंकरः "लक्ष्मीनृसिंह ! मम देहि करावलम्बम्" इति मकुटेन शोभमानैः श्लोकराजैः भगवन्तं लक्ष्मीनृसिंहं प्रसाद्य तत्कृपापरीवाहेण स्वस्थ-देहः चिताविनिर्गतः शिष्यबृन्देन साकं सानन्दं यथापूर्वस्थितिं प्राप ।

१४. भारत्याः शापविमुक्तिः

शंकरः सशिष्यः माहिष्मतीं पुनरागत्य उभयभारतीं विलोक्य "अम्ब ! परकायप्रवेशविद्यया गार्हस्थ्यरहस्यं विदित्वा-ऽगतोऽस्मि । इदऽनीं भवदीयप्रश्नानां समाधानं दातुकामोऽस्मी" त्याह ।

सा सदरहास मब्रवीत्– महात्मन् ! भवदीयं माहात्म्य मविज्ञाय मया प्रश्नाः कृता । भवानपि अविदितरहस्य इव तज्ज्ञानार्थं मवधिं गृहीत्वा गतः; वस्तुतस्तु तदानीमेव भवान् विदितगार्हस्थ्य रहस्यः प्रश्नान् समाधातुं शक्नोति स्म । तथाऽपि अज्ञानवशा-दद्यावधि मदीयवासावधिः दीर्घीकृतः; नोचेत् तदानीमेव मे सत्य-लोकप्राप्ति रभविष्यत्" इति । शंकरः तां प्रणम्य "मातः ! भवतीं तस्मिन्नेव दिने देवीं सरस्वतीमज्ञासिषम् । नो चेत्तादृशं वैदुष्यं अन्येषां कथं सम्भवति ?" इति प्रशशंस ।

मण्डनमिश्रः साश्चर्यं "किं भवती सरस्वती वा ! भवत्याः मदीये गृहे गार्हस्थ्यनिर्वहणावश्यकता कुतः प्राप्ता" इत्यपृच्छत् ।

साऽब्रवीत् "दुर्वासमहर्षिः कदाचित् ब्रह्मणः सभायां साम गायन्नपस्वरं अगासीत् । सामगाने न कश्चिन्मदभ्यधिकः" इति अवलिप्तस्य दुर्वाससः मुखादपस्वरमीरितं किलेति हसितं मया । कुपितः स "भूलोके जन्म लभस्वे"ति मां शशाप । पश्चात्तप्तया मया क्षमापितः स मुनिः शान्तो भूत्वा प्राह– "भूलोके मण्डनमिश्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महापण्डितस्य गृहे सती भविष्यसि। शंकरावतारः शंकरयतिः मण्डनमिश्रं वादे जित्वा तस्मै सन्यासाश्रमं दत्वा शिष्यत्वेन परिग्रहिष्यति। तदा त्वं शापविमुक्ता स्वस्थानं प्राप्स्यसि" इति।

"मण्डनमिश्रस्य गले निक्षिप्ता माला यदा म्लानाऽभवत् तदैव मया सत्यलोकं प्रति प्रस्थातव्यमासीत्। परन्तु, मदीयमेवाज्ञानं तिरोधायकं भूत्वा सत्यलोकान्मां दूरीचकार" इति उभयभारती स्ववृत्तान्तं समापयामास।

मण्डनमिश्रः शंकरं प्रणम्य "महात्मन्! त्वं शिवांशसंभूतोऽसि। अत एव वाणीसाह्येऽपि विजितोऽहं भवता। तथाऽपि नैव चिन्ता। सूर्यतेजसः पुरस्तात् निस्तेजस्कानां चन्द्रादीनां अवमानवार्ता का वा? सन्यासं मे दत्वा भारत्याः शापविमुक्ति अनुगृह्णातु भवान्" इत्याह।

शंकर स्तस्मै सुरेश्वर इति नाम दत्वा शिष्याणां प्रधानं तं पर्यग्रहीत्। भारती पुनः आमन्त्रिता सत्यलोकमगात्।

१५. पद्मपादः – नृसिंहावतारः

अथ शंकरः शिष्यसमेतः दक्षिणापथे श्रीशैलं गतः, तत्रत्यं मल्लिकार्जुनस्वामिनं सेवमानः, तमुद्दिश्य शिवानन्दलहरीनामक स्तोत्रराजं व्यरचयत्। तत्र भ्रमराम्बापीठमपि स्थापयामास।

तत्प्रान्ते कापालिकाः बहवः। ते शैवाः। एकस्मिन् हस्ते कपालं अन्यस्मिन् त्रिशूलं च धरन्ति। ते मद्येन कपालं पूरयित्वा भैरवाय निवेद्य पिबन्ति। ते शंकरेण वादे विजिताः। अतस्ते तं महात्मानं द्विषन्तः कथंचित् मायोपायेन हन्तुमुद्यताः।

कापालिकः कश्चित् सन्यासिरूपेणाऽगत्य शंकरं प्रार्थयामास – "महात्मन्। भवतोऽहं कंचित् वरं वृणे; अवश्यं अनुगृह्णातु भवा"निति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शंकरोऽपि पूर्वापरावनालोच्य "वृणीष्वे" त्याह । कापालिकः– अहं सदेहकैलासं प्राप्तुं भगवन्तं शिवमुद्दिश्य तपोऽतपम् । स साक्षात्कृतः सार्वभौमस्य अथवा सर्वज्ञस्य यतीश्वरस्य शिर आदाय जुहुधि; तेन तेऽभीप्सितं सेत्स्यती" त्याह । सार्वभौमशिरोयाचने स मदीय मेव शिरः छेदयेत् । भवांस्तु देहाभिमानरहितो महनीयः; अतस्त्वच्छिरः प्रार्थये; अनुगृह्णातु" इति ।

शंकरः– (समन्दस्मितं) "तथाऽस्तु । परन्तु इदं कृत्यं यथा मच्छिष्याः न जानीयुः तथा त्वया कर्तव्यम्; नो चेत् ते त्वां हन्युः । अतः निर्जनप्रदेशं गच्छाव" इत्याह ।

कापालिकः तदुक्तरीत्या रहस्यस्थलं तं नीत्वा खड्गेन तच्छिरः खण्डयितु मुद्युक्तः । तस्मिन्नेवसमये पद्मपादः कुतश्चित्तत्रागतः आचार्यस्य सम्भवन्त अपायं विलोक्य स्वेष्टदैवतं नृसिंहस्वामिन सस्मार । तद्देवाविष्टः पद्मपादः उग्रनरसिंहो भूत्वा कापालिक मभिद्रुत्य तत्कुक्षि विपाट्य तमवधीत् ।

अन्येऽपि शिष्याः तत्कोलाहलं श्रुत्वा ससंभ्रमं तत्राऽगताः । शिरोदातुं सन्नद्धः समाधिनिष्ठ शंकरः नेत्रे समुन्मील्य पद्मपादं आविश्य भासमानं नृसिंहस्वामिनं अस्तौषीत् । भगवान् नृसिंहः स्वकीयं उग्ररूपं उपसंजहार । पद्मपादः स्वस्थोऽभवत् ।

पद्मपादः– गुरुवर्य ! तत्रभवान् अस्य दुर्मार्गस्य मायावागुरे कथं वा विलग्नः ? दैवप्रेरणयाऽहमत्रागतः; नो चेत्का वा गति रस्माकमभविष्यत् ?

शंकरः– गतं न चिन्तयेत् । सर्वं दैवप्रेरितमेव । अनया घटनायाऽहं भगवन्तं नृसिंहस्वामिनं साक्षादकार्षम् ।

अन्ये शिष्याः– भद्र ! पद्मपाद ! तव नारसिंहप्रसादः कथमुपलब्धः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्मपादः— आदित एवाऽहं नृसिंहभक्तः। शंकरभगवत्पादानां सन्निधौ आगमनात्पूर्वं अहोबिलशैले नृसिंहस्वामिनमुद्दिश्य तपस्तप्तं मया। अस्मिन् समये कश्चित् किरातबाल प्रायशो मत्सकाशमागत्य— "आर्य! कोऽसि अत्र किं करोषि?" इति पृच्छन्नास्त। तद्वचः कर्णेऽकृत्वा बहुशः "गच्छ-गच्छे"ति हस्तसंज्ञां कुर्वन्नासम्। तथाऽपि स प्रत्यहमागच्छन्नास्त। कदाचित् असहिष्णुतयाऽहं तमेवमवदम्— रे! मूर्ख! बालो बालिशश्चाऽसि। मदीयं तपः अधिकृत्य उक्तेऽपि ते न ज्ञातं भवेत्। अहं स्वामिनं न मृगं न मानुषं साक्षात्कर्तुमिच्छामि। किं स तादृशः कदापि कुत्राप्यस्मिन्नरण्ये त्वया दृष्टः?" इति। सोऽपि बालः हसन् "एतदर्थमेव वा भवता बहु श्रम्यते? यदि प्रथमत एव उक्तं स्यात्तर्हि तं नरसिंहमानीतवान् भवेयम्। स खलु प्रत्यहं मया सह खेलनाय आगच्छति। श्वः तमवश्य मानेष्यामि" इत्युक्त्वा गतः। अहं तु तमुन्मत्तं भावयन् तद्वृत्तान्तं व्यस्मार्षम्। परन्तु स वन्यबालकः परेद्युर्लतया नृसिंहमूर्तिं बद्ध्वाऽऽनीतवान्। संभ्रमाश्चर्यचकितोऽहं स्वामिनं स्तुत्वा "देव देव! ब्रह्मादीनामप्यसुलभस्त्वं कथं अस्य किरातबालस्य वशंवदोऽसि" इत्यपृच्छम्। तदा स्वामी एवं प्राह— "भक्तसुलभोऽहम्; अस्य बालस्य यादृशी भक्तिः न तादृशी सा ब्रह्मादीनामपि" इत्युक्त्वा "पद्मपाद! अगतिकत्वे, आपदि मा मनुस्मर; अवश्यमाविर्भविष्यामि" इति वरमदात्। तस्य स्वामिनः अनुग्रहेणैव अस्मदाचार्याः अस्माकमुपलब्धाः। इति पद्मपादः नृसिंहप्रसादवृत्तान्तं समापयामास।

१६. सीसद्रवपानम्

पद्मपादेन निहतस्य कापालिकस्य कश्चित्सोदर आसीत्। स द्विषन् आचार्यं, जिघांसया वेषान्तरेणागत्य शिष्यान्यतमेन अमायकेन योगानन्दाख्येन मैत्रीं चकार।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षाः

परिचय, अभिज्ञ, विचक्षण, समर्थ, कोविद परीक्षाः मार्चमासे ९, १०, ११ तिथिषु प्रचाल्येरन् ।

परीक्षामन्त्री,

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. *Postal C. T. R. II.*
भान्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.
Licensed to Post without Prepayment. LICENCE No. 57.

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

शब्दं करोति न च मानुषोऽयं
अङ्गानि सन्ति न च प्राणिवर्गः ।
न तैलवर्ती ज्वलति प्रदीपः
एतस्य नाम किमितीति ब्रूथ ॥

(विद्युद्दीपः)

(श्री ति. गो. अनन्तसुब्रह्मण्यम्, तिरुपति.)

Published by Sri N. Ramanatha Aiyer B. A; B. L., Advocate
& Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri K. V. Raghavan,
at Vijaya Press, Chittoor. (A. P.) C. 1500.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरध्वनि - "संस्कृतम्"

वाणीं भजत गैर्वाणीम् !

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आं. प्र.) भारतम्.

संपुटः १२ | 15 th FEBRUARY 1974 | क्रमांकः २



प्रमादोच्च-
मायाङ्कः

शकाब्दा १८९५

मूल्यम्
०-४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूची

१.	प्रामादीचवत्सर मकरसंक्रान्तिः	१
२.	संपादकीयम् (गुजरात् राष्ट्रे कल्लोल.)	२
३.	जनस्य किं किं न करोति कार्षः	४
४.	श्रीलल्तितासुप्रभातस्तोत्रम्	५
५.	उपनिषन्मन्दिरसमावेशः	८
६.	मुकुन्दविलासः	९
७.	गांधीकथा	११
८.	प्रकृतिः प्रियदा	१२
९.	धर्मभीरवः अधर्मभीरवश्च	१३
१०.	हरलीला तारावलिः	१५
११.	रविकुले रामावतारः	१७
१२.	चन्द्रंगतो मानवः	२०
१३.	संस्कृतस्य पाठनशैली संशोधनमपेक्षते	२१
१४.	अश्रुतर्पणम्	२४
१५.	श्रीमध्वनवमी समारोहः	२५
१६.	शोकसभा	२६
१७.	बालसुभाषितानि	२७
१८.	सा देववाक् भारतराष्ट्रभाषा	२८
१९.	श्रीशंकराचार्यः	२९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रमादीचवत्सर मकरसंक्रान्तिः

रचयिता– शिरोमणिः श्री के. मुनिरेड्डिः, चित्तूरु.

सङ्क्रान्तिरागता विक्रान्तिशोभिता ।
आक्रान्तनक्रराशिभानुनाऽभिशोभिता ।। ।। संक्रान्ति ।।

पुष्यमासि च बहुळपक्षके ।
पुण्येऽपि सप्तमीतिथौ हि पूज्यहस्तसंयुता ।। ।। संक्रान्ति ।।

इन्दुवासरे जनवृन्दवन्दिता ।
मन्दभाग्यमानसस्थ मन्ददीप्तिरंजिता ।। ।। संक्रान्ति ।।

व्रीहिशोभिता बहुव्रीहिसंयुता ।
अन्यबिषयमुख्यबहुव्रीहिर्वर्जिता ।। ।। संक्रान्ति ।।

मानवालिषु मान्यवर्जिता ।
मानसाब्जस्थगितदुरभिमानवर्जिता ।। ।। संक्रान्ति ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिः ओम्

सम्पादकीयम्

गुजरात् राष्ट्रे कल्लोलः

गुजरात् राष्ट्रे प्रजाः विपनीः अवस्कन्द्य तत्रत्य पण्यपदार्थान् अचोरयन् । तत्रस्थितानां सामान्यप्रजानां मनसि भयान्दोलने एकस्मिन्नेव समये मिलित्वा हृदयफलकानि व्यदारयताम् । एतादृश्याः स्थितेः के वा कारणभूताः किं वा कारणम् इति विमर्शने कृते, एते कारणभूताः इदं कारणं भवतीति प्रतिपक्षवादस्य अवकाशं विना सिद्धान्तरीत्या वक्तुं न कोऽपि विषयः लभ्यते । किंतु एतत्सर्वं कलिकालमाहात्म्यम् इति एकं वचनं उक्त्वा तूष्णीं भवन्ति केचित् जनाः । अन्ये तु नित्यावसरवस्तूनां अधिकमूल्यात् सामान्यजनानां क्रयशक्तेः अभावात् जनानीकः क्षुधापीडितः सन् एवमकरोदिति वदन्ति । अन्यराष्ट्रेष्वपि एतादृशी स्थितिरेव वर्तते । तत्र एतादृशं दौर्जन्यकाण्डं नास्ति किल ! तथा सति गुजरात् राष्ट्रे केवलम् एतादृशी परिस्थितिः गर्हणीया भवतीति वदन्ति । एवं परस्परविरुद्धवादप्रतिवादाः कर्तुं शक्यन्ते अस्मिन् विषये । किंतु शान्तिधर्माणां आलवालभूते अन्यदेशानां आदर्शभूते अस्मिन् देशे एतादृशी शोचनीया परिस्थितिः आगता किलेति वयं लज्जां अनुभवितुं अर्हाः भवामः ।

तस्मात् वयं भारतीयाः प्रजाप्रभुत्वे विद्यमानाः आत्मपरीक्षां कृत्वा सावधानतया व्यवहरेम यदि तदा देशे एतादृशी हीना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लज्जावहा परिस्थितिः न जायेत । कीदृशी आत्मपरीक्षा इति चेत् वयं अधिकस्वार्थपरत्वं त्यक्त्वा परेषामपि कष्टानि मनसि चिन्त-यित्वा कार्याणि आचरेम चेत् तदा देशे शान्तिः भवति । तत्कथम् इति चेत् अधोनिर्दिष्टः विषयः दृष्टान्तः भवितुमर्हति । वणिजः यदि अधिकस्वार्थबुद्ध्या अधिकलाभार्जनपराः भवेयुः तदैव इतरेषां आपणवस्तुतण्डुलतिन्त्रिणीफलादि साधारणवस्तूपयोगिनां जनानां अधिकनष्टः संजायेत । तदा जनाः क्रयशक्तिविहीनाः एतादृश-दौर्जन्यमाचरन्ति । तस्मात् वस्तुविक्रेतृभिः अधिकलाभार्जनं परि-त्याज्यम् । तद्वत् अधिकलाभार्जनपरत्वेन वस्तुगोपनमपि न कार्यम् । बहिरंगत्वेन, स्थितानां वस्तूनां अपि विक्रयः कार्यः । प्रभुत्वं वर्तते किल यः एतादृश दोषी भवति तं दण्डयितुं इति वक्तुं न शक्यते । प्रजाप्रभुत्वे सर्वेपि जनाः अविनीतिं अक्रमं निरोधयितुं शक्ताः भवन्ति, अल्पसंख्याकाः प्रभुत्वाधिकारिणः प्रजासहकारं विना अक्रमं निरोद्धुं शक्ताः न भवेयुः । ततः भारतीयाः सर्वेऽपि सर्व-भारतसोदराणां क्षेमाय सौख्याय आनन्दाय च प्रभुत्वाधिकारिणां अक्रमनिरोधविषये साह्यमाचरेयु रिति काङ्क्षामः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनस्य किं किं न करोति कार्षः

ले. श्री वैद्य रामस्वरूपशास्त्री, संपादकः, बालसंस्कृतम्, बम्बई-८६.

व्यायामपुष्टो दृढदेहयष्टिः ललाटकेशे श्रमवारिजुष्टः ।
उद्योगयोगार्जितजीवनोऽसौ कृषीवलः श्रामिकवर्गश्रेष्ठः ।।

स्कन्धे समादाय हलं कृषाणः केदारकं याति युवा वृषाभ्याम् ।
सर्वं दिनं कर्षति वन्यभागं बीजाज सज्जीकुरुते च भूमिम् ।।

यामे द्वितीये कृषकस्य भार्या गोधूमरोटिं 'विधिना' विधाय ।
घटयां च तक्रं ह्यमलं जलं च उपैति चादाय पतिं स्वगेहात् ।।

क्षेत्रस्य मध्ये वटवृक्षकुक्षौ प्रविश्य कार्षः स्वदते सुखेन ।
पुनश्च भार्यासहितः स भूमौ करोति कार्यं समया वृषाभ्याम् ।।

घासं निराकृत्य ददाति नीरं स्वीयां स भूमिं सरसां चिकीर्षुः ।
उदञ्चयन्त्रेण पुनश्च खाद्यं बीजानि भूयो वपते कृषाणः ।।

स एष वातातपवर्षशीतं क्षेत्रेषु सोढ्वा कुरुते स्वकार्यम् ।
सस्यानि चोत्पाद्य करोति धान्यं जीवन्ति लोका अशनेन यस्य ।।

व्रजेषु गाः पालयते कृषाणः स दोग्धि प्रातः समये च दुग्धम् ।
ततश्च गव्य भवति प्रभूतं गव्येन जीवन्ति जनाः सुदीर्घम् ।।

कर्पासमुत्पाद्य करोति तूलं तूलेन सूत्राणि ततश्च वस्त्रम् ।
अन्यानि चेष्टानि विधाय दत्वा परोपकारं कुरुते कृषाणः ।।

ददाति योऽन्नानि सदा जनेभ्य उत्पाद्य शाकानि फलानि चापि ।
वस्तूनि दुग्धानि घृतानि वस्त्रं जनस्य किं किं न करोति कार्षः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चदशाक्षरीकलितं

श्रीललितासुप्रभातस्तोत्रम्

रचयिता– विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

कल्याणीं कमलासनादिविनुतां एकाररूपां शिवाम् ।
ईशित्वादि सुसिद्धिदाञ्च ललितां ह्रीं हस्तिकुम्भस्तनीम् ॥
सर्वज्ञां करुणालयां हरिनुतां लास्यप्रियां ह्रीं निधिम् ।
साध्वीं कामितदां कलां लयकरीं ह्रींकाररूपां भजे ॥

ललिताम्ब महादेवि लावण्यरसवाहिनि ।
उत्तिष्ठ लोकजननि त्रैलोक्यं मंगलं कुरु ॥

उत्तिष्ठ मंगलापांगे हरिब्रह्मादि वन्दिते ।
उत्तिष्ठ देवदेवेशि जगन्मंगलमातनु ॥

कल्यं विभाति पुरतः कमनीयरूपम्
काष्ठारुणा वहति गंधवहश्च मन्दम् ।
कंजान्यहो विकसितान्यलयो नदन्ति
मातर्महेशि ललिते तव सुप्रभातम् ॥

कल्याणि कंजनयने कलिदोषदूरे
कर्मादिसाक्षिणि कलावति कल्मषघ्नि ।
कल्याणशैलनिलये कमनीयकाये
मातर्महेशि ललिते तव सुप्रभातम् ॥

एकाररूपलसिते भवरोगवैद्ये
एकाग्रचित्तनुतभक्त महाधिहंत्रि ।
एलासुगंधिचिकुरे शरदिन्दुवक्त्रे
मातर्महेशि ललिते तव सुप्रभातम् ॥

2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईशादि देवि जगदीश्वरि सुप्रतिष्ठे
ईषस्मिताननयुते गिरिराजकन्ये ।
ईशांकवासनिरते जननादिदूरे
मातर्महेशि ललिते तव सुप्रभातम् ।।

लावण्यपूर्णवदने ललनास्वरूपे
लम्बोदराम्ब परमेशि लकाररूपे ।
लीलाविनोदधृतविग्रहराशिशोभे
मातर्महेशि ललिते तव सुप्रभातम् ।।

ह्रींकाररूपिणि हयास्यनुतांघ्रिपद्मे
ह्रींकारबीजनिलये हरिमुख्यसेव्ये ।
ह्रींकारवाच्यविभवे भवचित्तरम्ये
मातर्महेशि ललिते तव सुप्रभातम् ।।

हस्तीन्द्रकुंभकुचकांत शरीरशोभे
हर्यक्षवाहनवरे हलधृत्सुपूज्ये ।
हत्यादिपापशमनीश्वरि हादिवंद्ये
मातर्महेशि ललिते तव सुप्रभातम् ।।

सर्वारुणे सकलहंत्रि सरोजनेत्रे
सर्वेशि सर्वसुखदात्रि सकाररूपे ।
सर्वात्मिके सकलदुःखविनाशशीले
मातर्महेशि ललिते तव सुप्रभातम् ।।

कस्तूरिकातिलकशोभितफालदेशे
कल्पद्रुमोपमभुजे करुणाकटाक्षे ।
काम्यार्थदाननिरते करभोरुदेवि
मातर्महेशि ललिते तव सुप्रभातम् ।।

हय्यंगवीनहृदये हरिणांकफाले
हर्षप्रदे हरिसहोदरि हारभूषे ।
हुंकारसंहृतसुरारिकुले कलाढ्ये
मातर्महेशि ललिते तव सुप्रभातम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लावण्यशालिनि लयादि निदानभूते
लाक्षारसोपमशरीरसुवर्णशोभे ।
लभ्येतरे जननि लब्धरसे गुहाम्ब
मातर्महेशि ललिते तव सुप्रभातम् ॥

ह्लींकारपंजरबिलासि शुकस्वरूपे
ह्लींकारकाननिवासमृगे भवानि ।
ह्लींकारभास्कररुचे भवतापहंत्रि
मातर्महेशि ललिते तव सुप्रभातम् ॥

सर्वामरार्चितपदे सनकादि वंद्ये
सर्वप्रपंचरचनाचतुरे सुसाध्वि ।
स्तोत्रप्रिये समरसे श्रुतिसामलोले
मातर्महेशि ललिते तव सुप्रभातम् ॥

कामेशि मानससुखैकनिदानभूते
श्रीकामकोटिनिलये कविकाव्यलोले ।
कामेश्वराङ्कनिलये कनकोज्ज्वलांगे
मातर्महेशि ललिते तव सुप्रभातम् ॥

लब्धाकृते लयकरीश्वरि लब्धभोगे
लीलाविनोदिनि तलोदरि लास्यतुष्टे ।
लोलाक्षियुग्मलसिते रविकोटिभासे
मातर्महेशिललिते तव सुप्रभातम् ॥

ह्लींकारवक्त्रकमले वरगानलोले
ह्लींकारमूर्तिविभवे परमाणुरूपे ।
ह्लींकारमंत्रमहिते हिमशैलजाते
मातर्महेशिललिते तव सुप्रभातम् ॥

मंगलं मंगलापांगे ध्यायतां कामधेनवे ।
भक्तालिकल्पतरवे ललिते तव मंगलम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनिषन्मन्दिरसमावेशः

३-१-७४ दिने सायं ६-३० घण्टासमये डा. ईश्वरसीतारामधन्वन्तिरीणां आध्यक्ष्ये उपनिषन्मन्दिरकार्यवर्गसमावेशः प्रचलितः ।

श्री वेल्लंकि वेङ्कटरमणरायः सभां प्रारेभे । चित्तूरुसंस्कृतभाषाप्रचारिणीसभासंस्थापकस्य श्री ति. कं. तिरुवेङ्कटाचार्यमहोदयस्य निर्याणं उद्दिश्य इयं संसद् आत्मनः प्रगाढसन्तापं न्यवेदयत् ।

श्रीमान् आ. लक्ष्मीनारायणाचार्यः कीर्तिशेषाणां तिरुवेङ्कटाचार्याणां संस्कृतभाषाप्रचाराय कृतबहुविधसेवाः प्रशशंस । श्रीमती तिम्मराजु हैमवती संस्कृतभाषाप्रचारिणीसभाया संस्कृतपरीक्षासु उत्तीर्णेभ्यः विद्यार्थिभ्यः योग्यतापत्रप्रदानसमये संस्कृतभाषापठनावश्यकतां प्रति विपुलतया उवाच । सभाध्यक्षः उपनिषन्मन्दिराभ्युदयं प्रति सायंसमये संस्कृतकक्ष्या प्रारंभावश्यकतां प्रति विपुलीचकार । परमहंसपरिव्राजकाचार्य त्रिदण्डि श्री श्रीरामानुजजीयर् स्वामिनः संस्कृतभाषाभ्यसनावश्यकतामुद्दिश्योपन्यस्य विद्यार्थिनीभ्यः विद्यार्थिभ्यश्च मंगलाशासनमकुर्वन् । सभान्ते मन्दिरकार्यदर्शी श्रीमान् नारायणाचार्यः आगतेभ्यः धन्यवादसमर्पणमकरोत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुकुन्दविलासः

श्री कुण्टिमद्दि शेषशर्मा, अनन्तपुरम्.

(पूर्वानुबन्ध)

सुतं प्रेतं भक्त्याऽऽनयत किल सान्दीपनि गुरोः
बहोः कालात्पश्चादनुगुणवयोरूपललितम् ।
अपूर्वं योऽकार्षीद्गुरुचरणसंभावनमिदं
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

गुणानाकर्ण्य स्वाल्लँलितमधुरान्भीष्मकसुतां
निरस्यापि व्रीडां द्विजवरमुखप्रेषितगिरम् ।
हठात्तद्बन्धूना[1] मनिमिषदृशां योऽहरदम्
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

सुभद्रा प्रेमाणं सुरपति सुतैकान्तविषयं
स्वयं जानन्माया यतिमतनुताखण्डलसुतम् ।
निगूहं स्तालाङ्कात्परिणयमतानीद्य उभयो
र्मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

वनाऽऽवासाय स्तानशितनिध्रसान्पाण्डुतनयान्
सपत्नीकान् शिष्याऽयुतयुतमुनेस्त्रातुमपि तत् ।
युतास्सिक्थेनाशो मुनिचयमपि प्रीणदपि यः
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

इति प्रौढमुकुन्दविलासः ।

---

[1] अनादरे षष्ठी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ दूतमुकुन्दविलासः ।

वहन् लोकान्सर्वान् जठरकुहरान्तः क्वचिदपि
स्वयं कर्ता, हर्ता, स्वयमवति यः, कौरवकुलम् ।
ययौ दौत्यं कर्तुं द्रुपदतनया पाण्डवकृते
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

जगज्जालोत्पत्तिस्थितिलयविधानव्यसनिनं
विमूढा मन्वाना बत मनुजसामान्य इति यम् ।
मुधाऽकार्षुर्यत्नं कुरुपतिसुता बन्धनविधौ
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

अनन्तादित्याभं मिहिरमिहिकारश्मिनयनं
तपस्तेजोभिर्योनिखिलभुवनव्याप्तमतुलम् ।
स्वकं रूपं दृष्टेर्विषयमकरोदन्धनृपतेः
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

सुरुच्यं सुश्लाघ्यं सुनृपजनभोग्यं च निवसं
समृद्धं कौरव्यैर्विरचितमनर्घं परिहरन् ।
अगृह्णाद्यो भुक्तिं विदुरनिलये भक्तिभरितां
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

स्वयं भूमीभारापनयनकृते प्रादुरभवत्
य आबाल्याद्दैत्यप्रकृतिकजनव्राजमवधीत् ।
न हत्वाऽक्षौहिण्यो विरमति स सप्तैकादशकथां ?
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

अहं त्वेकत्रैकोऽकरधृतशरोऽन्यत्रकृतिनां
समूहो योद्धॄणां, कतरमपि वां, को नु वृणुते ?
विभज्यैवं, काणं तनय मकरोदन्धनृपतेः
मुकुन्दो दद्यान्नस्स्वपदयुगळी भक्तिमतुलाम् ॥

इति दूतमुकुन्दविलासः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar (अनुवर्तते)

Digitized by Arya Samaj Foundation Chennai and eGangotri

गांधीकथा

विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्.

विदेशीयानामांग्लानां शासनं विरुध्यात्र भारते महात्मनः गान्धीमहोदयस्य नेतृत्वे, तत्प्रचालिता बहवस्सत्याग्रहाः आन्दोलन-रूपाः प्राचलन् । तेषु प्रधानतमः क्रिस्तवीय १९३० तमे वर्षे प्रचलितः लवणसत्याग्रहः । अस्य प्रभावेन शासका आंग्लाः दिङ्मूढा स्वातन्त्र्यप्रदाने परस्परं पूर्वसमालोचनां कर्तुं, लण्डन्महानगरे एकां विराट्सभामायोजयामासुर्यस्याभिधानमासीत् "रौण्ड्टेबल कान्फ-रेन्स" इति । तत्र मिलितुं सर्वा अपि संस्थाः प्रधानाः भारतीयाः स्वीयान् प्रतिनिधीन् प्रेषितवत्य आसन् । भारतीयकांग्रेसमहा-संस्थातः सभां गतेषु महात्मा प्रधान आसीत् ।

दिने चैकस्मिन् महात्मा कस्यचिद्गृहस्थस्याह्वानेन तदतिथि-रभूत् । माध्यन्दिनस्य भोजनस्य व्यवस्था तेनैवातिथेयेन कृता । गांधीमहाशयस्य भोजने 'मधु' एकं नियतमाहार वस्त्वासीत् । आतिथेयानां कथं वाऽस्य ज्ञानं भवेत्? अत एव तादृशासु अवस्थासु मधुन आनयनस्य उत्तरदायित्वं 'मीरा' भगिन्याः उपरि पतति स्म ।

भोजनवेलाऽऽगता तदा तस्याः निजापराधः ज्ञातः । सा तु मधुकाचकूपीं गृहीत्वाऽऽगन्तुं विस्मृताऽऽसीद्दृष्टचा । सहसा मूल्यं दत्वा निकटस्थेनापणेन मधुनः व्यवस्थामकरोत् ।

भोजनसमये महात्मनः दृष्टिः तन्मधुपात्रस्योपरि न्यपतत् । "नायं नियता काचकूपी" इति मीराभगिनीं दृष्ट्वा वदन् सः । "आम, तां तु गृहे विस्मृताऽभवम् । अतएव नूतनाम् आपणेन ...." इति सा वास्तविकीं दशां विशदयामास । "यदि भोजनेऽद्य माक्षिकं नाभविष्यत् तर्हि नाहं अभरिष्यत्" । वयं तावज्जनतानायकाः । प्रजानां द्रव्येण जीवामः । कदापि तादृशेषु धनेषु तिरस्कारः कर्तव्यः । तत्र मितव्ययतादृष्टि रावश्यिका । इति 'मीरां' जागृतां चकार महात्मा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृतिः प्रियदा

ले. "राधा" (सूरम् श्रीनिवासः) नेल्लूरु.

सदा मुदाऽदानविधानबोधा व्यथाकथाऽगाध प्रथासुमेधा ।
सुधीजनाराधितधीर्विनोदा रसाधिरूपा प्रकृतिस्तनोतु ।।

झलंझलन्नूपुरशब्दभाजिनी क्वणत्क्वणद्भूषणहस्तराजिनी ।
चकच्चकद्धात्सविशेषभासिनी यथा सती तद्वदियं विभाति ।।

लोकैकविख्यातलतान्तसेव्या लतान्तस्रंसन्मकरन्दभाव्या ।
मरन्दमन्दानिलसेव्यदिव्या तनोतु प्रीतिं प्रकृतिर्मनोज्ञा ।।

श्वेतांशुभास्वद्गिरिमल्लिका च परागधावल्यविसार्यनन्ता ।
शरन्मृगाङ्कस्य कलाप्रसन्ना ज्योत्स्ना दिवा भाति वसन्तशोभा ।।

निरन्तरावेदनबाधितानां मनांसि सा पल्लवितानि चक्रे ।
तन्त्रीविहीनायतवीणिकायां तन्त्र्यश्च सा पल्लविताश्चकार ।।

अहो नु शृण्वन्तु समुद्रघोषां युगान्तकालप्रमथाधिपस्य ।
ढंकाध्वनिं तर्तुमहर्निशं या कुतूहला तां विधिवन्मनोज्ञां ।।

तुष्टन्तु तत्सागरवीचिकानां मनोहराणामपि दर्शनेन ।
यदा प्रयत्नं कुरुतेऽवगन्तुं गाधां तदा प्राणविमुक्तिरेत्या ।।

दृषत् दृषत् भग्नसुलग्नवेणी लसत् झरी भ्राजितनिर्झरौघः ।
नभोच्छपाथोनिधिसेवितश्च मनोहरम् भाति प्रकृतिस्वरूपम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनीलमेघमालिकाविलासलास्यभासिनी
चलाचलत्तटिद्विहत्प्रसन्नदीप्तिशोभिनी ।
प्रमोदमोददायकप्रथाविशेषदर्शिनी
समस्तजीवमौलिका प्रशस्तकीर्तिराजिता ॥

प्रिया च मे गुरुश्च मे सदोपदेशदायिनी
धनं च मे सुखं च मे सदा सुखाधिकारिणी ।
तनुश्च मे मनश्च मे दिगन्तलिप्तभायुता
तनोतु मोदरेखकान् विनोदयन् समस्तकान् ॥

अतीव दूरादिव दृश्यमानाः स्निग्धत्वमायान्ति महीधरा ये ।
त एव बाधाकलितान्तरंगान् प्रमोदभाज्यानिव नन्दयन्ति ॥

धर्मभीरवः अधर्मभीरवश्च

श्री आर्. गोपालन्, चित्तूरु.

वेदविहितकार्यानुष्टानम् धर्मः । वेदनिषिद्धकार्याचरणमधर्मः । केचन मानवाः वेदविहितकार्याचरणतत्पराः वर्तन्ते । तद्विधाः सज्जना इत्यभिधीयन्ते । इतरे अधर्ममार्गावलम्बिनः लोकनिन्दामधिगच्छन्ति । धर्मपरायणाः सज्जनाः अधर्ममार्गं दृष्ट्वा बिभ्यति । अधर्ममार्गानुवर्तिनः पुनः धर्मभीरवः वर्तन्ते अधर्मभीरवः पुण्यकर्माणो भूत्वा इहपरसुखाधिकारिणः सौभाग्यसन्ततिं अधिगच्छन्ति । धर्मभीरवः निकृष्टकर्माणः लोकगर्हितास्सन्तः रौरवादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नरकेषु निपतन्ति। सर्वेऽपि जनाः सुखहेतुक भोगनिरता अपि दुःखहेतुक पापवर्त्मानुसृत्य अतीव खेदमनुभवन्ति। सुखार्थिनो जनाः कुतः दुःखहेतुककर्माणि कुर्वन्ति इति प्रश्ने कृते अधोनिर्दिष्टाः विषयाः अस्माकं बुद्धिगोचरा भवन्ति। आत्मनिग्रहवन्त एव धर्ममार्गं मधिगन्तुं योग्याः वर्तन्ते। इन्द्रियनिग्रहं विना आत्मनिग्रहो न साध्यः। इन्द्रियनिग्रहः पुनः क्लेशजनको वर्तते। क्लेशजनकेन्द्रियनिग्रहः पुनः शाश्वतानन्दजनको वर्तते क्लेशभीरवः दुःखपरंपरां अनुभवन्ति। नश्वरैहिक भोगकाङ्क्षिणः क्षणिकसुखायानन्तामुष्मिकसौख्यं परित्यज्य पतिताः भवन्ति। सुखाद्युद्यमाः दुःखान्ताः दुःखाद्युद्यमाः सुखान्ताश्च वर्तन्ते खलु। त्यागे नैकेनामृतत्वमश्नुते इत्येतन्महावाक्यं ऐहिकभोगत्यागेनामुष्मिकमोक्षसुखसंप्राप्ति द्योतयति। निरुद्योगिनो अलसा एव धर्मं दृष्ट्वा भीता भवन्ति। उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः इति श्रूयते खलु। क्लिष्टो भवत्युद्योगः। तथापि स उद्योगः निरन्तरसुखाय वर्तते। विद्यार्जनं क्लेशसाध्यं भवति। क्रीडाविलासाः पुनः मुदावहा वर्तन्ते। तेषां परिणामः विपर्ययफलदायिनो भवन्ति। धर्मभीरवः खलाः नरकं यान्ति। अधर्मभीरवः त्यागिनः निरन्तरमोक्षपदमधिगच्छन्ति। सुखेच्छा सर्वेषामपि वर्तत एव। धर्ममार्गं सुखमूलो भवति। अधर्ममार्गः पुनः उभयत्रापि दुःखमेव संजनयति। लोके सुखकाङ्क्षिणः अधर्ममार्गमवलम्ब्य दुःखं लभन्ते। तपस्स्वाध्यायनिरताः सज्जनाः अमृतत्वमधिगच्छन्ति। धर्ममूलकाः संपदः अधर्ममूलकाः विपदः इति यदावगाहन्ते जनाः तदाते धर्ममार्गानुगाः निरतिशयानन्दमनुभवन्ति। धर्मो रक्षति रक्षितः। धर्मसंस्थापनाय भगवान् युगे युगे संभवति। धर्मं शरणं गच्छामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरलीला तारावलिः

स्फूर्तिश्रीः

अगपुत्रीमनःपात्रम् राजराजेश्वरं हरम् ।
यः कृतात्मा प्रकृत्यात्मा तं वन्देऽहमहर्निशम् ।।

मूर्ध्नि चन्द्रकलां धृत्वा यो दश दिक्षु राजते ।
ओंकार सदृशाकारः तं वन्देऽहमहर्निशम् ।।

परिष्वज्य सदा वाचमर्थ इवावभासते ।
अर्धनारीश्वरो देवः तं वन्देऽहमहर्निशम् ।।

अष्टाङ्गो वा निराकारः साजिनो वा दिगम्बरः ।
यो मे प्राप्योऽपि न प्राप्यः त वन्देऽहमहर्निशम् ।।

कामकामोऽपि निष्कामो निरीश्वरोऽप्यधीश्वरः ।
सदाशिवोऽपि यो रुद्रः तं वन्देऽहमहर्निशम् ।।

रौप्यपर्वतत्रासो वा वासो वा भक्तमानसे ।
अत्यन्तं रोचते यस्मै तं वन्देऽहमहर्निशम् ।।

गङ्गां मूर्ध्नि गळे सर्पं सर्वाङ्गे भस्मलेपनम् ।
विधत्ते यः परिष्कारे तं वन्देऽहमहर्निशम् ।।

सन्ध्याकाले समाविष्टे सदसि राजताचले ।
शक्तिं समेत्य नृत्यन्तं तं वन्देऽहमहर्निशम् ।।

लोकसंहारकं योऽभूत् पिबन् पिबन् हलाहलम् ।
सुधाभुजाम् सदाधारः तं वन्देऽहमहर्निशम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाहि मां पाहि मां शंभो इत्येवं वदतां सतां ।
कृपा यस्य प्रपाभूता तं वन्देऽहमहर्निशम् ।।

प्रसरति समं यस्य कीटे मृगे सरीसृपे ।
आरण्यकेऽपि कारुण्यं तं वन्देऽहमहर्निशम् ।।

ताडितो यस्य चापेन तस्मायैव शुभंकरं ।
शरश्रेष्ठं प्रयच्छन्तं तं वन्देऽहमहर्निशम् ।।

कमपि रक्षितुं बालं यो यमं वारयन् स्वयं ।
कालकाल इति ख्यातः तं वन्देऽहमहर्निशम् ।।

दारुकावनसञ्चारे ऋषिवाटीषु यत्कृतम् ।
विचित्रं तस्य कर्तारं तं वन्देऽहमहर्निशम् ।।

स्वयं प्रेमस्वरूपोऽपि यस्मिन् तपो विशिष्यते ।
प्रेमस्फीतं तप क्रीतं तं वन्देऽहमहर्निशम् ।।

आसंसारं समावृत्य चेतस्यपि प्रदीप्यते ।
शंकरो नाम यो दीपः तं वन्देऽहमहर्निशम् ।।

कोऽपि भवतु सर्वज्ञः किं मनागपि तेन मे ।
यश्चिरान् मम चित्तेशः तं वन्देऽहमहर्निशम् ।।

येन नश्यन्नवाप्नोति नामरूपात्मकं जगत् ।
पुनर्नवं मनोज्ञत्वं तं वन्देऽहमहर्निशम् ।।

अपि राजन्यमूर्धन्यः शाकिनी डाकिनी प्रियः ।
वैरूप्यं यस्य वैशिष्टचं तं वन्देऽहमहर्निशम् ।।

यस्यान्तरे द्विधावृत्तिः नैसर्गिकीव दृश्यते ।
किं त्वद्वयी जगत्राणे तं वन्देऽहमहर्निशम् ।।

यो भर्ता सर्वभूतानां कर्ता च जगतां त्रयम् ।
सर्वपापेभ्य उद्धर्ता तं वन्देऽहमहर्निशम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धनुर्मेरू रथो धात्री यस्य त्रिपुरवैरिणः ।
साक्षान्नारायणो बाणः तं वन्देऽहमहर्निशम् ।।

आलिङ्गन्त्याः पराशक्त्याः स्तनावारुह्य भासते ।
भूतिर्यस्य जयेनेव तं वन्देहमहर्निशम् ।।

पित्रालिङ्गनभोगं वा मातृस्तन्यमहासुखम् ।
यः कदापि न जानाति तं वन्देऽहमहर्निशम् ।।

गौरीहृदयपीयूषः आनन्दकलशार्णवः ।
यो मुक्तिपदपर्यायः तं वन्देऽहमहर्निशम् ।।

चन्द्रापीडं नभश्चूडं गङ्गाधरं तमोहरम् ।
लोकाधारं मनश्चोरं तं वन्देऽहमहर्निशम् ।।

यस्याविकल वात्सल्यात् स्वलीलेव प्रकाशताम् ।
तारावलिरियं कण्ठे तं वन्देऽहमहर्निशम् ।।

रविकुले – रामावतारः

श्री दर्भा चलमय्यशास्त्री, भाषाप्रवीणः, पेद्दापुरम्.

यः पृथ्वीभरवारणाय दिविजैः सम्प्रार्थितः चिन्मयः,
सञ्जातः पृथिवीतले रविकुले माया मनुष्योऽव्ययः,
निश्चक्रं हतराक्षसः पुनरगात् ब्रह्मत्वमाद्यं स्थिराम्,
कीर्ति पापहरां विधाय जगतां तं जानकीशं भजे ।।

भूमण्डले पुरा भवन्ति बहवः जनाः, कार्यकर्तारश्च, रजोगुणप्रधानाः, तमोगुणप्रधानाश्च, न तु सत्वगुणप्रधानाः । ते सर्वे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलहन्ति परस्परं, पीडयन्ति विप्रान्, साधूंश्च । सर्वे भवन्ति पापसमाचराः, द्रोहपरायणाश्च । केचित् गोहत्यनिरताः भ्रूणहत्यापरायणाः च भवन्ति । केचिदपहरन्ति परदारान्, परधनान्, परक्षेत्रांश्च । केचिद्विक्रयन्ति अन्नं, देवताप्रसादं, दैवदर्शनं च । का:चित् ब्राह्मणेतरान् ब्राह्मणवनिताः परिणयन्ति । केचित् स्त्रीपुरुषाः वर्णमतविवक्षां विस्मृत्य यथेच्छं विहरन्ति, परिणयन्ति च । केचिद्भवन्ति परवञ्चनतत्पराः स्वकुक्षिभरणाय । यथा प्रबलजन्तवः क्षुद्रजन्तून् जले भक्षयन्ति तथैव प्रबलाः दुर्बलान् मर्त्यान् भक्षयन्ति । केचिद्भवन्ति देवताद्रोहिणः. स्वर्णस्तेयपरायणाश्च । केचित पीत्वा सुरामाकण्ठं, कृत्वा च मांसादिभक्षणं, विहाय च लज्जां, वीथ्यासु, आपणेषु, भुवि च कुल्यासु चापि पतित्वा लुण्ठन्ति । किं बहुना ? जगत्सर्वं कालुष्यकार्पण्याकारुण्यद्वेष वैषम्य क्रोधविरोधविषादाशान्तित्वादिभिः पूरितं सत् वचसामविषयं द्रौस्थ्यं अभजत । रजस्तमोगुणप्रधानाः मानवाः सर्वे बहूनि राक्षसकृत्यानि अवर्णनीयान्यनिर्वचनीयानि च कुर्वंति स्म ।

तादृशानां पापात्मनां राक्षसानां भारमसहमाना भूदेवी एकदा सम्यक् समालोच्य, धृत्वा गोरूपं, जगाम च ब्रह्मलोकं देवगणैस्सह, मनिजनैस्साकं । तत्र तैः इंद्रादिदेवैः भूभारहरणाय सम्प्रार्थितो ब्रह्मा तैस्सह क्षीरसागरतीरं गत्वा सर्वज्ञमीशं, क्षीरसागरे शेषशायिनं विष्णुं पुराणोक्तैः स्तोत्रैः उपनिषद्वाक्यैश्च सम्यगस्तौषीत् ।

तदा स्फुरतसहस्रांशुसहस्रसदृशप्रभवः किरीटहारकेयूरमण्डलः, श्रीवत्सकौस्तुभप्रभान्वितः शङ्खचक्रगदापद्मवनमालाविराजितः, चतुर्भुज श्रीमहाविष्णुः आविर्भूय ब्रह्माणमेवमवोचत्– "हे ब्रह्मन् ! अहं किं कुर्याम् ?" इति । ततः ब्रह्मा भूदेव्याः दुःखं सर्वं व्यजिज्ञपत् । तदा चिन्मयस्वरूपः विष्णु कालान्तरे भूमण्डले रवि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुले अवतरिष्यामीत्युक्त्वा अन्तरधात् । ततः ब्रह्मापि 'तत्सहायार्थं यूयं सर्वे देवाः वानरा भूत्वा भूलोके अवतरन्तु' इति तान्प्रत्युक्त्वा भूदेवीं समाश्वास्य चान्तर्दधे ।

एवं किञ्चित् कालो गतः । ततः देवास्सर्वे वानररूपधारिणस्सन्तः भगवन्तं निरीक्षन्ति स्म । ततः सूर्यवंशीयाः राजानः धर्मनिरताः परिपालनादक्षाश्च भवन्ति । ते त्यागाय सम्भृतार्थाः, न तु दुर्व्ययाय । ते सत्याय मितभाषिण, न तु प्राभवाय । ते यशसे विजगीषवः, न तु अर्थसङ्ग्रहाय । ते प्रजायै गृहमेथिनः, न तु कामप्रवृत्तये । अपि च ते आजन्मशुद्धाः, प्रारब्धान्तगामिनः, सार्वभौमाः, इन्द्रसहकारिणः, यथाविधि हुताग्नयः, यथाकामार्चितार्थिनः, यथापराधदण्डा, यथाकालप्रबोधिनः, शैशवे अभ्यस्तविद्याः, यौवने विषयैषिणः, वार्धके मुनिवृत्तयश्च भवन्ति । एवंविध सकलविशिष्टलक्षणलक्षितानाम् राज्ञाम् कुले रविकुले श्रीमहाविष्णुः दशरथस्य पुत्रत्वेन रामरूपेण अवततार । अत एव श्रीमहाविष्णोः "रविकुले अवतरिष्यामि" इत्यस्मिन्वाक्ये विशेषोऽस्तीति निर्विवादांशः । स एव रामः दुर्नीतिपरान् राक्षसान् हत्वा पापहरां कीर्तिं विधाय ब्रह्मत्वमगमत् ।

सः श्रीरामः अवताररूपो श्रीमहाविष्णुरेव न तु सामान्यः पुरुषः । अत एव अद्यापि सर्वे जनाः अवताररूपिणं तं भजन्ते । रामनामसङ्कीर्तनं सकलपापहरं भवति । त्यागराजरामदासादिमहाभक्तश्रेष्ठाः रामनामसङ्कीर्तनं कृत्वा विष्णुलोक प्राप्ताः अभवन्निति श्रूयते । अज्ञा पुरुषाः रामो न देवः इति वदन्ति तच्चिन्त्यम् । "कलौ स्मरणान्मुक्तिः" इति वाक्यानुसारेण रामस्मरणादेव सर्वेषां मुक्तिर्भवति इत्यत्र न तु लेशमात्रोऽपि सन्देहः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चन्द्रंगतो मानवः

रचयिता– विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

'यूयस्ये'जनितो नवीनसरणिं विज्ञानलोके गतः
नौकान्तामपलोऽभिधामुपगतो यात्रां निजां यात्रिकः ।
कुर्वन्साहसतोऽध्वगानथबहून् कृच्छ्रांश्च निस्तारयन्
गत्वाकाशभुवं हि कौतुककरं चन्द्रं गतो मानवः ॥

अङ्कं केपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च सञ्जगदिरे भूच्छायमैच्छन्परे ।
केचित्पर्वतसङ्कुलंत्विति नवाः विज्ञा वदन्त्यन्वहम्
यस्यान्तर्गतकालिमानमथ तं चन्द्रंगतो मानवः ॥

ज्योत्स्ना सातु दरिद्रगेहवलयं वित्तेशसौध्रं तथा
नित्यं शोभयतीह चन्द्रजनिता भेदो न सेवाकृतः ।
लोकेत्वद्य विराजते प्रतिजनं सेवाप्रभेदः पुनः
हाधिक्कोपि न चन्द्रिकागुणगतः चन्द्रंगतो मानवः ॥

पित्राज्ञापरिपालकश्च सततं सद्धर्मनिष्ठश्चयः
भ्रातृप्रेमयुतश्शरण्यजनता संरक्षको योन्वहम् ।
नित्यं सज्जनताश्रयस्तु बहुधा सत्यव्रतस्तं पुनः
लोके कोपि निजैर्गुणैर्नरधुराट् चन्द्रंगतो मानवः ॥

क्षीरोदार्णवसम्भवोऽत्रिमुनिना जातोऽनसूयोदरात्
यस्तारापतिरीरितो बुधपिता पीयूषदाता दिवि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्ले वृद्धियुतस्तथासितदिने क्षीणो भवत्ये वयः
तं तिग्मांशुकरैस्सुपालितमहो चन्द्रंगतो मानवः ।।

गीतापाठबलेन तत्र वसतिं लब्धांस्तु किं दृष्टवान्
तारां तस्य सतीं बुधञ्च तनयं वा तत्र किं दृष्टवान् ।
किं वा तत्र सुधापिपासकलितान् बृन्दारकान्दृष्टवान्
व्योम्नोमार्गमधिश्रितस्सपदि तं चन्द्रंगतो मानवः ।।

"सम्बोध्यः किल मातुलै"ति सततं यो बालवृन्दैर्मुदा
चोरैर्वाह्यभिसारिकाभिरथ वा प्रोच्यस्सपत्नेति यः ।
'रम्जाने' किल मुस्लिमैरविरतं दृश्यथा भक्त्यादृतः
किन्दृष्टः किल तत्र शीतवलये चन्द्रंगतो मानवः ।।

संस्कृतस्य पाठनशैली संशोधनमपेक्षते

संपादकः, बालसंस्कृतम्, बम्बई – ७७.

ज्ञानमिह जनकं प्रवृत्तीनाम् । ज्ञानं विना जडमूकान्धबधिरा इव न कोऽपि किमपि ज्ञातुं वक्तुं द्रष्टुं श्रोतुं च समर्थ इति सृष्टेः समनन्तरमेव विधात्रा ज्ञाननिधीनां वेदानामाविर्भावो लक्षितः स्यात् । वेदा हि ज्ञानमात्रस्य जन्मयोनयः । प्राग् वेदेभ्यो ज्ञात्वैव जनाः कार्येषु प्रावर्तन्त इत्यनुमानसिद्धम् ।

'न भाषां विना कस्यापि मनःख्यापनं सम्भवम्' इति प्रारम्भे वैदिकं संस्कृतमेव भवेत् जनानां विचाराभिधायकं द्वारम् । ततश्च संस्कारमवाप्य संस्कृतं इति व्याहृतिं लोके लभते इति प्रसिद्धिम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनन्तरं चाऽध्ययनाध्यापनप्रकारसुविधायै कर्त्तव्याकर्त्तव्य-ज्ञानाय च व्याकरणादीनि मन्वादीनि च शास्त्राणि निर्माणमवाप्नुवन् । इत्थं च संस्कृतं प्राग् जनानां प्रथमं प्राचीनतमं व्याहृतम् इति सिद्धयति ।

सृष्टेः प्रारम्भाद् अद्य यावद् येषां ज्ञानानां विज्ञानानां विधीनां विधानानाम्, यासां च विद्यानां कलानां निपुणतानां चाविष्काराः अभवन्, ते सर्वे एव भारतीयैः मुनिभिः संस्कृते एव लिखिताः प्रकाशिताश्चासन् । सुतरामवर्धन्त संस्कृतस्य ज्ञानकोषा, तेऽधुनापि नित्यं वर्धन्ते, वर्धिष्यन्ते च पुनरपि । अपरिमेया वर्तते खलु संस्कृतवाङ्मयस्य शब्दराशिः । संस्कृतस्य महद्भ्यः कोषेभ्यः अन्याः सर्वाः अपि भाषाः, गंगायाः कुल्या इव जन्म लेभिरे । सर्वासां व्याहृतानां मूलं संस्कृतम् । ताभ्यः संस्कृतजाताभ्यः भाषाभ्यः संस्कृतं यदि निःशेषं निःसारितं भवेत्, तदा न तत्र किमप्यवशिष्यते इति जानन्त्येव विद्वांसः । संस्कृतं जनकं जीवनं चाखिलस्य भाषाजातस्य । ज्ञाते संस्कृते सर्वा भाषाः सर्वं साहित्यं च सुलभं जायते । ज्ञाते संस्कृते सर्वाणि ज्ञानानि अपावृतद्वाराणि संजायन्ते विद्यार्थिनाम् । संस्कृतं खलु ज्ञानहस्तिनो महान् पादः । अस्मिन् मज्जति सर्वम् । 'सर्वं पादं हस्तिपादे निमग्नम्' इति लोकश्रुतेः ।

संस्कृतं हीक्षुकाण्डम् । इक्षुकाण्डात् जातेन रसेन यथा गुडं फाण्टं शर्करा च जायते, ततश्च विविधानि मृष्टान्नानि व्यञ्जनानि च संजायन्ते, तथैव संस्कृतादपि विविधरसं विश्वसाहित्यं संजायते । संस्कृतं हि मूलं विश्वजनीनस्य वाङ्मयवृक्षस्य । मूलस्य सेचनेन पत्राणि पुष्पाणि फलानि संभवन्तीति सर्वोऽपि जानाति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिलेऽपि जगति वर्तते संस्कृतस्यादरातिशयम् । इङ्ग्लैण्डामेरिकाजर्मनीप्रभृतिषु दूरदेशेष्वपि जनैः संस्कृतमधीयते । तत्रत्येषु महाविद्यालयेषु पाठ्यत्वेन वर्तते संस्कृतम् । ते संस्कृतं लिखन्ति भाषान्तेऽन्विष्यन्ति च ? मन्दा भारतीयास्तु परकीयं तुच्छं साहित्यं सेवमानाः संस्कृतं कामदुघां धेनुं परित्यज्य बर्करीं दुहन्ति परप्रत्ययनेयबुद्धयः ।

संस्कृते यथा विविधस्य साहित्यस्य आढ्यता वर्तते, तथैव धार्मिकसाहित्यस्यापि वर्तते तत्र प्राचुर्यम् । राज्यमिदानीन्तनं वर्तते धर्मनिरपेक्षम्, मनुते च संस्कृतं धर्मभाषाम्, न तद्धर्मरक्षामाकांक्षते इति न तत् संस्कृतप्रचाराय ध्यानं ददाति । न तद्धर्मस्य संस्कृतस्य चापि गुणान् जानाति । 'धर्मो रक्षति रक्षितः' इति शास्त्रनिरूपितं न जातु जानाति तद् ।

यस्येह धर्म एव न भवेत्, कस्तद् रक्षेत् अधार्मिकं राज्यम्? न कोऽपि साम्प्रतं वर्तते भारतीयस्य राज्यस्य समर्थो रक्षकः । रक्षाया अभावेन वर्ततेऽधुना देशे बहुत्राराजकत्वम् । अन्नं जलं वस्त्रं च सज्जनानां कृते सुलभं नास्ति । लुण्टाकाः मोदन्ते । संस्कृतज्ञानशून्या अधार्मिकाः सन्ति लोकाः राज्यासनेषु । परिणामे पापिनो दुःखमेव लप्स्यन्ते इति सर्वकारः शृणुयात् ।

इदानीन्तनेषु विद्यालयेषु दीयमानायां शिक्षायां भारतीयसंस्कृतेः स्पर्शोऽपि न भवति, ज्ञानस्य गन्धोऽपि तत्र नास्तीति ज्ञानसम्पादनाय संस्कृतमस्माभिः सम्यक पठितव्यमिति दिक् ।

स्वतन्त्रे भारतेऽस्माकं संस्कृतं स्थानमर्हति ।
पठनं पाठनं चास्य संशोधनमपेक्षते ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्रुतर्पणम्

श्री के. सि. सुब्बय्य, कडप.

महदिदं खेदस्य स्थानम् यत् श्रीश्रीश्री त्रिवेङ्गलमहोदयानां परमपदप्रस्थानम्। सन्तुनाम लोके शतथा सहस्रथा विपश्चिदः विदुषां लोके आचार्यमहोदयानाम् स्थानम् प्रातिस्विकम्। अलङ्कारशास्त्रे तथा अन्यत्र च विशिष्टं वैदुष्यम् संपादितवंतः आचार्याः। आन्ध्रविद्यार्थिनां कृते विजयनिश्रेणि व्याख्यानदानेन बहवः छात्राः तासु तासु परीक्षासु कृतिन समभवन्। आचार्यपादानां गमनेन गीर्वाणलता शुष्कीभूता इति निश्चप्रच ब्रूमः वयं सर्वेऽपि। अकारि आचार्यपादैः विसृमरः प्रचारः गैर्वाण्याः वाण्याः कृते।

वयं अनुमिनुमः कथं वा देववाण्याः उद्धरणम् इतःपरं भवेदिति। परन्तु सुक्षिताः सुताः शिष्याश्च संति आचार्याणाम्। ते संस्कृतभाषाप्रचारभारं स्कन्धाभ्याम् सोढुं शक्ताः इति।

अस्मिन् देहलीनगरे विद्यामानाः सर्वे विद्वांसः वयं तमेव श्रीपदपुरिनिवासिनं श्रीवेङ्कटेश्वरं ध्यायामः, यत् आचार्याणाम् आत्यन्तिकम् सुखं वैकुण्ठे भूयादिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमध्वनवमी समारोहः

चित्तूरुमण्डले पलमनेरु उपमण्डले बेलूपल्लिनामके अग्रहारे ग्रामे मध्वयुवजनसंघाध्यक्ष्येण मध्वनवमी समारोहः १-२-७४ शुक्रवासरे माघशुद्धनवम्यां सम्पन्नः ।

प्रातः श्रीमध्वाचार्य चित्रापटालंकरण - पूजाविधानपुरस्सरः ग्रामोत्सवः प्रवर्तितः । श्रीआञ्जनेयस्वामिनः श्रीसत्यनारायण-स्वामिनश्च आभिषेचनिकाद्यर्चाविधिः स्थानिक देवालयार्चकैः सम्पादितः । तम्बेहल्लि श्रीमाधवतीर्थसंस्थानाधीशाः श्रीसत्य-माधवतीर्थपादाः भगवदाराधनाविशेषविधि विधाय भक्तेभ्यः तीर्थाक्षतादि प्रसादविनियोग मकार्षुः ।

प्रातरारभ्य सुप्रभातं, ग्रामोत्सवः, अभिषेकपूजादिकं ब्राह्मण-सन्तर्पणं उपन्यासाः सायं दीपाराधनं, भजनगोष्ठी, हरिकथाकाल-क्षेपः इत्येवमादि कार्यक्रमेण श्रीमन्मध्वनवमी उत्सवसमारोहः प्रवर्तितः ।

Andhra Pradesh Sahitya Akademi,
Kala Bhavan.
Saifabad, Hyderabad-500004. 9-2-1974.

The General Council, Andhra Pradesh Sahitya Akademi learnt with great sorrow the sad demise of Sri T. K. Tiruvengadacharyulu, a Sanskrit scholar and ex-Secretary of your institution and adopted the following condolence resolution touching the same, all members standing for two minutes as a mark of regard for the departed.

"The General Council, Andhra Pradesh Sahitya Akademi places on record its profound grief at the sad demise of Sri T. K. Tiruvengadacharyulu, a Sanskrit Scholar, who represented the Samskrita Bhasha Pracharini Sabha on the General Council of the Akademi for more than a decade."

"May his soul rest in peace at the lotus feet of the Lord of the Seven Hills."

Secretary,
Andhra Pradesh Sahitya Akademi.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-राष्ट्रभाषा-समितिः, **वाराणसी,**
मुकुटेश्वरमन्दिरम्, २२-१-१९७४.

शोकसभा

२१–१–७४ दिनाङ्के सायं द्विवादनतः श्रीमुकुटेश्वरमन्दिरे श्रीमाधवचैतन्यभारतीस्वामिनामध्यक्षतायां काशी संस्कृतराष्ट्रभाषासमिति सदस्यगणद्वारा स्वर्गीय श्रीतिरुवेङ्कटाचार्याणामाकस्मिकनिधनमुद्दिश्य शोकसभा प्रवर्तिता। तत्र सदस्यगणभाषणानन्तरमध्यक्षमहोदयैरित्थमभिहितम्। पत्रवाहकाव्यवस्थया १४-१२-७३ दिनाङ्के जातं श्रीमदाचार्यवर्याणां निधनमत्रातिविलम्बेन गैर्वाणीद्वारा ज्ञातम्। साम्प्रतं खलु संस्कृतभाषाप्रचारकाः तत्रापि संस्कृतराष्ट्रभाषावादिनश्चतिविरलाः सन्ति। तत्रेमे अग्रेसराः प्रमुखाश्चासन्। एतत्संस्थापिता संस्कृतभाषाप्रचारिणी सभा विख्याप्ता जाता। गैर्वाणी पत्रिकाऽपि १२ वर्षाभ्यन्तरे सुस्थिरता प्राप्ता।

इदानीमेतेषां तिरोभावेन संस्कृतप्रचारस्य तदतिरिक्तकार्यजातस्य च महती हानिर्जाता। एतेषां सौजन्यं चित्तसारल्यं निष्कापट्यं परोपकारित्वं चानन्यसदृशमासीत्। एषा चाकस्मिकनिधनवार्ताऽस्माकं मनस्यशनिपात इव जाता। सर्वान्तर्यामी परमेश्वरस्तेषामात्मशान्ति जनयत्विति वयं सर्वदा प्रार्थयामः।

इत्थम्,
कृष्णानन्दब्रह्मचारी,
मन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालसुभाषितानि

स्थानस्य महत्वं –

राजा कुलवधूर्विप्रा मन्त्रिणः च पयोधराः ।
स्थानभ्रष्टा न शोभन्ते दन्ताः केशाः नखा नराः ॥

सत्सङ्गः –

साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः ।
कालेन फलते तीर्थं सद्यः साधुसमागमः ॥

दुर्जनसंगः –

अहो दुर्जनसंगेन मानहानिः पदे पदे ।
पादको लोहसंगेन मुद्गरैरभिहन्यते ॥

स्नेहः –

सखि साहजिकं प्रेम दूरादपि विराजते ।
चकोरी नयनद्वन्द्व मानन्दयति चन्द्रमाः ॥

सुमित्रं –

शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥

दुष्टमित्रम् –

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियभाषिणम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥

सुपुत्रः –

को धन्यो बहुभिः पुत्रैः कुशूलापूरणाढकैः ।
वरमेकः कुलालम्बी यत्र विश्रूयते पिता ॥

कुपुत्रः –

किं तया क्रियते धेन्वा या न सूते न दुग्धधा ।
कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा देववाक् भारतराष्ट्रभाषा

विद्यानिधिः श्री वे. मोरेश्वर ग. उपाध्यायः, ज्योतिषी अरगे.
(कारवार)

सुधन्य धन्या खलु देवभाषा या जन्मदा लोकगिरां पृथिव्याम् ।
आध्यात्मिकं भौतिक दैविकं च सा देववाक् भारतराष्ट्रभाषा ॥

अनन्यसाधारणमस्ति यस्याः साहित्यशास्त्रं नितरां समृद्धम् ।
यच्छब्दशास्त्रं भुवनेऽद्वितीयम् सा देववाक् भारतराष्ट्रभाषा ॥

समस्तवेदोपनिषद्वराणाम् आरण्यकानामपि ब्राह्मणानाम् ।
शास्त्रागमाद्याः खलु देववाण्याम् सा देववाक् भारतराष्ट्रभाषा ॥

अहर्निशं या सुरसेव्यमाना शब्दार्थमाधुर्यगुणाकरत्वम् ।
प्राच्यप्रतीच्योभयसूरिमान्या सा देववाक् भारतराष्ट्रभाषा ॥

सर्वेषु देशेषु च सार्वकालम् समानरूपा सुरवाक्किलैका ।
वाल्मीकिव्यासादिभिः संश्रिता या सा देववाक् भारतराष्ट्रभाषा ॥

या सर्वलोकैर्जननीव मान्या ज्ञानामृताब्धि हृदि धारयन्ती ।
संसेवनीया खलु पंडितैस्तु सा देववाक् भारतराष्ट्रभाषा ॥

देशे पवित्रे किल भारतेऽस्मिन् भवेच्चिरस्थाऽमरमातृभाषा ।
इत्थं स्वप्राबल्य सुसाहसेन कर्तुं सहायेन समुत्सुकानाम् ॥

देवभाषा वेदभाषा लोकभाषा पुरातनी ।
अमरा निर्जरा भाषा दिव्यभाषा हि संस्कृतम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकदाऽचार्यं योगसमाधिनिमग्नं प्रशंसन् कापालिकमित्रमित्थमाह– "मित्र ! दृष्टं किल ! कियदल्पेन कालेन अस्मद्गुरुवर्याः बाह्यप्रपञ्च विस्मृत्य ध्याननिमग्नाः !" इति ।

कापालिकः– योगानन्द ! आचार्या इयन्मात्रेण बाह्यस्मृतिं त्यक्तुं शक्ताः कथमिति कारणं चिन्तितं वा त्वया ? अहं ब्रवीमि, श्रृणु तावत् । आचार्याः प्रत्यहं भैरवप्रसादं सेवन्ते; तदेव कारणमत्र ।

योगानन्दः– भैरवप्रसादो वा ? स कः कीदृशो वा न मया ज्ञायते । कदाप्याचार्यैः स प्रसादो न दत्तो नः । "अहं दास्यामि, आयाहि" इति ब्रुवन् कापालिकः तममायकं स्वगृहं नीत्वा मद्यं पुरो निधाय "अयमेव भैरवप्रसादः, सेव्यतां, क्षणमात्रेण बाह्यस्मृतिं विहाय आचार्यवत् योगसमाधिं गमिष्यसि" इत्याह ।

योगानन्दः विश्वस्य सुरां पीत्वा विसंज्ञो भूमौ निपपात । मदमूर्छाविमुक्तः उत्थाय "अयमेव गुरुणा साधितः योगसमाधिः स्या"दिति तृप्तोऽभूत् । कापालिकः प्रत्यहं योगानन्दं स्वगृहं नीत्वा सुरापानं कारयन्नासीत् ।

कदाचित पद्मपादः योगानन्दं सन्दिहानः तमन्तिकमेहीत्याहूय "किमरे ! कोऽयं दुर्गन्धः ? मद्यं पिबसि किम् ? तव बुद्धिभ्रंशः कथमेव जातः ?" इति गर्हयामास ।

योगानन्दः– सौम्य ! भैरवप्रसादस्वीकारे बुद्धिभ्रंशः कथं भवेत् ? तथा सति आचार्यपादाः किमर्थमिदं सेवन्ते ? योगसमाधिसाधनाय इतोऽन्यः कश्चित् पन्था नैवेति किलोच्यते !

पद्मपादः– "किमरे ! मूर्ख ! किं ब्रूषे ? आचार्यः सुरां पिबति वा ? तवेदृशी बुद्धिः पापीयसी कथमरे जाता" इति दण्डमुद्यम्य वत्सं तरसा ताडयितुं प्रवृत्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन्नेव समये तत्रागताः आचार्याः "किमेतत् पद्मपाद ! कुतस्ताडयितुमिमं प्रवृत्तोऽसि" इत्यपृच्छत् । पद्मपादः योगानन्दस्य अपराधं व्यजिज्ञपत् । योगानन्दः रुदन्नाह– "स्वामिन् ! नाहं कमप्यपराधमकरवम् । योगसमाधिसिषाधयिषया भवदीय मार्ग-मेव अनुसरामि" इति ।

पद्मपादः कुपितस्सन् "किमरे जाल्म ! पुनरपि तथैव भषसि" मदमत्तः प्रलपसि" इति तं दण्डयितु मुद्युक्तः । आचार्यः तं निवार्य योगानन्दं आत्मना सह क्वचिन्निनाय ।

किं भविष्यतीति कुतूहलेन पद्मपादादयः शिष्याः त मनु-जग्मुः । आचार्यः इतस्ततो गत्वा गत्वा, अन्ततो गत्वा, कस्य-चिल्लोहकारस्य तापनस्थाने तस्थौ । तत्र तपन्तं सीसद्रव गृहीत्वा साश्चर्यं पश्यतां शिष्याणां समेषां, शकराचार्यः शीतलपानीयवत् तदर्धं गुळुग्गुळुरिति पीत्वा योगानन्दमुद्दिश्य अवशिष्टार्धं त्वमपि पिबेत्याह ।

योगानन्दः संभ्रमाश्चर्यचकितस्सन् एव मचिन्तयत्– "स्वय-मपश्यन् अनालोच्य परोक्तं यथार्थं मत्वा आचार्यापचारं अकरवम् । क्वथितं सीसद्रवं आचार्येण पीयमानं स्वयं प्रत्यक्षं पश्यन्नपि न विश्वसितुं शक्नोमि ! किमयं स्वप्नः उत ऐन्द्रजालिकम् ! इति ।

आचार्यः सस्मित "योगानन्द ! शान्त चेत् सीसं घनी भवि-ष्यति; पानयोग्यं च न भविष्यति; अतस्त्वरस्वे" त्याह ।

योगानन्दः ससाध्वसं "स्वामिन् ! मद्यं पातुं प्राभवम् । किन्तु सीसद्रवं उपगन्तुमपि न शक्नोमि । भवद्भिः मद्यपानं कृतमिति विश्वास एव मां तथा कारयामास । क्षम्यता मयं जन" इत्या-चार्यचरणयोः न्यपतत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करुणान्तरङ्गो गुरुवर्यः त मुत्थाप्य "वत्स! मया कृतमिति मत्वा सर्वं त्वं मा कुरु; मयोक्तं तु सर्वं यथोक्तं कुरु। तेन त्वं कृतार्थो भविष्यसि" इत्याह।

अत्रेदं स्मर्तव्यम्– "दृष्टो धर्मव्यतिक्रमः; साहसं च महताम्; अवरदौर्बल्यात्" इति।

१७. हस्तामलकः

शंकर स्ततः प्रस्थितः बहूनां पुण्यक्षेत्राणां दर्शनानन्तरं मूकाम्बिका क्षेत्रं प्राप। तां देवीं सेवितुं गतस्य आचार्यस्य आलयद्वारसमीपे आर्तनादः कश्चिद्दयनीयः श्रुतिपथं गतः। तत्र वृद्धदम्पती स्वकीयस्य (एकमात्र) एकैकपुत्रस्य शवं पुरो निधाय देवी मुद्दिश्य– "अम्ब! आवयोः पारलौकिकक्रियाः निर्वर्तयितु मधिकारसम्पन्नः अय मस्मदीयः कुमारः अकालमृत्युं गतः। पुनरुज्जीवन मस्य प्रदेहि मातस्सदय"मिति सकरुणं आक्रोशन्तौ रुदन्तौ चास्ताम्।

शंकरस्य तदानीं स्वमातुस्स्मृतिर्जाता। सोऽचिन्तयत्– "मज्जनन्यपि खलु मां विहातुं असमर्था एवं बाधमानाऽभूत्" इति। तयोः वृद्धदम्पत्योः दीनदशां निशाम्य दयमानमनाः शंकरः तत्पुत्रं पुनरुज्जीवयेति मूकाम्बां प्रार्थयामास। स युवा सुप्तप्रबुद्ध इव पुनरुज्जीवितः सन्नुत्थितः। तत्पितरौ परमानन्दभरितौ शंकराचार्यस्य चरणयोः पतित्वा अस्तौष्टाम्।

शंकरः मूकाम्बाक्षेत्रात् श्रीबलिनामकाग्रहारं गतः। ततः पूर्वमेव तस्य कीर्तिर्यतस्तत्र तत्र व्याप्ता तत एव हेतोः तत्रत्यः प्रभाकरनामा पण्डितः तदागमनं श्रुत्वा स्वकीयं त्रयोदशवर्षदेशीयं पुत्रं आनाय्य आचार्यस्य चरणयोः पातयामास।

शंकरः– आर्य! को भवान्? किमर्थं बालोऽयमानीतः?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभाकरः– आर्य ! अहमस्मि भट्टपादस्य शिष्याणा मन्यतमः, मण्डनमिश्रस्य सहचरः प्रभाकरनामा । अहमपि मण्डनमिश्र इव कर्मिष्ठो भूत्वा बहून् यज्ञादीन् अतनुवम् । सर्वाः सम्पदः प्राप्ताः । बहोः कालादपूर्वोऽयं कुमारो जातः; परन्तु नाऽयं केनापि भाषते; जड इव मूक इव ग्रहग्रस्त इव चास्ति । पूर्वकर्मफलमिति मन्ये । महानुभावो भवान् असमानुषमहिमातिशयशोभित इति अश्रौषम् । भवदीयकृपाकटाक्षेण अस्य जाड्यं दूरीभवेदिति मत्वाऽमुं बालक मानीतवानस्मि ।

"अर्भक ! कोऽसि ? जडवद्वर्तसे कुतः ?" इति पृच्छति शंकराचार्ये, जन्मतः आरभ्य एतत्क्षणपर्यन्तं वाग्व्यापारानभिज्ञः स बालः श्रोतृनाश्चर्यचकितान्कारयन् "नाऽहं जडोऽस्मि । सर्वान्तर्यामि परं ब्रह्माऽहमस्मि" इति तत्त्वप्रबोधकान् द्वादशश्लोकराजानाशुधारया पपाठ ।

शंकरः प्रभाकरमाह– "पण्डितोत्तम ! नाऽयं तव पुत्रः; तव पुत्रस्तु द्वितीयस्मिन्नब्दे एव नदीजले निमग्नो मृतश्च" इति ।

प्रभाकरः– न मृतः स्वामिन् । मृत्योर्मुखाद्विनिर्गत इति ब्रुवन्त्या मे पत्न्या अश्रौषम् ।

शंकरः– तद्यायाथ्यं भवतो भार्याऽपि न जानाति । सा किल अस्य द्वितीयास्मिन्नब्दे स्नातुं यमुनां गता । तत्तीरे कश्चिद्यतिः तपश्चरन्नास्त । सा तं यतीन्द्रं "स्वामिन् ! यावदहं स्नात्वा पुनरायास्यामि तावदयमर्भकः संरक्ष्यताम्" इति प्रार्थ्य बालं तत्सन्निधौ निधाय स्नानावतारप्रदेशं गता । ध्यानमग्नो यतिस्तं बालं न सावधानं पश्यति स्म । सोऽपि बालः शनैः शनैः जानुभ्यां गच्छन् अन्ते नद्यां पपात ममार च । विगतासुं बालं उत्सङ्गे निधाय नव भार्यामुनिपुङ्गवगतेन विस्रम्भेणाहं वंचिताऽस्मि किलेति उच्चै राक्रोशन्ती रुरोद ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

FORM IV

(See Rule 8)

Place of publication	Samskritha Bhasha Pracharini Sabha, Chittoor 517001
Periodicity of its publication	Monthly
Printer's Name	T. K. Thiruvengadacharyulu
Whether citizen of India	Yes
It Foreigner, State the country of origin	——
Address	Vijaya Press, Chittoor 517001
Publisher's Name	N. Ramanatha Aiyar B A B L
Whether citizen of India	Yes
If Foreigner, State the country of origin	——
Address	N. Ramanatha Aiyar BABL 17—4—7, Sundara Iyer St., Chittoor 517001
Editor's Name	M. Varadarajam Panthulu
Whether citizen of India	Yes
If foreigner, State the country of origin	——
Address	C/o Vijaya Press, Janda Street, Chittoor 517001
Names and addresses of individuals who own the news paper and partners or Shareholders holding more than one per cent of total capital.	Samskritha Bhasha Pracharini Sabha, Chittoor 517001

I, Ramanatha Aiyar hereby declare that the particulars given above are true to the best of my knowledge and belief.

Chittoor, **(Sd.) N. Ramanatha Aiyar, B.A.B.L.**

31—1—74. *Signature of publisher.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. *Postal C. T. R. 11.*

आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.

Licensed to Post without Prepayment. LICENCE No. 57.

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

पाणौ मुरारेः निवसामि नित्यम्
नित्यं च देशस्य ध्वजे लसामि ।
यन्त्राणि तन्त्राणि ममैव गत्या
चलन्ति सर्वाणि किमस्मि गोलम् ॥

(चक्रम्)

Published by Sri N. Ramanatha Aiyer B. A; B. L., Advocate
& Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri K. V. Raghavan,
at Vijaya Press, Chittoor (A. P.) C. 1500.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

गुरुकुल कांगड़ी विश्वविद्यालय हरद्वार
Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरध्वनिः – "संस्कृतम्"

वाणीं भजत गैर्वाणीम्!

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आं. प्र.) भारतम्.

संपुटः १२ | 15 th MAY 1974 | क्रमांकः ५

च...
...नि... ...ासकविताप्रसङ्गः



श्री एस्. रामस्वामीशास्त्री अध्यक्षः,
श्री दिवाकर्ल वेङ्कटावधानी शाकुन्तलं प्रति भाषते।

आनन्द-
वैशाखांकः

शकाब्दा १८९६

मूल्यम्
०-४० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूची

१.	दैवी वाक्	१
२.	संपादकीयम् (प्रजासौकर्यं प्राधान्येन द्रष्टव्यम्)	२
३.	वसन्तविपिनम्	४
४.	महाश्वेतायाः वृत्तान्तः	५
५.	आनन्दवत्सरस्य प्रस्तावः	९
६.	आनन्दो ब्रह्म	१२
७.	उत्तमे शिखरे जाते	१३
८.	बालसुभाषितानि	१४
९.	मुकुन्दविलासः	१५
१०.	श्रीसिंहाचलक्षेत्रमाहात्म्यम्	१७
११.	मनोरंजनम्	१९
१२.	श्रीतिरुवेंगडाचार्य अस्तमय मुद्दिश्य सन्तापः	२०
१३.	अभिनन्दनपत्रम्	२१
१४.	श्रीवेंकटेशस्तोत्रमाला	२३
१५.	अस्मत्प्रधानमन्त्री	२५
१६.	ग्रामजीवनम्	२६
१७.	विज्ञानवर्धिनीपरिषद्, बोब्बिलि	२७
१८.	संस्कृतस्य अधिकतरव्याप्तेः उपायः	२८
१९.	श्रीशंकराचार्यः	—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवी वाचम् ... संस्कृत भाषा प्रचारिणी सभा

दैवी वाक्

हरिः ओं अग्निमीळे पुरोहितं यज्ञस्य देव मृत्विजं ।

होतारं रत्न धातमं ।

अर्थः– यज्ञस्य पुरोहितं = यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयति तथाऽग्निरपि यज्ञस्य अपेक्षितं होमं संपादयति; तादृशं देवं = दानादिगुणयुक्तं, होतारं ऋत्विजं = देवानां यज्ञेषु होतृनामकः ऋत्विक् अग्निरेव "अग्नि र्वै देवानां होता" इति श्रुतेः । रत्नधातमं = यागफलरूपाणां रत्नानां अतिशयेन धारयितारं पोषयितारं वा अग्निं ईळे = स्तौमि (अहं होतेति शेषः) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिः ओम्

सम्पादकीयम्

प्रजासौकर्यम् प्राधान्येन द्रष्टव्यम्

अस्माकं देशः भारतदेशः । अस्मिन् भारतदेशे प्रवर्तमानं प्रभुत्वम् प्रजाप्रभुत्वम् । प्रजाप्रभुत्वं नाम प्रजाभिः प्रजाभ्यः प्रजासौकर्यार्थम् प्रचाल्यमानं प्रभुत्वमेव भवति । तथासति प्रजाः परस्परविरुद्धभावयुक्ताः स्वार्थपराः भवेयुर्यदि तदा प्रजाप्रभुत्वम् केवलं नाममात्रावशिष्टमेव भवेत् किं च प्रजासु सौहार्दं सौजन्यं विनश्य जनाः परस्परपीडनपराः भवेयुः । तदा देशस्य अरिष्टमेव संजायेत प्रजाक्षेमश्च नष्टो भवेत् । अस्मद्देशे कृषिकाः कार्मिकाः वणिजः प्रभुत्वकार्मिकाः प्रभुत्वोद्योगिनः पालकाः सर्वेऽपि प्रजा एव खलु । एवं विद्यमाने सति प्रजाः विद्युक्तधर्मान् परित्यज्य स्वार्थपराः भवेयुश्चेत् महान् विपत्तिः देशस्य संभवेत् । कृषिकाः कृषिं विहाय अलसाः भवेयुः यदि आहारधान्यस्य लोपो भवेत् । समग्राहाराभावे प्रजाः क्षुधिताः अकार्याणि कुर्युः । कार्मिकाः स्वार्थपराः स्वकर्म सम्यक् न कुर्युः यदि देशे उत्पत्तिः नश्यति तदा मुख्याभिलषितवस्तूनां अलाभेन देशे कल्लोलः संजायते । उत्पन्नवस्तूनां इतरत्र प्रेषणाय आवश्यकवस्तूनां अन्यप्रदेशेभ्यः आनयनाय च यानसौकर्यं प्रजानामत्यंतावश्यकं भवेत् । यानसौकर्यं विना अद्य नागरिकप्रपंचे न किमपि कार्यं प्रचलति । तथासति अधुना भारत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशे धूमशकटकार्मिककार्यस्तंभनं वर्तते। एतेन कारणेन अन्यप्रदेशात् प्रतिगन्तुं वस्तूनां प्रेषणाय च प्रजानां महान् अन्तरायो वर्तते। एवं धूमशकटकार्मिककार्यस्तम्भनं अनुवृत्तं चेत् अनुवर्तितं च भवति देशस्य महान् नष्टः प्रजानां विपत्तिश्च भवेत्। अधुना धूमशकटकार्मिकाः वेतनाधिक्याय विवादं कुर्वन्ति कार्यस्तम्भनं च कुर्वन्ति। अस्मिन्काले रूप्यकमूल्यह्रासेन वेतनं पर्याप्तं न भवति तत्सत्यमेव। देशे अन्यप्रभुत्वशाखासु च उद्योगिनः वर्तन्ते। तेषां वेतनापेक्षया धूमशकटकार्मिकानां वेतनं अधिकमेव भवति। तेषां परिस्थितिः कीदृशी भवतीति विचार्यमाणे अवश्यं तेषां स्थितिः विचारणीयैव भवति। तस्मात् सर्वेषामपि वेतनौन्नत्यकार्यं प्रभुत्वेन अवश्यकर्तव्यं भवति। तर्हि सर्वेषां प्रभुत्वोद्योगिनां वेतनाधिक्यकरणे प्रभुत्वस्य आदायः अधिकतया वर्तितव्यः भवेत्। प्रजाभ्यः करग्रहणेन प्रभुत्वादायाधिक्यं कर्तुं शक्यते इति चेत् तदा प्रजानां कष्टस्थितिः भवेत्। तस्मिन् समय एव क्रयवस्तूनां मूल्यं अधिकं भवेत। अनुपदमेव विक्रयवस्तूनां मूल्यं च अधिकं भवेत्। एवं सति प्रभुत्वोद्योगिनां प्रजानां च आवश्यकवस्तूनां मूल्यस्य आधिक्ये सति वेतनौन्नत्यकरणेन को वा लाभः भवेत् इति चिन्तनीयो भवति। रूप्यकमूल्यह्रासकाले अधिकवेतनालाभे कथं वा उद्योगिनः नित्यकृत्यानि सम्यक् कुर्युः इत्यपि च विचारणीयं भवति। तस्मात् प्रभुत्वं, धूमशकटकार्मिकोद्योगिनः अन्ये च राजकीयनायकाः देशश्रेयः मनसि निधाय परस्परं संभाष्य एतत्कार्यस्तंभनं निरास्य स्वार्थपरत्वं विहाय च देशक्षेमाय मार्गदर्शकाः भवेयुरिति वयं सप्रश्रयं प्रभुत्वम् राजकीयनायकान् धूमशकटकार्मिकान अन्यांश्च प्रार्थयामः। शीघ्रमेव प्रजानां यानायानसौकर्यं भवेदिति च अभिलषामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्तविपिनम्

श्री गोवर्धनाचार्य गलगली, बेंगलूरु - १०.

प्रत्यूषे विततां निशाजवनिकामुत्सारयन् विश्वसृक्
वासन्तं जगतीतलं प्रकुरुते गान्धर्वरङ्गस्थलम् ।
मुक्ताविद्रुमपद्मरागविलसत्सद्रावपात्रोद्गता
सौम्या शीतलसुप्रभा वसुमतीं प्राचीदिशो व्याप्नुते ॥

पीतारक्तहरित्सु सन्ति शतशो यावत्प्रकारा भुवि
तद्वर्णैर्नवपल्लवैस्तरुलतागुल्मादयो मण्डिताः ।
नूत्नं ते कुसुमाकाराख्यनृपतेः कुर्वन्ति सत्तोरणम्
पुष्पामोदभरात् सुखं च जनयन्संवाति मन्दानिलः ॥

रूपस्पर्शसुगन्धसर्वविषये सौन्दर्यसाराणि या-
न्याविन्दन्ति समस्तलोकविजये तूणेऽभवन्सायकाः ।
तत्पुष्पाणि सहस्रशो बहुविधान्याकीटमोदप्रदा-
न्यर्धोन्मीलितसुन्दराणि निभृतं नेत्रोत्सवं कुर्वते ॥

एवं वर्षति भूनभः परिसराल्लावण्यसारामृतम्
काले सर्वचराचरे सुनिभृतं दत्तेक्षणे शृण्वति ।
भृङ्गाश्चारुविहङ्गमाश्च मधुरं सङ्गीतमातन्वते
हृष्टो वृक्षगणः करोति सुमनोवृष्टिं शिरःकम्पयन् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

महाश्वेतायाः वृत्तान्तः

श्री सेडिशेट्टि शिवगणेश्बाबु, पेद्दापुरम्.

पुरा खलु भगवतो दक्षस्य प्रजापतेः अतिप्रभूतानां मध्ये कन्यकानां द्वे सुते मुनिररिष्टा च बभूवतुः । अरिष्टायास्तु पुत्रस्तुम्बुरुप्रभृतीनां षण्णां सोदर्याणां ज्येष्ठो हंसो नाम गन्धर्वः राजा, तस्य हेमकूटो नाम पर्वतः निवासः । स सोममयूखसम्भवादप्सरःकुलात् समुद्भूतां गौरीं नाम कन्यां प्रणयिनीमकरोत् । तयोः दम्पत्योरेव सुता 'महाश्वेता' अन्वर्थनामधेया । सा पितृभवने बालतया कलमधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्कं सञ्चरन्ती, शैशवमतिनीतवती । क्रमेण च कृतं वपुषि तस्याः कुसुम इव मधुकरेण नवयौवनेन पदम् ।

अथैकदा मधुमासदिवसेषु स्वाम्बया सममच्छोदसर, मुनितनयश्चित्ररथखानितम् स्नानार्थमगच्छत् महाश्वेता । तत्तन्मनोहरोद्देशदर्शनलोभाक्षिप्तहृदया तत्र तत्र सखीजनेन व्यचरत् । एकस्मिन् प्रदेशे झटिति वनानिलोपनीतम् अनाघ्रातपूर्वम् कुसुमगन्धमभ्यजिघ्रन् । 'कुतोऽयम्' इत्युपारूढकुतूहला कतिचित्पदानि गत्वा, अयुग्मलोचनं वशीकर्तुकामं काममिव सनियमम अतिमनोहरम्, सवयसा सह स्नानार्थमागतं मुनिकुमारकमपश्यत् । तेन च कर्णावतंसीकृतां पारिजातकुसुममञ्जरीं अभिवीक्ष्य 'अस्यानन्वयं परिमलः' इति मनसा निश्चित्य, ईक्षमाणा तपोधनयुवानम् तं, परवशीकृता चाभवत् नवयौवनसुलभेन कुसुमायुधेन ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ कृतप्रणामायां तस्यां महाश्वेतायां, तद्विकारदर्शनापहृत-धैर्यं तमपि कुमारं तरलतामनयदनङ्गः । अथ मुहूर्तमिव स्थित्वा, तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छत् महाश्वेता—'भगवन् ! किमभिधानः ? कस्य वाऽयं तपोधनयुवा ? किं नाम्न-स्तरोरियमनेनावतंसीकृता कुसुममञ्जरी' इति । स तु अब्रवीत्—"मुनिबालकोऽयं, महामुनिश्वेतकेतुलक्ष्म्योः मानसपुत्रः, पुण्डरीक-नामधेयः, सकलविद्याकलापश्च । सोऽयं सम्प्रति चतुर्दशीति भग-वन्तं भवानीपतिमुपासितुमागतः । इयं च पारिजातकुसुममञ्जरी रूपातिशयबद्धादरया मार्गसङ्गतया नन्दनवनदेवतया समर्पिता अनिच्छितोऽपि अस्य मया कर्णपूरीकृता ।" इति ।

इत्युक्तवति तस्मिन् पुण्डरीकः समुपसृत्य आत्मीयात् श्रव-णादपनीय तां कुसुममञ्जरीं महाश्वेतायाः कर्णपुटे अकरोत् । तत्क्षणं लज्जया सह तत्करतलात् गलितां तेन अज्ञाताम अप्राप्ता-मेव भूतलम अक्षमालां गृहीत्वा सलीलं सा कण्ठाभरणतामनयत । अत्रान्तरे छत्रग्राहिण्या आहूता सा, पुण्डरीकेण अलीककोपपूर्वकं अक्षमालार्थं निरुद्धा सती तामक्षमालां प्रत्यर्पयामास । स्नानान्त-रम कथमपि सखीजननीयमाना सा अम्बया समम् भवनम अया-सीत । गत्वा च प्रविश्य कन्यान्तःपुरम्, तत प्रभृति तद्विरहातुरा सर्वान् व्यापारानुत्सृज्य एकाकिनी निस्पन्दतिष्ठत् ।

इह पुण्डरीक तपोधनयुवाऽपि मन्मथावेशस्य कोटिं परा-मध्यगच्छत् । कपिञ्जलः पूर्वोक्तः तस्य वयस्य महाश्वेताभवनं गत्वा मित्रस्य मदनसन्तापं निवेद्य, तदपनोदनार्थं तां प्रार्थयत । तदा 'दिष्ट्याऽद्यमनङ्गो मामिव तमप्यनुबध्नाति' इति चिन्त-यित्वा सर्वानन्दहृदया अभवत् । सा अस्वस्थशरीरा इति परि-जनात् ज्ञात्वा तस्याः अम्बा तत्रागत्य सुचिरं स्थित्वा स्वभवन-मयासीत् । तया तु तत्रागत्य 'किं कृतम्, किमभिहितम्' इति सर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेव शून्यहृदया नालक्षयत् । गतायां च तस्यां, अस्तमुपगते भगवति सवितरि, किंकर्तव्यतामूढा, सा स्वीयताम्बूलकरङ्कवाहिनीं तरलिकामपृच्छत्– अयि तरलिके! उपदिशतु मे भवती, यदत्र साम्प्रतम् । अयमेवं त्वत्समक्षमेवाभिधाय गतः कपिञ्जलः । यदि तावत् इतरकन्यकेव लज्जां विहाय, जनापवादमचिन्तयित्वा, सदाचारमतिक्रम्य, स्वयमुपगम्य, पाणिं ग्राहयामि, तदा गुरुजनातिक्रमादधर्मो महान् । अथ धर्मानुरोधादितरपक्षमङ्गीकरोमि, नियतं स्पृशेन्मां मुनिजनवधजनितम् महत् पातकम्' इति ।

तदा समुपारूढरागचन्द्रमण्डलवीक्षणेन मूर्च्छां प्राप्ता महाश्वेता । तरलिकया सेविता, उक्ता च सा स्वयमेव पुण्डरीकनिकटं गन्तुमुद्युक्तवती । उच्चलितायाश्च तस्याः दुर्निमित्तनिवेदकमस्पन्दत दक्षिणं चक्षुः । उपजातशङ्का यथाकथञ्चित् अलङ्कृता तरलिकया अनुगम्यमाना गूढेन पथा कन्यान्तःपुरान्निरयासीत् । सरसः पश्चिमतीरं प्राप्य, तत्र कांचित् रुदितध्वनिं नातिव्यक्तामुपालक्षयत् । दक्षिणेक्षणस्फुरणेन मनस्याहितशङ्का सभयं तदभिमुखं अतित्वरितमगच्छत् । 'हा हतोऽस्मि! हा किमिदमापतितम्! हा दुरात्मन् मदन! निर्घृण! किमिदमकृत्यमनुष्ठितम् । हा दुर्विनीते महाश्वेते! किमनेन तेऽपकृतम्; आः पापदुश्चरित चन्द्रचण्डाल! कृतार्थोऽसीदानीम् ।' इत्येतान्यन्यानि च विलपन्तं कपिञ्जलमद्राक्षीत् ।

तच्च श्रुत्वा, दूरादेव मुक्तैकताराक्रन्दा, यथाशक्ति त्वरितैः पादप्रक्षेपैः पदे पदे प्रस्खलन्ती, तं प्रदेशं गत्वा सरस्तीरसमीपवर्तिनि शशिमणिशिलातले विरचितं मृणालमयं शयनमधिशयानं तत्क्षणविगतजीवितं तं सा महाश्वेता जीवितनाथमद्राक्षीत् । उद्भूतमूर्च्छान्धकारा सा शोकोन्मत्ता इव भूत्वा मरणैकनिश्चया तरलिकामादिदेश चितां विरचितुम् । अत्रान्तरे चन्द्रमण्डलविनि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गतो दिव्याकृतिः पुरुषः मृणालधवलाङ्गुलिभ्यां बाहुभ्यां तमुपरत-मुत्क्षिपन्– वत्से ! महाश्वेते ! न परित्यज्याः त्वया प्राणाः । पुनरपि तवानेन सह भविष्यति समागमः' इत्यभिधाय सहैवानेन गगनतलमुदपतत् । कपिञ्जलस्तु 'दुरात्मन् ! क्व मे वयस्यमपहृत्य गच्छसि' इयभिधाय, तमेवानुसरन् अन्तरिक्षमुदगात् ।

महाश्वेता तु द्वितीयेनेव प्रियमरणेन कपिञ्जलगमनेन द्विगुणीकृतशोका तस्मिन्नेव सरस्तीरे तरलिकाद्वितीया क्षपां क्षपितवती । प्रत्युषसि तूत्थाय तस्मिन्नेव सरसि स्नात्वा, कृतनिश्चया, तमेव कमण्डुलमादाय, तान्येव च वल्कलानि, तामेवाक्षमालां गृहीत्वा, ब्रह्मचर्यमाश्रित्य, बुध्वा निस्सारतां संसारस्य देवं अनाथशरणं स्थाणुं आश्रितवती । मातापितृबन्धुवर्ग गृहगमनाय तस्याः प्रयतमानः दृढनिश्चयां तां विसृज्य निराशः सशोक एव गृहानयासीत् । महाश्वेता तु पुनः प्रियपुण्डरीकसमागमप्राप्तिपर्यन्त स्वीयतपोनियमम् न त्यक्तवती । अहो ! अत एव खलु– महच्चित्रम् चित्यम् च । 'विधिर्बलीयसी' इत्युच्यते बुधैः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दवत्सरस्य प्रस्तावः

अयं वत्सरः षष्टिवत्सरेषु अन्यतमः । षष्टिवर्षेभ्यः अनन्तर मागतवान् । चान्द्रमानेन अयं वर्षः भानुवासरे २४-३-७४ तिथौ प्रादुरासीत् । सौरमानरीत्याऽपि अब्दप्रारम्भः भानुवासरे आसीत् । चान्द्रमानेन यस्मिन् दिने वत्सरारम्भः भवति, तस्य दिनस्य अधिपः राजा, यस्मिन् दिने सौरमानेन वत्सरारम्भः, तस्य दिनस्य अधिपः मन्त्री च भवतः । तदनुक्रमेण अस्य वत्सरस्य राजा, मन्त्री च सूर्य एव भवति । सूर्यस्तु मूर्तित्रयात्मकः, कर्मसाक्षी, जगच्चक्षु, प्रत्यक्ष-देवता, इत्येवं वेदेभ्यः पुराणादिभ्यश्च ज्ञायते । परन्तु दैवज्ञा त मन्यथा वदन्ति ।

प्रजाः विशेषतः नूतनवत्सरारम्भदिने आबालवृद्धं प्रातरेव कृतमङ्गलस्नानाः, धृतनूतनांशुकाः, कलिताभरणाः सानन्दं व्यराजन्त । स्त्रीभिः गृहाणि, गृहद्वाराणि च रङ्गवल्यादिभिः सुन्दरमलङ्कृतानि । प्रातः प्रथमतः, गुडसम्मिश्रिते, नूतनतिन्त्रिणीफल-रसे, निम्बकुसुमानि चूतशलाटुशकलानि मेलयित्वा, भगवते निवेद्य सर्वे प्यसेवन्त । एतादृशरसायनसेवनेन, आधयः, व्याधयश्च मनुजं न स्पृशन्तीति आयुर्वेदविदा माशयः । "नूतनपञ्चाङ्गमानीय गन्धाक्षतादिभिः अलंकृत्य देवतायतने निक्षिप्य विशेषतो देवपूजां, पञ्चाङ्गपूजां च कृत्वा षड्रसोपेतं भक्ष्यभोज्यादिकं, फलादिकं च निवेद्य, सदक्षिणाकं, ताम्बूलं विज्ञाय, विप्राय दत्वा, तन्मुखतः राजादिनवनायकफलं, कन्दायफलं, आयव्यय - राजपूज्यतापमानादि अश्रृण्वन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु पञ्चाङ्गश्रवणेन उत्साहः ईषदिव कुण्ठितोऽभवत्। अस्मिन् वत्सरे नवनायकेषु, षट्पापिनः त्रय एव शुभाः इति सिद्धान्तिनः अवदन्। पापिनः अधिकारदुर्विनियोग मेव कुर्युरिति अनुभवसिद्ध मेव खलु अस्माकम्। कुत्रचित् अनावृष्टिः, कुत्रचित् अतिवृष्टिः, प्रजासु अन्योन्यकलहः, स्फोटककलरादि रोगबाधाः, चोराग्निशस्त्रपीडाः, क्षामः, सस्यनाशः एवंविधाः बहुधा अश्रूयन्त, येन भयात् रोमाञ्चोऽपि अजायत।

तत्र तत्र राष्ट्रेषु विद्यमानायाः स्थितेः पर्यवेक्षया पञ्चाङ्गोक्तफलं अक्षरशः सत्यमेव भविष्यति किमु इति बुद्धिरपि जायते। घृतशाके (नेतिबीरकाय) यथा घृतं नास्ति, तथा आनन्दाख्ये वत्सरे आनन्दो न भवे द्वा इति शङ्का उत्पद्यते। अतीते आनन्दवत्सरे देशस्य स्थितिः कीदृशी आसीदिति केचन वृद्धाः परं जानन्ति। अद्यतनानन्दवत्सरे स्थितिं वयं साक्षात् अनुभविष्यामः।

विरळतया पाठशालासु विद्यार्थिनां अनुपस्थितिः अङ्कुरिता। आपणानां बन्धनमपि प्रारब्धम्। वैद्यशाखीयानां कार्याऽकरणम् च दृश्यते। घूर्जरसभायाः (Assembly) तिरस्कृतिः आसीत्। केन्द्रप्रभुतया एतत् तिरस्कृतिः पूर्वमेव कार्या आसीत्। घूर्जरराष्ट्रपरिस्थितिः बीहारराष्ट्रे इदानीं प्रतिफलिता वर्तते। तत्र विद्यार्थिनः प्रलयमेव असृजन्। शासनसभोद - योगिनां मन्त्रिणां च केशाकेशि मुष्टीमुष्टि च संवृत्तम्।

घूर्जरे समुत्पन्ना आन्दोलना, बीहारे व्याप्ता, परिसरराष्ट्रेष्वपि संक्रान्ता अवश्यं भवितेति राजनीतिज्ञाना मभिप्रायः। प्रतिराष्ट्र मेवविधा दुःस्थितिः जायेत यदि, पालकानां पालनासौलभ्यं, प्रजानां च जीवितसौख्यं गगनकुसुममेव भवेत्। विनाशकार्यसरणिः विद्यार्थिनः निवारणीयाः। प्रभुत्वपक्षः, प्रतिपक्षाश्च ऐकमत्येन,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
पुस्तकालय गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

एतादृशदुरागतानां विनिवारणे कृतप्रयत्ना बद्धश्रद्धा धृतकङ्कणाश्च भवेयुः ।

अस्मिन् वत्सरे सर्वेपि जनः स्वस्वविधिं साधु सकाले निर्वर्तयतु । अपि च विद्वांसः धनिकाः मताचार्याः ग्रहस्थितिं सम्यक् विचार्य यथाशास्त्रं यथोचितं च देवयजनादि यथेष्ट कुर्वन्तु, कारयन्तु, येन ग्रहाणां क्रूरता विलुप्ता भूत्वा लोककल्याणं भवेत् ।

अयं वत्सरः सर्वथा अन्वर्थनामा भूयादिति आशास्महे ।

आदित्यादि ग्रहास्सर्वे, सनक्षत्रा स्सराशयः
कुर्वन्तु मङ्गलं नित्यं, सुप्रसन्ना जनार्चिताः ।।

ये न मित्रस्य दुःखेन दुखिनः सन्ति मानुषा ।
ते नरा नरक यान्ति महापातकभागिनः ।।

तुलसीदासः

हृदीश्वरं दृशं लक्ष्ये निधाय बलमात्मनि ।
सिद्धामाप दयानन्दो देशकल्याणकल्पनाम् ।।

अरबिन्दो घोषः

सानुकम्पा दरिद्रेषु पतितेषु पामरेष्वपि ।
ईश्वरकृपया गुप्ता धीरा भारतवासिनः ।।
समुद्धाराय देशस्य समाजस्य समृद्धये ।
वैशिष्टयाय मिथः प्रीता भवामः सजवा वयम् ।।

स्वामी विवेकानन्दः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दो ब्रह्म—!

" अवर: "

आनन्दोदय - प्रभात - समये
प्रमाद - भरिता प्रमदा सुप्ता !
अन्तिम - यामान्ते कृतरतिना
कान्तेनाऽतिक्लान्ता कान्ता ! !

व्यासोऽकीर्तयदुच्चैरित्थम्—
"आनन्दो नन्दनो नन्दी"ति,
"वत्सरो वत्सलो वत्सी"त्यपि च;
बाढं,—
भवतु मदीयं कीर्तनं गाढम् ॥

आनन्दाब्दो वर्षतु कामं;
जनो जनो नन्दतु प्रकामं;
वत्सरो ह्ययं वत्सलो भवेत्;
मत्सरोऽपि चेदगच्छतान्नः ॥

भगवानप्येवं किल प्राह—
"कालः कलयतामस्मीति;
कालोऽस्मि लोकक्षयकृदित्यपि च;
बाढं,—
भवतु तदीयं कलनं काले काले ॥

न केवलं संकलनं व्यवकलनं वा
किन्तु तदीयं कलनं माध्वीक - मृद्वीकम;
न केवलं प्रमादालस्य मोहानां कलनम्
किन्तु उत्साहानन्दज्ञानानां संकलनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तमे शिखरे जाते – !!

"अवरः"

दशाब्दद्वयात् पूर्वं वृत्तमिदम् । चित्तूरुमण्डले (आं. प्र.) पलमनेरु उपमण्डलान्तर्वर्ति ग्रामवासी कश्चित् प्राचीनाचारसम्पन्नो विप्रः कदाचित् तिरुपतिनगरं गतः । स ब्रह्मोत्सवकालः । तदानीं तिरुमल-तिरुपतिदेवस्थानधर्मकर्ता हाथी - रामजी - परम्परागतः "महन्त्" नामकः कश्चिन्मठाधिपतिः वेङ्कटगिरे रुपरि अधश्च देवस्थान - कार्य - निर्वाहकः सर्वाधिकारी च आसीत् । उत्सवकाले महन्त - मठे उत्तरभारतादागतानां यात्रिणां कृते भगवतः श्रीनिवासस्य माहात्म्य-लीला-चित्राणां प्रदर्शन मायोजितम् । तत्सन्दर्शनार्थं तिरुपतिं गतः विप्रोत्तमः महन्तमठं कथञ्चित् प्रविवेश । केवल मुत्तरभारतयात्रिणां कृते समायोजिते तस्मिन् प्रदर्शने अन्येषां प्रवेशो दुर्लभ आसीत् । द्वाःस्थस्य अनवधानेन प्राप्तावकाशः अयं विप्रः मठं प्रविश्य कुडयचित्राणि संपश्यन्नग्रेसरंश्चाऽसीत् । एव पुरस्सरन्तं तं विप्रं स्वयं महन्तमहाशयोऽपश्यत् । स हिन्द्या मपृच्छच्च "कहाँ जाते ? हिन्दीभाषानभिज्ञ विप्रोत्तमः सस्थैर्यं सदृढस्वरं उच्चैः प्राहः– "उत्तमे शिखरे जाते" इति ।

महन्त् प्रश्नस्य– को भवान् ? कुतस्त्व मागतोऽसि ? कथ मत्र प्रविष्टोऽसि ? इदं प्रदर्शनं केवलं उत्तरदेशादागतानां यात्रिणा मेव कृते कृतम् । भवता न गन्तव्य मिति भाव प्रतिध्वनितः । हिन्दी मजानन्नपि विप्रः उत्तरभारतीयानां संस्कृताभिमानं जानाति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत स्सधैर्यं सन्ध्योपस्थानश्लोकपादेन "उत्तमे शिखरे जाते" इति उत्तरयामास। तदीयां समयस्फूर्तिं अवगच्छन् सस्मितं महन्तमहाशयः तं विप्रं "जाव्" इति अनुज्ञातवान्। "अहमपि तिरुमलयात्री" इति शाब्दबोधः महन्तमहाशयस्य विप्रोक्तात् "उत्तमे शिखरे जाते" इत्यस्माज्जातः स्यादिति मन्ये।

बालसुभाषितानि

ले. श्री वैद्य रामस्वरूपशास्त्री, संपादकः, बालसंस्कृतम्, बम्बई-८६.

हंसो न भाति बलिभोजनवृन्दमध्ये
गोमायुमण्डलगतो न विभाति सिंहः।
जात्यो न भाति तुरगः खरयूथमध्ये
विद्वान् न भाति पुरुषेषु निरक्षरेषु।

हंसो विभाति नलिनीदलपुञ्जमध्ये
सिंहो विभाति गिरिगह्वरकन्दरासु।
जात्यो विभाति तुरगो रणयुद्धमध्ये
विद्वान् विभाति पुरुषेषु विचक्षणेषु॥

शास्त्रं सुचिन्तितमथो परिचिन्तनीयं
संसेवितोपि नृपतिः परिसेवनीयः।
अङ्के धृतापि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुकुन्दविलासः

श्री कुण्टिमद्दि शेषशर्मा, अनन्तपुरम्.

(पूर्वानुबन्धः)

सरसीरुहपाणिसिन्धुकन्यामणिनाथस्य तु यस्य पादयुग्मम् ।
भवसागरतुङ्गभङ्गनौका वसुदेवात्मजमन्वहं भजामि ॥

इति लीलालोलमुकुन्दविलासः ।

अथ शरण्यमुकुन्दविलासः ।

बहुजननमुकर्मराशिपाक प्रभवरमारमणानुरागयोगात् ।
मम समजनि यत्पदाब्जभक्तिः, शरणमुपैमि मुकुन्दपादयुग्मम् ॥

गुरुवरकरुणासमीरिताष्टाक्षरिमनुराजधनाढ्य एषनान्यम् ।
भवजलधितरिं विना भजेहं, शरणमुपैमि मुकुन्दपादयुग्मम् ॥

कलशजलधिजास्तनाङ्गरागारुणितपुनर्भवकान्तिपूरगङ्गम् ।
कमलजकरवारिजातधौतं शरणमुपैमि मुकुन्दपादयुग्मम् ॥

सुरभिळसुकुमारचारुदीव्यद्दरविकसच्छतपत्रगर्वहारि ।
मधुरसुरसरिन्मरन्दपूरं, शरणमुपैमि मुकुन्दपादयुग्मम् ॥

कपिलमुनिरुषापरासुभूभृत्तनयततिं सुरलोकमानयन्त्याः ।
अपि सुरसरितः प्रसूतिहेतु शरणमुपैमि मुकुन्दपादयुग्मम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि सनकसनन्दनादियोगि प्रकरमनोम्बुजमत्तचञ्चरीकम् ।
नतसुरमणिमौळिकान्तिदिग्धम् शरणमुपैमि मुकुन्दपादयुग्मम् ॥

भयदभवपयोधितुङ्गभङ्गाऽऽकुलितनराँतिनिवारणैकदीक्षम् ।
श्रितदुरिततमस्ततेः [१] पतङ्गं शरणमुपैमि मुकुन्दपादयुग्मम् ॥

स्फुरतिमनसि यद्यदन्तकाले पुनरनुगच्छति तत्तदेवजन्म ।
अविरत मतएव सर्वथाहं शरणमुपैमि मुकुन्दपादयुग्मम् ॥

शरणमुपगतः पयोधिकन्यारमणपदद्वयमेकवारमेव ।
न च पतति भवे पुनरस्य यस्मात् शरणमुपैमि मुकुन्दपादयुग्मम् ॥

जलनिधि दुहितुर्मृदूपधानायितकमनीयमनोहरोरुभागे ।
विनिहितमतुल प्रपन्नगम्यं शरणमुपैमि मुकुन्दपादयुग्मम् ॥

दरकरचरणाब्जदासशेषग्रथितमिद मुरभिद्विलासरम्यम् ।
हरिपदयुगळी सुमं सुवर्णं भवतु मुकुन्दविलासनामकाव्यम् ॥

श्रीश्रीनिवासकरुणालहरीप्रफुल्ल
गीर्वाणकाव्यरचनापरिणद्धबुद्धिः ।
शेषस्समर्चति मुकुन्दपदाब्जयुग्मं
कृत्वाकृतिं ननु मुकुन्दविलासनाम्नीम् ॥

१ सूर्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीसिंहाचलक्षेत्रमाहात्म्यम्

श्री जस्पन लक्ष्मीनरसिंहशास्त्री.

श्रीसिंहाचलक्षेत्रं विशाखपत्तनस्य पञ्चक्रोशदूरे अस्ति। कृतयुगे जगत्कंटकायमानः हिरण्यकशिपः स्वपुत्रं प्रह्लादं विद्याभ्यासार्थं गुरुकुल प्रेषयामास। प्रह्लादस्तु हरिलग्नहृदयः तन्नामस्मरणमेव कुर्वन्नास्त। एवं स्थिते गुरवः एतद्विषयं प्रह्लादपितरि निवेदयामासुः। हिरण्यकशिपः स्वशत्रुनामस्मरणे बद्धश्रद्धं कुमारं बहुधा पीडितुं आदिदेश भटान्। प्रह्लादस्तु तदानीमपि स्वकर्म न विरराम। राक्षसेन्द्रः स्वपुत्रं पूर्वसमुद्रे पातयितुं आदिदेश। अनुचराः ते निशाचराः तथा कृत्वा तद्विषयं राज्ञे निवेदयामासुः। हरिभक्तः प्रह्लादः समुद्रे निपत्य त्राहि इति आर्तत्राणपरायणं वैकुंठवासं श्रीमन्नारायणं प्रार्थयामास। तदार्तनादमाकर्ण्य विष्णुः समुद्रगर्भगतं प्रह्लादं संरक्ष्य अभयं दत्तवान्। अन्यस्मिन् दिने दुराचारे अतिभूमिं गतं हिरण्यकशिपं संहर्तुं महाविष्णुः अहोबलपत्तनं प्राप्य नृसिंहरूपेण स्तम्भात् आविर्भूय हिरण्यकशिपोः हृदयं विदार्य प्रह्लादं अहोबलसाम्राज्याभिषिक्तं कृत्वा "प्रह्लाद! तव यदा राज्यविरक्तिः स्यात् तदा त्वत्पौत्रं राज्ये नियुज्य सिंहाचलक्षेत्रमागच्छ। नृसिंहवराहरूपाभ्यां प्रत्यक्षीभूय ते मुक्तिं दास्यामि इत्युक्त्वा अन्तर्हितोभवत्।

अनन्तरं प्रह्लादः स्वीकृतगार्हस्थ्याश्रमः सततं हरिनाम स्मरणमेव कुर्वाणः ईषत्काले यौवनाद्यवस्थाः नीत्वा स्वपौत्राय राज्यं दत्वा मोक्षार्थी भगवदाज्ञानुसारेण तन्निर्दिष्टपर्वते तदाराधनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुर्वन्नास्त । श्रीमन्नारायणोपि तद्भक्ति मङ्गीकृत्य सिंहशैले मालती निकुंजे आविरभूत् ।

प्रह्लादः तेन संतुष्टः साष्टाङ्गदण्डप्रणामादिकं कृत्वा विश्वकर्मनिर्मितविमाने स्वामिनं प्रतिष्ठाप्य षोडशोपचारार्चनादिकं कृत्वा तत्र पत्तनमेकं निर्मापयामास । भगवदाज्ञया अद्यापि तत्र गङ्गायमुनासरस्वतीत्यादि नद्यः धारारूपेण प्रवहन्ति ।

ब्रह्मादीनां सिंहाद्रिपर्वतागमनम्

एकदा ब्रह्मा नृसिंहरूपगतं जगदीश्वरं द्रष्टुकामः क्षीरसागर शायिनं श्रीमन्नारायणं ससेव्य "प्रभो, लोकरक्षणार्थं यानि रूपाणि त्वया प्राप्तानि तानि सर्वाणि दृष्टानि । किन्तु नृसिंहरूपं न दृष्टम् । तस्मात् शान्तस्वरूपः भूत्वा मयि अनुग्रहं दर्शय । इति प्रार्थयायाम । अनन्तरं नारायणोपि "शान्तसंकल्पमनाः भूत्वा" श्रीसिंहाद्रौ प्रह्लादेन पूजितवानस्मि । चैत्रशुक्लएकादशीदिने भक्ताग्रगण्येन प्रह्लादेन कल्याणमहोत्सवः निर्णीतः । त्वं तदा मां दृष्ट्वा यथाविधिमर्चय । किं च दृष्टकल्याणमहोत्सवाः मानवाः सर्वपापेभ्यः मुक्ताः भूत्वा मल्लोकं अवाप्नुयुः इत्यवोचत् । अनन्तरं ब्रह्मा प्रह्लादार्चितं स्वामिनं संदर्श्य सत्यलोकमवाप ।

पुरूरवस्थ स्वामिसाक्षात्कारः

इत्थं परमभक्तेन प्रह्लादेन आराधितस्य नृसिंहरूपस्य हरेः निलयः सिंहशैलः प्रह्लादानन्तरं शिथिलीभूय क्रमतः वृक्ष कुंजाद्युपेतः पूर्णं, शोभां विससर्ज ।

कालेगते षट्चक्रवर्त्यन्यतमः पुरूरवः एकदा विहारार्थं ऊर्वश्यासहविमानारूढः दक्षिणादिशं प्रति प्रतस्थे । तच्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विमानं सिंहाचलसमीपे अचलमेव अभवत् । तद्दृष्टवा पुरूरवः विमानगमनावरोधकारणं विचारयितुं आरेभे । तदा प्रह्लादेन भक्ताग्रगण्येन प्रतिष्ठितः आराधितश्च स्वामी अस्मिन्नेव अचले यत्र कुत्र वा तिरोहितः स्यात् । तद्दर्शनेन अभीष्टसिद्धि भविष्यति इति अशरीरवाणी अवदत् । तदाकर्ण्य पुरूरवः तद्दर्शनाभिलाषी स्वामिनं अन्वेष्टुं आरभत । दिनत्रयानन्तरं स्वामी पुरूरवस्य स्वप्ने प्रत्यक्षीभूय "पुरस्तात् स्थितासु लतासु अहमस्मि पश्य" इत्यादि-देश । अनन्तरं पुरूरवः स्वामिनं संदर्श्य पूजां अकार्षीत् । तद्दिवसः वैशाखशुक्लतृतीया । अत एव अद्यापि भक्ताः तस्मिन् दिने लता-प्रत्याम्नाय कल्पितं चन्दनानन्तर्गतं स्वामिनं तदपसारणेन संदर्श्यनेन मोक्षं लभन्तेति कथा श्रूयते ।

मनोरञ्जनम्

एको बालकः– मनुषस्य द्वौ हस्तौ स्तः । किन्तु जन्तूनां हस्तौ किमर्थं ईश्वरेण न निर्मितौ ?

अपरोबालकः– किमर्थमित्युक्ते जन्तवः मनुष्याणां गृहेषु प्रविश्य हस्तभ्यां गृहीत्वा सर्वाणि भक्ष्याणि भक्षयेयुः इति मन्ये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिरुवेंगडाचार्य अस्तमयमुद्दिश्य सन्तापः

विद्वान्, वैद्यविद्वान्, सर्वतन्त्रस्वतन्त्र, विद्यानिधि, कवीश्वर

श्री अल्कूरु गोल्लापिन्नि वासुदेवशास्त्री

हे दिव्ये! दिव्यजननि! सुरभारति चिन्तयता
तिरुवेंकटसूरिस्तु मुरारिपुरमभ्यागात्
आंध्रेषु राट्सु सीमासु का गतिस्तव सुव्रते
कलिप्रकोपबाहुळ्यदोषैर्बहुभिराकुलं ॥

भारतं वर्षमालोक्य केशवाय निवेदितुम्
गतो वा सुविरक्तो वा श्रीमानाचार्यसत्तमः
इति चिन्तापरास्सर्वे बुधाश्शोकाकुलेक्षणाः
किं कुर्मः दुर्विधेश्चेष्टा ज्ञातुं वक्तुं न शक्यते ॥

रत्नराशिसमाक्रान्तरथ्यामण्डितमण्डलम्
कृष्णरायमहीजाने पालने प्रथितं बहु
तदद्यघोरदारिद्र्यराक्षस्यालिङ्गितं मुहु
तस्मिन् क्रान्ते प्रसूतस्तु तिरुवेंकटपण्डितः ॥

गैर्वाण्याः पादससेवा कृतबुद्धिरभूत्किल
सर्वस्वत्यागसङ्कल्पपूर्विकामातुरर्चंका
कृतं पण्डितवर्येण तव पुत्रेण धीमता
शूरस्सद्गुणशाली च सन्मित्रबलवान् शुचिः ॥

तस्यापवर्गदाने च समर्थो भवति प्रभुः
भवत्यास्सुमहावृद्धिर्भविष्यति महेश्वरि
विश्वकर्तुः प्रभोश्चेष्टा देवदेवस्य शार्ङ्गिणः
भवत्या, ज्ञातपूर्वैषा तस्मात्त्यज मनोरुजम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१३—४—१९७४ सर्वसभ्यसमावेशदिने एतत्सभाकार्यदर्शिनः श्रीनागपूडि रामनाथार्याः, तेषां षष्ट्यब्दपूर्तिं पुरस्कृत्य. अभिनन्दिताः, सम्मानिताश्च कम्बलसमर्पणेन। तत्सन्दर्भे तेभ्यः समर्पितमभिनन्दनपत्रमिदम् ।]

संस्कृतभाषाप्रचारिण्याः
सभायाः कार्यदर्शिनां

श्रीमतां नागपूडि रामनाथय्यर् महाशयानां

अचिरसंप्रवृत्तषष्ट्यब्दपूर्ति-
महोत्सवं पुरस्कृत्य

चित्तूरु
संस्कृतभाषाप्रचारिण्या
सभया
सादरं सप्रेम च समर्प्यमाणं

अभिनन्दनपत्रम्

अयि संस्कृतसेवाधुरीणाः !

भवन्तः षड्विंशतिवत्सरेभ्यः प्रागारभ्य संस्कृतभाषाप्रचारिण्याः सभायाः कार्यदर्शितां स्वीकृत्य सभामिमां सर्वतोमुखप्रवृद्धामुपपादितवन्त इत्येतत् सहृदयानां सर्वेषां प्रमोदस्थानम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चविंशतिवर्षेभ्यः प्राक् आरम्भकृशा स्रोतस्विनीव येपेंडुशैलप्रदेशात् चित्पुरमिदं प्राप्तामिमां सभां सुरसरितमिव जटाधरः शिरसा धरन् तदादि तदुद्वहनश्रममविगणय्य, तस्यै रजतोत्सवं द्वित्रमासात् प्राक् सम्यक् सम्पादितवतां भवतां अधुना षष्ट्यब्दमहोत्सवं विलोक्य द्विगुणीकृतपरमानन्दनिर्भराः स्मः। भवतां संस्कृतसेवाप्रवणतां वर्णयितुं सहस्रफणामण्डलो द्विसहस्रजिह्वः शेषोऽपि नालम्।

भोः वंशानुगतपाण्डितीप्रतिभोल्लासाः!

भवतां पितामहाः श्रीनागपूडि कुप्पुस्वाम्यार्याः संस्कृतान्ध्रभाषापण्डितप्रकाण्डाः, बहुलान्ध्रसंस्कृतग्रन्थकर्तारश्च। भवतां पितृव्यपादाः पूर्वं भारतीयसर्वोच्चन्यायस्थाने न्यायाधिपतयश्च अभूवन्। अत एव कुलक्रमागतपाण्डित्यप्रकर्षः न्यायविवेकनैपुणं च भवतामाजानसिद्धमिति जानीमः।

एतादृशगुणगणसम्पन्नानां भवतां श्रीवेङ्कटेशः शतसंवत्सरं दीर्घायुषं अरोगदृढगात्रतां निस्तुलाः सम्पदश्च ददात्विति तं श्रीनिवासं सविनय वयं प्रार्थयामहे।

इत्थं,

संस्कृतभाषाप्रचारिण्यास्सभायाः
कार्यवर्गसभ्याः, अन्ये सदस्याश्च.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीवेंकटेशस्तोत्रमाला

'स्फूर्तिश्रीः'

प्रथम स्तबकः

न चाहं प्रमत्तो न चाहं विनीतो
न चाहं स्वतन्त्रो न चाहं प्रपन्नः ।
न जाने स्वरूपं ममैव स्वभावं
प्रसीद प्रसीद प्रभो वेंकटेश !

न चाहं विदग्धो न चाहं विमुग्धो
न चार्तो न चार्थी न भक्तो न युक्तः ।
तदाप्यप्रमेयो मयि त्वत् प्रभावः
प्रसीद प्रसीद प्रभो वेंकटेश !

न कोऽपि प्रवीणः स्वरूपावबोधे
न कोऽपि त्वदीय प्रशंसा धुरीणः
त्वमेव प्रपूर्ण स्त्वदन्यो विडम्बः
प्रसीद प्रसीद प्रभो वेंकटेश !

यथा मे मनोऽब्जे रजः प्लावनेच्छा
तथा दृष्टिमार्गे तमो गाढवृष्टिः ।
कथं वा भवेत् मे महान् सत्त्वलाभः
प्रसीद प्रसीद प्रभो वेंकटेश !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुसङ्गाद् विहङ्गः कुलाये निलीनो
न शक्नोति पक्षौ यथेच्छं विधातुम् ।
कथं स व्रजेत्तं महोत्तुंगमद्रिम्
प्रसीद प्रसीद प्रभो वेंकटेश !

चिराभ्यासतन्त्रो नरो न स्वतन्त्रो
विमोहीव नित्यं परिभ्रान्तिमेति ।
तमुद्धर्तुमास्ते पृथिव्यां न शक्तिः
प्रसीद प्रसीद प्रभो वेंकटेश !

कदाचित् कथंचित् पुराप्राप्त पुण्यं
फलं संविधत्ते यदि स्याददृष्टम् ।
परं तद्विजाने तवाधीनमेव
प्रसीद प्रसीद प्रभो वेंकटेश !

अमेया गुणा ये त्वदीया उदीर्णा
नृणां वैखरी वाग् मिता सीमिता च ।
प्रयोक्तुं तदन्याश्चणाः केऽपि धन्याः
प्रसीद प्रसीद प्रभो वेंकटेश !

अविद्या मवद्यां यथासाध्यमाप्त्वा
महद्भूचो महान्तं यथात्मानमीडे ।
कुतः काचमण्योर्वरेण्यो विवेकः
प्रसीद प्रसीद प्रभो वेंकटेश !

तथा प्रस्थितानां जनानां समाजे
उषित्वा कथं स्यामहम् तद्विभिन्नः ।
समुद्रादभिन्नस्तरंगः प्रवृत्तौ
प्रसीद प्रसीद प्रभो वेंकटेश !

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मत्सभाप्रधानमन्त्री

१३-४-१९७४ दिने एतत्सभापरिपालकवर्गोपाध्यक्षाणां श्री पि. राजगोपाळनायुडुमहाशयानां आध्यक्ष्ये सम्पन्ने एतत्सभायाः सर्वसभ्यसमावेशे श्रीमान् बहुजनपल्लि शेषाचार्यः संस्कृतभाषा-प्रचारिण्याः सभायाः प्रधानमन्त्रिपदे निर्वाचितः ।

श्रीमान् शेषाचार्यः संस्कृते आन्ध्रे च पण्डितः । आदौ एतत्सभास्थापकेषु विद्वत्सु मुख्यः । तिरुपति संस्कृतकलाशालायां संस्कृतं अधीत्य पश्चात् आन्ध्रविद्वत्परीक्षायां उत्तीर्णः, विंशति-वर्षं यावत् चित्तूरुनगरे, ओङ्गोलुपत्तने च आन्ध्राध्यापको भूत्वा इदानीं विरतः ।

एतत्सभास्थापनदिनादारभ्य सभाकार्यक्रमनिर्वहणविषये समुचितसदालोचनादिदानेन सभाभिवृद्धौ लग्नचित्तः । एतन्महा-शयस्य प्रधानमन्त्रितया निर्वाचनेन सभायाः इतोधिका वृद्धिर्भवे-दिति सदस्यैः स्वाभिप्रायान् प्रकटयित्वाऽयमभिनन्दितः ।

प्रधानमन्त्रिनिर्वाचनानन्तर सभानियमावलिमनुसृत्य अन्ये मन्त्रिणः प्रधानमन्त्रिणा नियुक्ता आसन् । ते यथा, श्रीकीला-तूरु श्रीनिवासाचार्यः, परीक्षामन्त्री, श्री पि. सुब्बराघवय्यः, निधि-मन्त्री, श्री के. मुनिरेड्डिः, प्रकाशकमन्त्री, श्री यन्. अनन्तराम-शास्त्री, प्रचारकमन्त्री च ।

एतत्समावेशे भूतपूर्वप्रधानमन्त्रिणः कुमारः श्रीमान् के. वी. राघवन् कार्यवर्गसभ्यतया निर्वाचितः ।

— वार्ताहरः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामजीवनं

"काश्यप"

भारतदेशः व्यवसायदेशः । अत एव भारतदेशे बहवः ग्रामाः सन्ति । ग्रामैरेव नगर्यः परिपोष्यन्ते । ग्रामेषु व्यवसाय एव मुख्य वृत्तिः । तेन विविधवर्णाः ग्रामेषु निवसन्ति, पुरा विविधवर्णाः जनाः एककुटुम्बमिव अतिष्टन् । सर्वे वयोभेदं पुरस्कृत्य बन्धुरूपेण परस्परं आह्वयन्ति, कुलेषु एकः अग्रजः अन्यः अवरः इति भेदभावं स्थित्वापि बन्धुभावस्यैव प्राधान्यं दास्यन्ति । व्यवसायकार्येषु शुभाशुभेषु सर्वे सहायभूताः भवन्ति । अन्योन्यं उपकारः कुर्वन्ति ! शुक्रनीतिमनुसृत्य यदा कदापि अत्यवसरेषु विषयेषु अनृतं वदन्तु नाम न तु व्यर्थप्रसङ्गेषु ! अतिथीन् पुरस्कुर्वन्ति गुरून् विप्रान् सम्मानयन्ति वृद्धेषु च आदरं प्रदर्शयन्ति ! ये ये धर्मशास्त्रेषु विहिताः विख्याताः धर्माः सन्ति तानेव अनुसरन्ति । अद्यतनकाले वसुधैकप्रभुत्वं स्थापनीयमिति नायकमहाशयानां अधराग्रेषु विद्यते न कर्मणा तस्य उदाहरणप्रायाः भवन्ति । यदा आंग्लेयाः अस्माकं प्रभवः आसन् तदा प्रभृत्येव ग्रामेषु वेदेषु निबद्धधर्मेषु क्रमशः आदरभावो विनष्टः । महात्मा गान्धी प्रभृति महाशयानां नायकानां परिश्रमेण अस्माकं स्वतन्त्रभानूदयः आसीत् न प्रणष्टः धर्मोदयः । धार्मिकाः जनाः आंग्लप्रभुत्वे सूचीमुखप्रायेण धर्मः अतिष्टत् ग्रामेषु तदपि अधुना तु प्रणष्टः इति बाधां प्रकटीकुर्वन्ति ! अधुना विद्यमान नायकानां गान्धी नाममात्रमेव आदर्शभूतः । तेन महात्मना उक्तं न किञ्चिदपि कुर्वन्ति ! अस्माभिः अनुभूयमान स्वातन्त्र्यं नाममात्रमेव यदा पुनः प्रभुत्वं च प्रजाः धर्मगामिनः वदन्ति तदैव रामराज्यं अस्माकं अवतरतीति मन्तव्यम् । ग्रामस्वातन्त्र्यं एव देशस्वातन्त्र्यं देशसौभाग्यं इति मन्तव्यं ग्रामस्वातन्त्र्यमुखात् देशस्वातन्त्र्यं आगच्छतीति ।

***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञानवर्धिनीपरिषत्, बोब्बिलि.

परिषदः विविधशाखाः

बोब्बिलि– यस्. रामगोपालराव्, कार्यदर्शी, विज्ञानवर्धिनी परिषत्, अग्रहारं वीधि, बोब्बिलि, श्रीकाकुलमण्डलम्.

पार्वतीपुरम्– जे. श्रीरामचन्द्रमूर्तिः, प्रधानाध्यापकः, प्रभुत्वोन्नतबालिकापाठशाला, पार्वतीपुरम्.

यं. आर्. नगरम्– यं. सत्यनारायण, अध्यापकः, अप्पर् प्रैमरी स्कूल्, यं. आर्. नगरम्, पार्वतीपुरम्.

तेर्लाम्– जि. के. यं. नायुडु, M. A. B. ED. अध्यक्षः, विज्ञानवर्धिनी परिषत्, तेर्लाम्, बोब्बिलि.

सावरकोट– यं. यस्. यस्. आर्. मूर्ती, आन्ध्रपण्डितः, परिषत् हैस्कूल्, सावरकोट, श्रीकाकुलमण्डलम्.

सीतानगरम्– अय्यगारि नरसिंहम्, प्रधानाध्यापकः, परिषत् हैस्कूल्, सीतानगरम्, श्रीकाकुलमण्डलम्.

रामतीर्थम्– डि. आनन्दराव्, आन्ध्रपण्डितः, परिषत् हैस्कूल्, रामतीर्थम्, विशाखामण्डलम्.

एतेषु केन्द्रेषु संस्कृतभाषाप्रचारिणी सभायाः परिचयादि-परीक्षाः प्रारम्भन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतस्य अधिकतरव्याप्तेः उपायः

श्री के. सि. जयचन्द्रशास्त्री, कोत्तपालेम्.

संस्कृतोन्नतपाठशालाः आन्ध्रप्रदेशे किञ्चिन्न्यूनाधिकतया पञ्चाशदुत्तरशतं भवेयुरिति तर्क्यते। किन्तु तासु पाठशालासु विद्यार्थिनां संख्या दिने दिने क्षीयमाणा वर्तते। काश्चन संस्कृतोन्नतपाठशालाः विद्यार्थिनां अभावेन साधारणपाठशालाः (General Schools) संवृत्ताः। विद्याव्याप्तये बहुलतया साधारणपाठशालाः विद्यन्ते। तासां अनुबन्धतया निम्नजातीयानां, दलितजातीयानाञ्च विद्यार्थिनां कृते सर्वकारेण उचितभोजनवसतिशालाच्च (Free meal Hostals) प्रचाल्यन्ते। यद्यपि संस्कृतोन्नतपाठशालानामपि अनुबन्धतया उचितभोजनवसतिशालाः विद्यन्ते, अथाऽपि भाषाभ्याससौलभ्यमपेक्ष्य, अधिकसंख्याकाः विद्यार्थिनः साधारणपाठशालाः प्रविशन्ति, न तु संस्कृतोन्नतपाठशालाम्।

अस्मात् कारणात् संस्कृतपाठशालासु पठतां विद्यार्थिनां विना जातिमतभेदं सर्वेषां यदि प्रभुत्वेन (प्रजापालकैः) उचितभोजनसाहाय्यं कल्प्यते, तर्हि संस्कृतोन्नतपाठशालासु विद्यार्थिनां संख्या इतोऽपि अधिकतरा अवश्य भवेत्। संस्कृतस्य व्याप्तिरपि बहुळतरा स्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वमतनाशात् वरीयात् गृहनाशः इति निश्चित्य स दुर्मार्गः कदाचित् अर्धरात्रे स्वगृहेऽगारान्निक्षिप्य, अग्निपरीते गृहे, "हा! हा! गृहं मे दह्यते, आगच्छन्तु भो! भवन्त! पान्तु इत्युच्चैराक्रोशत्। अग्निज्वालाः चतसृष्वपि दिक्षु प्रज्वलिताः यदाऽभवन् तदैव तेन तथाऽऽक्रन्दितम्। निद्रोत्थिता जनाः इतस्तत स्समायाताः किंकर्तव्यमूढा अर्धदग्धं गृहं कथमपि रक्षितुं नाऽशक्नुवन्।

तदा मातुलः कुहनादुःख मभिनयन्, गृहं दग्धमिति न तावद्दुःखं जनयति मम, किन्तु मम भागिनेयस्य ग्रन्थराजः दग्ध इति महान् खेदो जायते इति विलप्तु मुपचक्रमे।

रामेश्वरयात्राप्रतिनिवृत्तः पद्मपादः मातुलोक्तं गृहदाहवृत्तान्तं तन्नान्तरीयकं सूत्रभाष्यटीकाग्रन्थदाहं च श्रुत्वा "आर्य! अलं खेदेन, दैवकृतमिदं, न भवतो दोषोऽत्र लेशतोऽपि।" इत्याश्वास्य पुनर्लेखनश्रम मनिवार्यं मत्वा टीकाग्रन्थपुनर्लेखन मारेभे।

मातुलः "बत! मत्कृतः प्रयत्न स्सर्वोऽपि व्यर्थोऽभवत्। अयं खलु पुनर्ग्रन्थलेखने प्रवृत्तः। कथं तु कर्तव्योऽन्तरायोऽस्य" इत्यालोचनानिमग्न आसीत्। अन्ते स दुर्मार्गः बुद्धिमान्द्यापादकं चूर्णं आहारे मिश्रयित्वा पद्मपादं भोजयामास। तेन तस्य स्मरण शक्तिर्लुप्ता; सूत्राणि, भाष्यं, टीका च स्मृतिपथं नाऽयान्ति क्लेशेनाऽपि न स्फुरन्ति, अतः पद्मपादस्य लेखिनी न पुरोगता।

शृङ्गेरीमठे स्थिताः केचिच्छिष्याः केरलात् शंकराचार्यस्य पुनरागमनाभावात् किंकर्तव्यमूढा अत्रान्तरे रामेश्वरं गत्वाऽऽगच्छामेति मत्वा प्रस्थिताः मार्गमध्ये तेषां पद्मपादेन समावेशो जातः। पद्मपादं जडं विज्ञाय तेऽतीव दुःखिताः रामेश्वरयात्रां विरम्य तं केरले नीत्वा गुरोः पुरस्तात् स्थापयामासुः।

शंकर निजप्रभावेण शिष्यस्य, बुद्धिजाड्य मपनुद्य "पद्मपाद! एवं [illegible] मया चिकित्सितमेव। यदि कश्चित्सत्कार्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्चित् कर्तुमिच्छति तर्हि बहवो बहुधा तद्विघटयितुं प्रयतन्ते; प्रकृतिसिद्धमिदं; नैव शोचनीय मत्र" इत्याश्वासयामास।

पद्मपादः– गुरूत्तम! आशीर्दीयताम्, यथा विघ्नोपशान्ति र्भूयात्। भवदीयसूत्रभाष्यस्य पुनः टीका विरच्यते मया।

शंकरः– वत्स! यदा त्वं शृङ्गेरीमठे टीका मपठः, तदा श्रुता सा मत्स्मृतिपथे स्थिताऽस्ति, ब्रवीमि लिख्यताम्।

पद्मपादः आश्चर्यनिमग्नः पत्राणि लेखिनीं च गृहीत्वा आचार्येणोक्तं आमूलाग्रं ग्रन्थं लिलेख।

इम मद्भुतं केरलाधीशः चन्द्रशेखरः श्रुत्वा सपरिवारः आचार्यसन्निधि मुपेत्य "महात्मन्! मय्यपि दया विधीयता"मिति प्रार्थयामास।

शंकरः– राजन्! किमासीत्?

राजा– पूर्वं मया विरचितं नाटकत्रयं कीटदष्टं नष्टम्। भवन्तस्तु एकसंधाग्राहिणः अतो भवद्भिः स्मृत्वा चेदुच्येत तर्हि लिख्येत मया।

आचार्यः शैशवे श्रुतं तन्नाटकत्रयं यथावस्थितं श्रावयमास, कटाक्षयामास च राजानं तद्ग्रन्थपुनरुज्जीवनेन।

२२. विजययात्रा

एकदा शंकरः सुरेश्वरादिशिष्यगणेन सह एव मालोचयामास– "भगवतो वेदव्यासस्य सूत्राणां भाष्यं रचितम्। उपनिषदां भगवद्गीतायाश्च भाष्याणि रचितानि। एतेषां भाष्याणां भवद्भिः टीकाश्च विरचिताः। इतःपर मस्माभिः कर्तव्यं किमस्ती"ति। एवं विचारे प्रवर्तमाने, अत्रान्तरे, तत्र सुधन्वमहीपाल स्समागतः आचार्यं प्रणनाम।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"महात्मन्! अहं भट्टपादस्य शिष्योऽस्मि। ते नास्तिकमतं खण्डयित्वा वेदमतोद्धारमकुर्वन्। वेदविहितकर्मभिः स्वर्गादिसौख्यं यद्यपि लभ्यते परन्तु मोक्षो न। तदर्थं अद्वैतमतमेव शरण्य मिति भवद्भिर्दर्शितम्। तथाऽपि भवदीयमतस्य प्रचार आवश्यकः। भारतवर्षे आर्यमता दुद्भूता मतविशेषा बहवस्सन्ति। शाक्तं, पाषण्डं, वैष्णवं, शैवं, सौरं, गाणापत्यं, कापालिकं, चार्वाकमित्येवमादीनि बहूनि मतानि सन्ति। एतन्मतानुयायिभिः सेव्यमानाः देवता मुक्तिप्रदा न भवन्ति; सर्वातिशायि परं ब्रह्मैव मुमुक्षुभि र्ध्येय मिति प्रतिपादयद्भवदद्वैतमतं यदि व्याप्तिं अपेक्षते तर्हि भवद्भिः वादे जितो मण्डनमिश्र इव पूर्वोक्तमतवादिनः जित्वा वशे कर्तव्याः"– इति सुधन्वनृपालो व्यजिज्ञपत्।

तच्छ्रुत्वाऽचार्यः "राजन्! सुष्ठु उक्तं भवता; आसेतुहिमाचलं पर्यटनं कृत्वा विविधमतवादिभ्योऽद्वैतमतप्राशस्त्यं बोधयिष्यामि" इत्याह।

अचिरेणैव कालेन आचार्यः शिष्येषु अनुसरत्सु विजययात्रायै प्रस्थितः। राजा सुधन्वाऽपि तदद्वैतमतबृन्द मनुससार।

२३. शाक्तेयादिमतस्थाः

प्रप्रथमं शंकराचार्यस्य शाक्तेयैस्सह वादो जातः। शक्तिं परदेवतां वदन्तः शाक्तेयाः। केचन एतेषां शक्तिं भवानीं भावयन्ति सेवन्ते च; केचित्तु लक्ष्मीं भजन्ति चे देके सरस्वतीम्। त्रिविधा अप्येते सम्भूय शङ्करं जेतु मैच्छन्; परन्तु तेषा मैकमत्यं नासीत्। भवान्येव परदेवतेति स्थापनीयमिति भवानीभक्ताः; लक्ष्मीः पराशक्ति रिति लक्ष्मीदासाः; नहि, नहि; सरस्वती खलु जगन्मातेति सारस्वताः। एवं तेषां परस्परं वैमनस्यात् वैमत्याच्च एकीभावासंभवात् अन्ते ते पृथक् पृथक् शंकरस्य अग्रे स्वस्वमता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्युपास्थन् । शंकरः सर्वं श्रुत्वा "आर्याः! भवानी लक्ष्मी र्वा अथ वाणी वा परा देवता न भवति । फलापेक्षया एतदाराधनं तु कर्तुं युज्यते । परन्तु मोक्षापेक्षया प्रवर्तमानानां तुं अद्वैतज्ञानेन परं ब्रह्मैव ध्येय"मिति प्रबोध्य ततः प्रयातः ।

एवं शंकरस्य शैवा वैष्णवाश्च प्रत्यभिगताः । शिवः परम इति शैवाः विष्णुरेव सर्वेश्वर इति वैष्णवाश्च वादमारेभिरे । शैवाः त्रिशूलादिचिह्नैः वैष्णवाः चक्रादिचिह्नैश्च शरीर अङ्कयन्ति स्म । शङ्करः "भक्तवर्याः । शिवविष्णुवादिशब्दाः परमात्मनः सगुणरूपं वदन्ति । भेदबुद्धिं विहाय परमात्मा ध्येयः । किमिति नानाचिह्नै शरीरं दहथ ?" इत्याह । ते "वेदेषु शरीरतापः कर्तव्य इति उक्त मस्ति किल" इत्याहुः । शङ्करः– "तादृश वेदवाक्यानां अपार्थं कल्पयित्वा अनावश्यकतया शरीरं दाहयथ ! कृच्छ्र चान्द्रायणादि व्रतविशेषैः शरीरं तापनीय मिति तदर्थः; दाहः कर्तव्य इति नार्थः" इति प्रबोध्य सशिष्य स्ततः प्रयातः ।

आचार्यः विविधप्रदेशान् गतः । चतुर्मुखमतस्थाः, वह्निमतस्थाः, सौरमतस्थाः, गाणापत्यमतस्थाश्च अभिगताः । एतेषां सर्वेषा मपि वादान् श्रुत्वा "न ब्रह्मा नाग्निः न सूर्यो न गणपतिः परमात्मा भवति । नैते मुक्तिप्रदाः । मुमुक्षुभिः परमात्मैवोपासितव्यः" इति प्रबोध्य ततः प्रस्थितः ।

२४. सर्वं खल्विदं ब्रह्म

अथ शङ्करः काञ्चीपुरं गत्वा तत्र शिवकाञ्चीं विरममीत । कतिपयदिवसैः तत्रैव वसन् एवं बोधयामास । "जगत्कर्ता स एव परमात्मा विश्वमभिव्याप्य संप्रविष्टोऽस्ति । देवास्त्रयस्त्रयस्त्रिशद्वा, त्रिशतमुत त्रिसहस्रं, आहोस्वित् त्रिंशत्कोटिपरिगणिताः इत्यादीनां प्रश्नानां समेषा मपि एक मेव समाधानं भवितुं अर्हति यत् सर्वत्र विद्यमानो देवः एक एवेति । तदेव ब्रह्मेत्युच्यते ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

List of Subscribers of Gairvani

Sri Koganti Seetharamacharyulu, Old Pattabhipuram, Near Pattabhipuram High School, Guntur.	4-00
Sri Ch. Subramanyam, M. A. Vijayawada — 4.	4-00
Sri K. A. Krishnamacharyulu, M. A. Guntur — 1.	25-00
Sri V. Sampathkumaracharyulu, M. A. Guntur — 2.	4-00
Sri L. Narayana Rao, M. A. Guntur.	4-00
Sri R. V. A. M. Sarma, Bhilai — 1.	4-00
Sri Nanduri Venkateswara Rao, B.SC. B. ED., Guntur — 4	4-00
Sri Salaka Raghunadha Sarma, M. A. Ananthapuram.	4-00
Sri K. V. K Rao, Guntur — 4.	4-00
Sri P. S. Ramachandra Murthy, M. A. Guntur — 4.	4-00
Sri Ch. Sambasiva Rao, M. A. Srikakulam.	4-00
Sri Potalapalli Seetharama Rao, Vijayawada — 4.	116-00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. *Postal C. T. R. 11.*

आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.

Licensed to Post without Prepayment. LICENCE No. 57.

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ४-००

प्रहेलिका

मातृशब्देन सम्बन्धो जकारस्य तु सम्भवेत् ।
तदा तत्पदावाच्यत्वं सुतानाथस्य उच्यते ॥

(जामाता)

— ति. गो. अनन्तसुब्रह्मण्यम्, तिरुपति.

Published by Sri N. Ramanatha Aiyer B. A., B. L., Advocate & Secretary S. B. P. Sabha, Chittoor, A. P.
Printed by Sri K. V. Raghavan, (in-charge) at Vijaya Press, Chittoor (A. P.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरध्वनि - "संस्कृतम्"

वाणीं भजत गैर्वाणीम् !

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आं. प्र.) भारतम्.

संपुटः १२ | 15 th AUGUST 1974 | क्रमांकः ७

नवदेहल्यां अस्मत्सभाकेन्द्रम्

श्री के. यस्. रावः, अस्मद्देहली प्रचारकः,
तद्दक्षिणभागे श्रीवत्सबालमन्दिर संस्थापकः श्री चक्रदेवः

आनन्द-श्रावणाङ्कः | शकाब्दाः १८९६ | मूल्यम् ०-५० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूची

१.	दैवीवाक्	१
२.	संपादकीयम् (आकाशवाण्यां अमरवाणि:)	२
३.	दशावतारस्तोत्रम्	३
४.	गजेन्द्रमोक्षणकथा	५
५.	श्रीरामवर्णमालास्तव:	९
६.	अञ्जलिमहिमा	१३
७.	वर्षाऋतु	१७
८.	गणेशकरावलम्बस्तोत्रम्	१८
९.	तपोवनम्, चित्तूरु	१९
१०.	संस्कृतदिनोत्सव:	२०
११.	लोकेऽस्मिन् सर्वंक्रुद्धनम्	२१
१२.	सुभाषितानि	२५
१३.	प्रजासंस्कृतपरिषत्, गुंटूरु द्वितीयवार्षिक प्रारंभोत्सव:	२७
१४.	पुस्तकसमीक्षा	२८
१५.	श्रीशंकराचार्य:	

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवीवाक्

अग्ने यं यज्ञ मध्वरं विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति ॥

हे अग्ने ! त्वं यं यज्ञं विश्वतः सर्वासुदिक्षु, परिभूः परितः प्राप्तवानसि, स इन् = स एव यज्ञो देवेषु तृप्ति प्रणेतुं स्वर्गं गच्छति । कीदृशं यज्ञं ? अध्वरं = हिंसारहितं । न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति ।

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।
देवो देवेभि रागमत् ॥

अय मग्निर्देवो देवेभिः = अन्यैर्देवैः हविर्भोजिभिः सह आगमत् = अस्मिन् यज्ञे समागच्छतु । कीदृशोऽग्निः ? होता = होमनिष्पादकः, कविक्रतुः = कविशब्दः क्रान्तवाची, क्रतुकर्म वा प्रज्ञानं वाऽभिधत्ते । अतः क्रान्तप्रज्ञः क्रान्तकर्मा वा । सत्यः=अनृतरहितः; फलमवश्यं प्रयच्छतीत्यर्थः । चित्रश्रवस्तमः = श्रूयते इति श्रवः कीर्तिः, अतिशयेन विविधकीर्तियुक्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

आकाशवाण्यां अमरवाणिः

महदिदं प्रमोदस्थानं, यत्केन्द्राधिकारिनिर्देशात् १९७४ जून् ३० तिथितः आरभ्य प्रातः नवघण्टा समये पञ्चनिमेषपर्यन्तं आकाशवाण्यां प्रतिदिनं वार्ताः पठ्यन्ते। एतस्मिन् वार्ताश्रवणे, संस्कृतज्ञा न केवलं, किन्तु अनभिज्ञा अपि समुत्सुका वर्तन्त इति सुविदितमेवैतत्। सर्वेषामपि मनोरञ्जने गैर्वाण्याः तादृशी शक्तिरस्तीति सुनिरूपितमासीत्। प्रशंसापत्राणि देशस्य कोणकोणेभ्य अतितरामापतन्ति च। सर्वोऽपि जनः अर्थावगतिं प्राप्नुवन्तीति कथने न काप्यतिशयोक्तिः। एतत्कार्यक्रमनिर्देशकतॄन्वयं बहुधा अभिनन्दामः। संस्कृतस्य इतोधिकाऽत्यन्तव्याप्तेरयं कार्यक्रमः मुख्यं साधनञ्च भवतीति वक्तुं शक्यते। रात्रावपि, संस्कृतवार्ता प्रसारः करणीय इति प्रभुताम्भ्यर्थयामः।

आकाशवाण्यां गैर्वाणवाण्याः प्रसारः जातीयतैक्यकरणे महान्तमुपकारमातनोतीति निश्चिप्रचमेव। स्वातन्त्र्यसंपादनानन्तरमस्मत्प्रभुतया संस्कृतस्य व्याप्त्यै बहुधा श्रद्धा आधीयते। किन्तु एतन्नालमिति मन्यामहे। प्रतिविद्यालयं एकः संस्कृतोपाध्यायः निवेशनीयः। सर्वेषाऽमपि विद्यार्थिनां संस्कृतमवश्यपठनीयत्वेन निर्णयः कार्यः। संस्कृतोपाध्यायानां किञ्चिदधिकतया वेतनादिषु आधिक्यं प्रदर्शनीयम्। विना जातिमतभेदं संस्कृताभ्यासकानां विद्यार्थिनां उचितभोजनप्रदानं न केवलं, अपितु उपकारवेतनादिकमपि दीयेत, तदा क्षिप्रमितोधिकां व्याप्तिं संस्कृतं प्राप्नुयादिति विज्ञाप्यते।

आकाशे "उत्पन्नश्शब्दः आकाशे विनष्ट" इति, न्यायस्य दूरीभवन्नयं आकाशवाण्यां संस्कृते वार्ताप्रसारः इतोऽप्यधिकं समयं प्राप्नुवन् चिरं विलसतु इति प्रार्थयामः। ***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशावतारस्तोत्रम्

श्री डा. वेमूरि आंजनेयशर्मा.

मीन - प्रहर्षिणी

हृत्वा तन्निगमधनं विधेः सकाशा-
दंभोधिं गतमसुराधमं निहन्तुं;
मीनोऽभूर्गुरुकृपयाऽभयप्रदायिन्
रूपं तत् तव कलयामि सर्वरूप ॥

कूर्म - मंजुभाषिणी

विभवेप्सया सुरगणैः पयोनिधौ
मथितेतु मंदरगिरौ निमज्जति ।
वरकूर्मरूपमुपगम्यशैलमु-
द्धृतवांस्त्वमीशतदहं स्मरामि ते ॥

वराह - द्रुतविलंबितम्

सकलजीवधरामवनिं पुरा
जलनिधौ विनिपातितुमुद्यतम् ।
तमसुरं कनकाक्षमहन् भवान्
वरवराहशरीर नमोऽस्तु ते ॥

नरकेसरि - हरिणी

दितिजतनयः प्रह्लादस्ते प्रपन्नगणाग्रणीः
त्वयि समधिकाद् वैरात् पित्रा भृशं खलु पीडितः ।
निजजनपरित्राणायाभूद् भवान् नरकेसरी
कनककशिपुं हंतुं च त्वा महं हृदि भावये ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिविक्रम - पुष्पिताग्रा

सकलसुरगणान् विजित्य नाकं
समधिगतस्य बलेर्विलंभगर्वम् ।
परिशिथिलयितुं त्रिविक्रमोऽभूः
तमज, भजे तव वामनावतारम् ॥

वीरविप्रानुष्टुम्

जमदग्निसुतो भूत्वा क्षत्रियान् पितृघातुकान् ।
जघान यः परशुना वीरविप्रं नमामि तम् ॥

रामवसंततिलकम्

आपूरिता दशरथेश्वर पुत्रकाम्या
यस्योदयेन, निहतो दशकंधरोऽपि ।
लीलातिरोहित निजप्रतिभं परेशम्
तं दिव्यतैकनिलयं कलयामि रामम् ॥

कृष्णानुष्टुम्

निराकारं परं ब्रह्म नराकारमवाप यम् ।
गीतामृतं येन दुग्धं कृष्णाख्यं तं नमाम्यहम् ॥

गौतम - पृथ्वी

अपारकरुणोदयं निखिलचेतनव्रातके
प्रसन्नघनतेजसं विमलतालसन्मानसम् ।
प्रशांतिविभवास्पदं स्वगतसच्चिदानंदनम्
ऋषिप्रभुमनारतं मनसि भावये गौतम् ॥

कल्क्यनुष्टुम्

शिक्षार्थं धर्मबाह्यानां सुजनान् परिरक्षितुं ।
धर्तासि कल्किरूपं ते भावये तत् परात्पर ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

गजेन्द्रमोक्षणकथा

'बोधकररत्नम्', 'रामायणज्योति', 'उपन्यासचक्रवर्ती'
मु. वि. श्रीनिवासाचार्यः, अवलूर्.

पुरा द्राविडान्तर्गते पाण्डच-देशे इन्द्रद्युम्नः इति राजा बभूव। सः प्रजापालनतत्परः नित्यनैमित्तिककर्मानुष्ठानधुरंधरः, भगवद्भागवतभक्तिमान्, भगवदाराधनबद्धश्रद्धः, सर्वशास्त्रविचक्षणश्च आसीत् । अथ कदाचित् कस्मिंश्चित् दिने पूजागृहं आगत्य भगवत्येकाग्रचित्तः गृहीतमौनव्रतः पूजां कृत्वा हरिमेव ध्यायन्नास्त । तस्मिन्नवसरे देवर्षिः नारदः भूलोके संचरन् अन्ततः राज्ञः इन्द्रद्युम्नस्य पूजागृहं आगच्छत् । तत्र क्षणमिव स्थित्वा पूजागृहे भगवध्यानमग्नं राजानं दृष्ट्वा स्वमनसि तं विष्णुभक्तं प्रशंसन् तूष्णीं अतिष्ठत् । मुहूर्तकालं स्थितः नारदः तस्मात् स्वागतनिवेदनं अपेक्षमाणः शनैश्शनैः "हे राजन्, इन्द्रद्युम्न" इति आह्वानध्वनिं अदात् । ध्यानमग्नः राजा तु नारदागमनं तस्याह्वानचेष्टां च नावुधत् । कोपाविष्टः मुनिवरः "गजो भूत्वा वने संचर" इत्यशपत् । तच्छापमपि राजा नाशृणोत् । शापं तस्मै निवेद्यैव गन्तव्यमिति मन्वानः मुनिः तत्रैव चिरं तूष्णीं अवर्तत । अथ राजा यदा ध्यानं परिसमाप्य उन्मीलितलोचनः इतस्ततः पश्यति तदा मुनिपुंगवं दृष्ट्वा विनीतवेषः साष्टांगप्रणामकरणोद्युक्त आसीत् । तमवलोक्य मुनिः "रे मूर्ख, किमिति तव प्रणामः? भागवतापचारः कृतः त्वया "आराधनानां सर्वेषां विष्णोराराधनं परम् । तस्मात् परतरं प्रोक्तं तदीयाराधनं परम्" इति सकलशास्त्रज्ञेन त्वया कथं न ज्ञायते ? प्रथमतः त्वया क्रिय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणं आराधनं भगवद्ध्यानं च प्रशंसन् आसम्। मुहूर्तकालं स्थित्वापि ममाऽगमनं मम ध्वनिं च त्वं तु न ज्ञातवान्। अथ भागवतापचारयुक्तं त्वां "गजो भव, वने संचर" इत्यशपम्। तदपि त्वया न ज्ञातम्। साक्षात् शापं निवेद्य गन्तव्यमिति तव बहिश्चिन्तां प्रतीक्ष्य तिष्ठामि "शापमनुभव" इति राजानं अवोचत्। राजा इन्द्रद्युम्नः तच्छापं शिरसा अंगीकृत्य महामुनिं अगस्त्यं इत्थं प्राह च – "प्रभो, भागवतापचारस्य फलं तु मया अनुभोक्तव्यमेव, किन्तु गजरूपग्रहणानन्तरमपि भगवदाराधनचिन्ता मन्मनसि नित्यं भवतु इति भवन्तः अनुगृह्णन्तु" इति। तादृशीं राज्ञः प्रार्थनां अंगीकृत्य 'तथा भवतु इत्युक्त्वा मुनिश्श्रेष्ठः कुंभसंभवः' यथागतं अगात्। झटिति राजापि गजरूपं प्राप्य वने संचरति स्म। प्रतिदिनं स गजः यत्रकुत्रापि तटागात् पंकजपुष्पं गृहीत्वा वनात् ग्रामं वा नगरं वा आगत्य यत्र विष्णवालयः वर्तते, तत्र स्थित्वा शब्दं कृत्वा तिष्ठति स्म। तच्छब्दं श्रुत्वा अर्चकः बहिः आगम्य पश्यति, तदा गजः शुण्डेन गृहीतं तामरसपुष्पं तस्य हस्ते दत्वा भगवदर्पणं कुरुत इति संज्ञां करोति स्म। अर्चकश्च तत्पुष्पं भगवतः चरणारविन्दयोः समर्प्य पुनः तत् कुसुमं गजाय यच्छति स्म। अनन्तरमेव गजः यथागतं गत्वा स्वाऽभ्यवहारं करोति स्म। इत्थं तस्य गजस्य गतिः चलति स्म। अनेन रीत्या बहवो संवत्सराः गताः। अन्ते गजशापविमोचनकालः आगतः। भूलोके अनावृष्टिः समजायत। तेन कारणेननद-नदी-कासारतटाकाःजलरहिता अभवन्। गजस्तु इतस्ततः कमलपुष्पहरणाय जलाशयान् विचिनोति स्म। जलरहितान् बहून् कासारान् तटागान् वीक्ष्य किंकर्तव्यतामूढहृदयः हस्ती स्वमनसि इत्थं अचिन्तयत्– अद्यास्मिन् दिने भगवदाराधनं विना कथं मम आहारः गृहीतव्यः तामरसपुष्पं विना भग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वदाराधनं कथं कर्तुं शक्यं, तेन हि मम मरणमेव भविष्यति" इति। विचिन्त्यैवं वने परिभ्रमन् अन्ततः कस्मिश्चित् पादपमूलं आगत्य श्रमपरिहारं करोति स्म। तदानीं आकाशे केचन पक्षिणः डयमाना आसन्। तेषां पक्षेभ्यः तेषां चलनेन जलबिन्दवः गजमस्तके कतिचन अपतन्। जलबिन्दूनां शैत्यस्पर्शात् वारणराजः, दूरे कोपि जलाशयः वर्तते इति द्योतते इति मत्वा तरुमूलात् तत्राजगाम। तत्र आश्चर्यभूतं अतिमनोहरं कमलपुष्पभरितं अगाधं जलाशयं तटागं दृष्ट्वा परमानन्दपूर्णः जले अवतीर्य पुष्पाणि अवचिनोति स्म। तदानीं तत्र वर्तमानः ग्राहः गजस्य पादमेकं स्वदन्तैः गृहीत्वा दष्ट्वा खादति स्म। गजस्तु सन्तोषाधिक्यात् तन्न ज्ञातवान्।

पुष्पाणि लतया बद्धवा तानि गृहीत्वा मस्तके निक्षिप्य यदा तीरं गन्तुं उपरि पदानि निक्षेप्तुमारभत तदा जलाशयात् उपरि आगन्तुं न शशाक। गजः यथाशक्ति उद्युक्तोपि मकरबलं अधिकऽमासीत्। नक्रदशनपीडाधिक्यात् स्वपादव्रणं असहमानः हस्ती उच्चैः अक्रन्दत्। गजरोदनशब्दं श्रुत्वा वनगजाः बहवः तं उद्धर्तुं तत्र आगमन्। सर्वेपि गजाः तटागे ग्राहेण पीडितपादं वारणं स्वशुण्डैः गृहीत्वा आकर्षन्ति स्म। तथापि ग्राहस्य बलं अधिकमेवासीत्। तदा पीडितगजः स्वजीवनाशां परित्यज्य इन्द्रब्रह्मरुद्रादीन् देवान् आह्वयति स्म। तेपि गजसमीपं आगमन्। तान् दृष्ट्वा गजराजः इत्थम् प्रार्थयामास "भो देवाः मम तु स्थले सिंहमयं जले मकरमयं च वर्तते। तस्मात् भयरहितं नित्यं शरीरं मह्यं दत्वा अनुगृह्णन्तु इति। विष्णुं नारायणं विना सर्वेपि देवाः 'नित्यशरीरप्राप्तिं विना अन्यं वरं वृणीष्व। नित्यशरीरदाने वयं न समर्थाः" इति प्रत्यब्रुवन्। तदा गजः तादृशीं देववार्तां श्रुत्वा, आस्तां तावत् तेषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्तिः, अमीषां देवानां नियन्ता कश्चित् नूनं वर्तते तस्य नाम किमिति न ज्ञायते। तथापि इत्थं संबोधनं कृत्वा आह्वयामीति मनसि विचिन्त्य आदिमूल! इति उच्चैः आक्रोशत्। पर-व्यूह-विभव-अर्चा-अन्तर्यामी स्वरूपः श्रीमन्नारायणः गरुडारूढः तत्रागत्य सुदर्शनचक्रायुधेन मकरं छित्वा गजं अरक्षत्। शंख-चक्र-धारिणं चतुर्भुजयुक्तं पक्षिराजारूढं भगवन्तं विष्णुं नारायणं दृष्ट्वा "प्रभो आदिमूल! नित्य-शरीरं दत्वा मां पाहीऽत्यवदत्। तथा कृत्वा तं गजराजं भगवान् ररक्ष। तदैव चक्रस्पर्शप्रभावात् नक्रश्च स्वकं रूपं परित्यक्तः हूहूनाम गन्धर्वो भूत्वा भगवन्तं प्रदक्षिणीकृत्य पूर्वं प्राप्तशापात् विमुक्तः गन्धर्वलोकं अगात्। भागवतपादस्पर्शप्रभावः पाप-शापविमोचनहेतुरिति ज्ञायते ननु? उक्तम् च—

आराधनानां सर्वेषां
विष्णोराराधनं परं।
तस्मात् परतरं प्रोक्तं
तदीयाराधनं परम्॥

नक्राक्रान्ते करीन्द्रे मुकुलितनयने
मूलमूलेति खिन्ने
नाहं नाहं नचाहं न च
भवति पुनस्तादृशोमादृशेषु
इत्येवं त्यक्त हस्ते सपदि
सुरगणे भावशून्ये समस्ते
मूलं यत्प्रादुरासीत् स दिशतु
भगवान् मंगलं सततं नः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरामवर्णमालास्तवः

अन्तस्समस्तजगतां यदनुप्रविष्टं
आचक्षते मणिगणेष्विव सूत्रमार्याः ।
तं केलिकल्पितरघूद्वहरूपमाद्यं
पङ्केरुहाक्षमनिशं शरणं प्रपद्ये ।।

आम्नायशैलशिखरैकनिकेतनाय
वाल्मीकिवाग्जलनिधिप्रतिबिम्बिताय ।
कालाम्बुदाय करुणारसमेदुराय
कस्मैचिदस्तु मम कार्मुकिणे प्रणामः ।।

इन्दुं प्रसादमवतंसयता त्वदीयं
कोपं करे हुतवहं वहता करेण ।
शङ्के जगत्त्रयमनुग्रहनिग्रहाभ्यां
संयोज्यते रघुपते समयान्तरेषु ।।

ईदृग्विधस्त्वमिति वेद न सोऽपि वेदः
शक्नोति कस्स्थितमवेक्षितुमुत्तमाङ्गे ।
श्रोतुं क्षमं न तु मृषेक्षितुमप्यतस्त्वां
सर्वे विदन्तु कथमीश कथं स्तुवन्तु ।।

उष्णांशुबिम्बमुदधिस्मयघस्मरास्त्र-
ग्रावा च तुल्यमजनिष्ट गृहं यथा ते ।
वाल्मीकिवागपि मदुक्तिरपि प्रभुं त्वां
देव प्रशंसति तथा यदि कोऽत्र दोषः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊढः पुराऽसि विनतान्वयसम्भवेन
देव त्वया किमधुनाऽपि तथा न भाव्यम् ।
पूर्वे जना मम विनेसुरसंशयं त्वां
जानासि राघव तदन्वयसम्भवं माम् ॥

ऋक्षं प्लवङ्गमपि रक्षसि चेन्महात्मन्
विप्रेषु किं पुनरथाऽपि न विश्वसामः ।
अत्राऽपराध्यति किल प्रथमद्वितीयौ
वर्णौ तवौदनतया निगमो विवृण्वन् ॥

नृणां न केवलमसि त्रिदिवौकसां च
राजा यमार्कमरुतोऽपि यतस्त्रसन्ति ।
दीनस्य वाङ्मम तथाऽपि तते तव स्यात्
कर्णे रघूद्वह यतः ककुभोऽपि जाताः ॥

क्लृप्तामपि व्यसनिनी भवितव्यतां मे
माथाऽन्यथा कुरु तव प्रभुतां दिदृक्षे ।
चक्रे शिलाऽपि तरुणी भवता तदास्तां
मायाऽपि यद्घटयते ननु दुर्घटानि ॥

एकं भवन्तमृषयो विदुरद्वितीयं
जानामि कार्मुकमहं तु तव द्वितीयम् ।
श्रुत्याऽऽश्रिता जगति मद्गुणघोषणा सा
दूरीकरोति दुरितानि समाश्रितानाम् ॥

ऐशं शरासमचलोपममिक्षुवल्लि-
भञ्जं बभञ्ज किल यस्तव बाहुदण्डः ।
तस्य त्वशीतकरवंशवतंस शंस
किं दुष्करो भवति मे विधिपाशभङ्गः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओजस्तव प्रहितशेषविषाग्निदग्धैः
स्पष्टं जगद्भिरुपलभ्य भयाऽऽकुलानाम् ।
गीतोक्तिभिस्त्वयि निरस्य मनुष्यबुद्धि
देव स्तुत्योऽसि विधिविष्णुवृषध्वजानाम् ॥

औत्कण्ठ्यमस्ति दशकण्ठरिपो ममैकं
द्रक्ष्यामि तावकपदाम्बुरुहं कदेति ।
अप्येति कर्म निखिलं मम यत्र दृष्टे
लीनाश्च यत्र यतिभिस्सह मत्कुलीनाः ॥

अम्भोनिधाववधिमत्यवकीर्य बाणान्
किं लब्धवानसि ननु श्वशुरस्तवाऽयम् ।
दृष्ट्वाऽपनेतुमथवा यदि बाणकण्डूः
देवाऽयमस्त्यनवधिर्मम दैन्यसिन्धुः ॥

अश्रान्तमर्हति तुलाममृतांशुबिम्बं
भग्नाम्बुजद्युतिमदेन भवन्मुखेन ।
अस्मादभूदनल इत्यकृतोक्तिरीशं
सत्या कथं भवतु साधु विवेकभाजाम् ॥

कल्याणमावहतु नः कमलोदरश्रीः
आसन्नवानरभटौघगृहीतशेषः ।
श्लिष्यन्मुनीन्प्रणतदेवशिरःकिरीट-
दाम्नि स्खलन्दशरथात्मज ते कटाक्षः ॥

खं वायुरग्निरुदकं पृथिवी च शब्द-
स्स्पर्शश्च रूपरसगन्धमपि त्वमेव ।
ध्यानाय किन्त्वविदुषां दययात्तबन्धो
धत्से वपुश्शरशरासभृदभ्रनीलम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गङ्गा पुनाति रघुपुङ्गव यत्प्रसूता
यद्रेणुना च पुपुवे यमिनः कलत्रम् ।
तस्य त्वदङ्घ्रिकमलस्य निषेवया स्यां
पूतो यथा पुनरघेऽपि तथा प्रसीद ।।

घण्टाघणंघणितकोटिशरासनं ते
लुण्टाकमस्तु विपदां मम लोकनाथ ।
जिह्वालतां वहति यद्भुजगो रिपूणां
उष्णैरसृग्भिरुदरम्भरिणा शरेण ।।

प्राङस्यवाङसि परेश तथाऽसि तिर्यङ
ब्रूमः किमन्यदखिला अपि जन्तवोऽसि ।
एकक्रमेऽपि कति वा भुवि न भ्रियन्ते
मन्दस्य राघव सहस्व ममाऽपराधान् ।।

चण्डानिलव्यतिकरक्षुभिताम्बुवाह-
दम्भोलिपातमिव दारुणमन्तकालम् ।
स्मृत्वाऽपि सम्भविनमुद्विजते न धन्यो
लब्ध्वा शरण्यमनरण्यकुलेश्वरं त्वाम् ।।

छन्नं निजं कुहनया मृगरूपभाजो
नक्तञ्चरस्य न किमाविरकारि रूपम् ।
त्वत्पत्रिणाऽपि रघुवीर ममाऽद्य माया-
गूढस्वरूपविवृतौ तव कः प्रयासः ।।

जन्तोः किल त्वदभिधाम मणिकर्णिकायां
कर्णे जपन्हरति कश्चन पञ्चकोशान् ।
इत्यामनन्ति रघुवीर ततो भवन्तं
राजाधिराज इति विश्वसिमः कथं वा ।।

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अञ्जलिमहिमा

श्री शेषाद्रि अय्यंगार्य:, न्यायाध्यापक:, S. V. O. C. श्रीपदपुरम्.

बद्धाञ्जलिं नतं दृष्ट्वा वितरन् सकलं फलं। योऽतृप्यन् लज्जते देव: नतोऽस्म्यञ्जलिकिंकरम्।

लोके तावत् अपराधिनां दासानां स्वामिप्रसादने शरणागते: तुल्य: कोप्यन्य: उपाय: नास्ति। अतएव तैत्तरीयब्राह्मणे "तस्माद्वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति" इति वधार्होऽपि प्रपन्न: स्वामिना क्षन्तव्य एवेत्युपदिष्टम्। रक्षणकुशल: दयाळुश्च, य: शत्रुमपि पादयो: पतितं न परित्यजति स इति "स तं निपतितं भूमौ शरण्य: शरणागतं वधार्हमपि काकुत्स्थ: कृपया पर्यपालयेत्" इति काकासुरवृत्तान्तकथनावसरे वाल्मीकिनोक्तम्। "अनतिक्रमणीयं हि चरणग्रहणं" इति रक्षिका:।

शरणागतिर्नाम कुपितस्य प्रभो: प्रसादजनक: सुलभ: उपाय:। स च मनोवाक्कायै: त्रिभि: क्रियमाण: पूर्ण: इत्युच्यते। श्रीरामायणे वनं प्रति प्रस्थितस्य भ्रातु: पादयो: पतित्वा लक्ष्मण: शरणागतोऽभूदिति "स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दन:" इत्यवाच। विभीषणशरणागति घट्टे "सर्वलोकशरण्याय राघवाय महात्मने। निवेदयत मां क्षिप्रं विभीषणमुपस्थितं" इति वाचा पूर्वं विभीषण: स्वप्रपत्तिं निवेदयति। इति बहूनि उदाहरणयोग्यानि। तत्र कथित: शरणागतिव्यापार: नमस्कार:। स चाञ्चलिरूप:। तत्र "बद्धाञ्जलिपुटा: हृष्टा: नम: इत्येववादिन:" इत्यादिषु तस्य नम: शब्द साहचर्यमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतीतम् । तस्य माहात्म्यं सहस्र-वदनेनापि दुर्वर्णनमिति प्रति-भाति । मादृशस्य मितंपचस्य तत्प्रतिपादने का शक्तिः ? तथा हि ।

अञ्जलिना नरः स्वकीयं प्रेम, भक्ति, कार्तज्ञ्यं, शरण-वरणं, आकिञ्चन्यं, दैन्यं, अनन्यगतितां, रक्षापेक्षां, अप-राधक्षमायाञ्चां, स्वापकर्षं, परोत्कर्षं, दास्यं इत्यादिकं बहुना वाक्प्रपञ्चेन प्रकटनीयं सर्वं प्रकटयति । यदि वयं कंचन प्रियसुहृदं बहोः कालादनन्तरं पश्येम, तर्हि स्मेरमुखाः साञ्ज-लिबन्धं कुशलंच्छामः । अधुना पुनः पाश्चात्य संस्कृतौ मुग्धाः नागरिकाः एकहस्तेन प्रणमन्ति । बहोः कालात् पूर्वं आरभ्य मह-र्षिभिः प्रवर्तितायां भारतीय-संस्कृतौ करद्वयप्रणाम एव आदृतः इति तदाचरणमेवास्माकं समी-चीनम् ।

"तौ युतावञ्जलिः पुमान्" इत्यमरकोशे तत्स्वरूपं उप-दिष्टम् । प्राचामाचारश्च रामा-यणादिभिः ज्ञेयः । तत्र "शिर-स्यञ्जलिमाधाय कैकेय्यानन्द-वर्धनः । बभाषे भरतो ज्येष्ठं" इत्यादिषु भ्रातृ प्रभृतिषु विनय-प्रदर्शनावसरे कनिष्ठैः आचरित-तया प्रतीयते । देवालयेषु आञ्जनेय वैनतेयादि भक्तानां उत्सवमूर्तयः साञ्जलिमुद्रा एव प्रतिष्ठिताः दृश्यन्ते । देवालय-निर्मातृणां कृष्णदेवरायादि-नृपाणां प्रतिमा अपि तथैव स्तंभेषु शिल्पिभिः निर्मिताः । अतोऽयं प्राचीनः आचार इति अकामैरप्यंगीकार्यम् ।

भगवद्भक्तिपरीवाहभूतेषु स्तुतिनमस्कारकीर्तनार्चनगान - भजनादिषु अञ्जलिरेव पूर्वभावी सुसाध्यो मुख्यश्च । शत्रोः सकाशादपि प्राणरक्षणं अञ्जलि-वेषवक्तृतमिति बहुभिर्वृत्तान्तै-रवगम्यते । "बद्धाञ्जलिपुटं दीनं योहन्याद्वैरिणं, तादृशस्य नरकानुभवः जन्मान्तरे, इह-जन्मनि साधुसंसदि गर्हणं च भवति । "ब्रह्मघ्ने च सुरापे च स्तेने च गुरुतल्पगे । निष्कृति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहिता शास्त्रैः कृतघ्ने नाऽस्ति निष्कृतिः" इति कृतोपकारविस्मरणदोषः पञ्च महापातकानप्यतिशेते । नरः उपकृतवते जनाय अञ्जलिना कृतज्ञतामाविष्कुर्वन् उक्तं दोषमपि अनायासं दूरीकुर्वन् आत्मानं रक्षति ।

अञ्जलिमुकुले कराभ्यां धृते सति तत्समानेन तस्मात् अभ्यधिकेन वा अर्हणेन अप्रसन्नोऽपि भगवान् प्रसीदति । अतएव "तेजमान अणिकलनुं ऍन् कैंकूप्पुच्चैऽकैंये" इति द्राविड सहस्रगीत्यां शठकोपसूरिः ऊचे । भावस्तु-बाह्याडम्बरभूतैः सुवर्णरत्नादिभूषणैः भूषितो भगवान् न प्रसीदति किन्तु मदीयाञ्जलिबन्धेनैव हृदयपुण्डरीकस्थो हरिः भूषितो मोदते" इति अं=जलयति-दयार्द्रं जलवच्छीतं, प्रसन्नं करोतीति अञ्जलिः । अथवा लडयोरभेदात् अं=जडयति - सर्वज्ञमपि जडं अपराधानभिज्ञं करोतीत्यञ्जलिः । अव रक्षणे इति धातोः अवतीत्यर्थे "अ." इति शब्दः सर्वरक्षणोपयुक्तकारुण्यवात्सल्यादि कल्याणगुणाकरं भगवन्तमभिधत्ते । अतो भगवन्तं नारायणमेव अस्मासु मुग्धं करोति चेत् लौकिकजनप्रसादनेऽस्यांजलेर्महिमा किमु वर्णनीया?

नास्तिकतया श्रद्धाभक्तिहीनो यः पुरुषः जीवन् कदाऽपि बुद्धिपूर्वं भगवन्तं नैव नमोऽकरोत्, सः अन्त्यकाले समीपगतैः प्रयासात् बद्धाञ्जलिः कृतः शरीरं विजहाति चेत् सोऽप्ययंजलिः तस्मै नि श्रेयसाय कल्पते इति "माळुमोरिडत्तिलुं वणक्कोडु माळ्वदुवलमे" इति द्राविडगीतेन शठकोपमुनिरगायत् । एतदनुसंधाय यामुनाचार्योऽपि स्वकीये स्तोत्ररत्ने "त्वदंघ्रिमुद्दिश्य कदाऽपि केनचिद्यथा तथावापि सकृत्कृतोऽञ्जलिः । तथैवमुष्णात्यशुभान्यशेषतः शुभानि पुष्णाति न जातु हीयते" इति तद्वैभवं व्यशदयत् । अत्र "सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधिः । रक्षते भगवान्विष्णुः भक्तानात्मशरीरवत्" इति सर्वाधिकत्वेन कथितेभ्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मार्जनोपलेपन - मालाकरण-दीपारोपणादि प्रसादनानन्तरेभ्यः समधिकं बहुवित्तव्ययायासनिरपेक्षं विवक्षितस्य सुकरं स्वरूपमाहे"ति वेदान्ताचार्य एतच्छ्-श्लोकमवतारयामास ।

एतेनाञ्जलेः कैङ्कर्यरूपपुरुषार्थरूपतया स्वयं आनन्दात्मकतया अत्र स्वरसतः सतां प्रवृत्तिरपि गम्यते । स्वामि प्रीतिजनकस्य तदाज्ञप्तस्य कर्मणः किल लोके कैङ्कर्यपदप्रयोज्यता ।

भागवतापचारमपि अञ्जलिः परिहरति । नान्यः । श्रीरामायणे किष्किन्धाकाण्डे श्रीलक्ष्मणस्य कोपपात्रभूतं सुग्रीवं प्रति हनुमदादेशः "कृतापराधस्य हितेनान्यत्पश्याम्यहं क्षमं । अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात्" इति ।

दर्शपूर्णमासादिः स्वर्गसाधनं धर्मः बहुकालव्यवहितफलदायकः । "अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादनी" इति तदात्वे एव फलोपधायकतया प्रमणेषूक्तः । कृच्छ्रचान्द्रायणोपवासादिरूपः प्रायश्चित्तधर्मः कस्यचन प्रतिनियतस्यैव पापस्य निवारकः । किंतु सर्वपापप्रतिभूरञ्जलिः । वेदान्तदेशिकः "हस्तीशदुःखविषदिग्धफलानुबन्धिन्याब्रह्मकीटमपराहत संप्रयोगे । दुष्कर्मसञ्चयवशाद्दुरतिक्रमे नः प्रत्यस्त्रमंजलिरसौ तव निग्रहास्त्रे" इत्याह । यदि युद्धे रिपुणा नारायणास्त्रं प्रयुज्यते तदा यद्यंजलिं बद्ध्वा नमस्क्रियते तर्हि तदस्त्रं प्रतिनिवृत्य प्रयोक्तुः इषुधिमधिशेते । एवं आब्रह्मस्तम्बमपरिहार्ये निग्रहसङ्कल्परूपे दुःखफलप्रदे अस्त्रे भगवता प्रयुक्ते प्रायश्चित्तादिकं तत्र प्रत्यस्त्रं न भवितुमर्हति । अपितु अजलिरेव प्रत्यस्त्रं, येन प्रयुक्तेन स्वेरितं निग्रहास्त्रं भगवान्प्रतिसंहरति इति भावः । पराशरभट्टारका अपि सांजलिबन्धं रङ्गनायिकां संसेव्य लज्जयेव किञ्चिदवनतमुखीं देवीमालोक्य "ऐश्वर्यमक्षरगतिं परमं पदं वा, कस्मैचिदंजलिभरं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहते वितीर्यं । अस्मै न किंचिदुचितं कृतमित्यथाम्ब ! त्वं लज्जसे कथय कोऽयमुदारभाव:" इति उत्प्रेक्षते । अल्पमप्यंजलिभारं वहन्तं स्वस्मै प्रत्युपकाररहितं उपकर्तारं च आश्रितं मन्यमाना देवी तस्मै मुक्त्यन्तमैश्वर्यं दत्वा दातव्यस्य अनवशिष्टतया अन्यस्य च दातुमशक्यतया लज्जसे इव दृश्यसे इति भाव: ।

अत: क्रूरे कलौ लब्धजन्मनोऽपि वयं सुलभेनांजलिना भगवन्तं संप्रसाद्य स्वाभीष्टं पूरयितुं समर्था: ।

अञ्जलेर्महिमानन्नन-
मितप्रज्ञगोचर: ।
वार्धिनिर्देशनयत:
किञ्चिदेव प्रदर्शित: ॥

इति शम् ।

वर्षाऋतु:

कवि: काव्यतीर्थ ज. व्यं. पल्लेबार: उपाख्य: जयेश:, M.A. LL.B.
पुसद. (महाराष्ट्र)

नृत्यन्ति वर्षागमनात् मयूरा: नर्दन्ति नद्यो नवनीरनर्तै: ।
स्फुटन्ति शीघ्रं नवपल्वलानि नवाम्बुफुल्लानि च पल्वलानि ॥
मदान्धतां गच्छति हस्तियूथम् मदप्रमत्ता वृषभा भवन्ति ।
हसन्ति मुग्धा: हतधीकृषाणा: त्यजन्ति यात्रां पथिका: प्रियोत्का: ॥
क्लिन्नाम्बुधारै: धरणी सुगन्धा तृणाङ्कुरैर्भूषितशाद्वलांगी ।
तटिल्लता ताडित चंचलांगी महेन्द्रचापांकितमोहनीया ॥
चिन्तापहारी खगचातकानाम् चित्तप्रहारां युवतीजनानाम् ।
कामातुरप्रोषितभर्तृकाणाम् संयोगकारी विरहार्तितानाम् ॥
वर्षाऋतुर्वर्षतु वर्षधारा: वर्षा समागच्छतु योग्यकाले ।
वर्षा समागच्छतु सस्यभूमिं वर्षा समागच्छतु कर्षके वा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गणेशकरावलम्बस्तोत्रम्

रचयिता— विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

गंगाधरात्मज गणेश गकारपूज्य
गौर्यङ्गपङ्ककृतदेह गजास्य देव ।
गीर्वाणवन्द्य गुहपूर्वज गानलोल
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

गर्जाविनिर्जितनिशाचरसंघ देव
गात्रानुलेपितसुगन्ध गिरीशपुत्र ।
गोपार्तिनाशनधुरन्धर गोपपूज्य
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

गान्तादिगेश करुणाकर दीनबन्धो
लम्बोदराऽद्रितनयात्मज सुन्दराङ्ग ।
सर्पैकभूषण विभो रदनैकदेव
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

पद्मेशपद्मभवपद्मकरार्चितांघ्रे
पापापनोदनविचक्षण पावनाङ्ग ।
पञ्चास्यवाहजननीमुखपद्मबन्धो
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

तर्कातिदूरमहिमान्वित तारकारि-
पूर्वोत्थ तूर्णवरदानसुसिद्धहस्त ।
तत्सत्स्वरूप तरुणारुणकान्तिकान्त
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येचेह लब्धजनना: भवसिन्धुमग्ना:
नित्यान्तरायतिमिनक्रझषादिदष्टा: ।
त्वत्पादपोततरणेन नितान्ततुष्टा:
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

नीत्वा त्वदीय पदपङ्कजमेव लोका:
निर्विघ्नकार्यकरणे हि भवन्ति दक्षा: ।
नाकेशमुख्य सुरलोक नुतांघ्रिपद्म
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

मोक्षप्रदाऽशु नतलोकजनस्य देव
मोदाहृतैककरमोदक मातृभक्त ।
माणिक्यभूषण सुमाणवकस्वरूप
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

तपोवनम्, चित्तूरु

चित्पुर्यां तपोवने गतवत्सरे स्थापितायां गौतमीजीवकारुण्य-संस्कृतप्राथमिकपाठशालायां श्रीमलयाळस्वामि संस्कृतोन्नतपाठ-शालायां च आगस्टमासे तृतीयदिने (३-८-७४) संस्कृतदिनोत्सव: श्रीचिदानन्दगिरिस्वामिनां आध्यक्ष्येण प्रचालित: । श्री पि. सुब्ब-राघवशर्मणा संस्कृतस्य प्राशस्त्यं पठनावश्यकतां उद्दिश्य उपन्यास: कृत: । पाठशालाप्रधानोपाध्यायेन धन्यवादा: अध्यक्षस्य उपन्यास-कस्य सभ्यानां च समर्पिता: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतदिनोत्सवः

३-८-७४ दिने सायं पञ्चघण्टावादनसमये संस्कृतभाषाप्रचारिणीसभाभवने संस्कृतदिनमधिकृत्य सभा प्रचलिता। मेजर् श्री के. राममूर्तिः (प्रांशुपालः, प्रभुत्वकलाशाला, चित्तूरु) अध्यक्षस्थानमलञ्चकार। सभायाः कार्यदर्शी श्री यन्. रामनाथार्यः दैवप्रार्थनाऽमकरोत्। ततस्स एव अध्यक्षस्य, सभ्यानाञ्च स्वागतं वदन्, एतन्महोत्सवकरणाऽऽवश्यकतां विशदीचकार। अनन्तरं अध्यक्षः श्री के. राममूर्तिः एवमभाषत– "एषा संस्कृतभाषा अतीव प्राचीनतमा। न केवलं भारतीयभाषाणां, अपितु प्रपञ्चे वर्तमानानां सकलानामऽपि भाषाणां मूलभूता वर्तते। विना जातिमतभेदं सर्वैरऽपि एषा भाषा अभ्यसनीया। अभ्यस्तसंस्कृतभाषाणां, यस्यां कस्याञ्चित् शाखायामुद्योगं कुर्वतां प्रत्येकवेतनं (Special Allavance) दातव्यं, तेन संस्कृतव्याप्तिरितोऽप्यधिकतरास्यात्। अस्मिन्विषये संस्कृताभिमानिभिः प्रयत्नः कार्यः" इति।

अनन्तरं श्री गोपालः (भूतपूर्वतमिलोपाध्यायः) तु "अधुनातनकाले संस्कृताऽभ्यासः सर्वेषा मावश्यकः पाश्चात्या अपि संस्कृताभिमानिनः वर्तन्ते। देशसमैक्यतायाः इयं भाषा अत्यन्तमुपकरोतीत्यवोचत्।

ततः श्री के. मुनिरेड्डिः (आन्ध्रप्रदेशसाहित्य अकाडमी सभ्यः) संस्कृतस्य अभ्यासे सर्वे अधिकारिण इति संस्कृतभाषा सरला, मनोहरा भारतदेशस्य उन्नतेः कारणमिति संस्कृतभाषायां उपन्यासं चकार।

अनन्तरं श्री टि. कामेश्वररायः संस्कृतभाषाकवीनां कालिदासप्रभृतीनां कवितामहत्वं प्रोवाच श्री के. सि. जयचन्द्रशास्त्री (सभायाः मानेजरः) संस्कृते संस्कृतस्य वैशिष्ट्यऽमाबभाषे।

अन्ततः श्री सुब्बराघवार्यः (स्थानिक - संस्कृतोपाध्यायः) संस्कृतं प्रशंसन् अध्यक्षस्य, सभ्यानाञ्च वन्दनसमर्पणऽमकरोत्।

एवं कार्यसरण्या सभाऽवसिता। ***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकेऽस्मिन् सर्वंकृद्धनम्

श्री ना. व. निगमान्तः, प्रोद्दुटूरु.

सा कृष्णपक्षीया रात्रिः। अञ्जननिभोऽन्धकारः सर्वत्र गाढं लिप्त इव अभासत। नववर्षतृषिता भेकाः आसन्नतटाकवासिनः "बकबकेति भृशं रटन्ति स्म। पामापीडितः कश्चन जरच्छ्वा कुत्रापि कुटीररन्ध्रेशयानः दीनमरोदीत्। नीरन्ध्रान्मेघपुञ्जात् उदकबिन्दवः वायुवशात्तदा तदा भुवि न्यपतन्। शीतवातमृदिता इव झिल्लिका अपि "जुय्म्" शब्दं उत्पादयन्ति स्म। अल्पजनसङ्ख्याकः ग्रामविशेषः सः। चतस्रः वीथिका एव तत्रासन्। परं प्रकृतिसुन्दरः। अष्टघण्टातः पूर्वमेव निश्शब्दोऽभूत् सः संवसथः। उटजभूयिष्ठे तत्र अत्युन्नतं त्रिभूमभासुरं भवनमेकं व्यराजत। नूतनतया आधुनिकपद्धत्या निर्मितं तत् नानाविधैः कृत्रिमवर्णैः चित्रीकृतमभूत्। प्रधानद्वारस्योपरि "सुन्दरमन्दिरम्" इति स्थूलाक्षरैः विलिखितमासीत्। भवनपुरोभागे अधुनातनाः वृक्षाः लताश्च विचित्रैः पुष्पैः निकेतनमिदं द्विगुणितशोभामकार्षुः। सद्मनभितः पुरुषोन्नतः प्राकारविशेषः तदलञ्चकार। प्राकारस्य अन्तः एकत्र अतिनवं बहुमूल्यं पाश्चात्यदेशानीतं मोदकरयानं (Motor Car) अलक्ष्यत। प्रधानद्वारि कञ्चुकच्छुरिकाद्यलङ्कृतः कश्चिद् द्वारपालकः नातिविस्तृते पीठे उपविशन्नेव स्वपन्नदृश्यत। चन्द्रशालोपरिष्टात् गृहस्वाम्यवलम्बितराजकीयपक्षध्वजः वायुवेगात् चलन् "पटपटेति" निनदमुत्पादयामास। प्रासादे विशालमेकं शयनगृहम्। तदन्तः सर्वत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भित्तिषु वैद्युतिकनाटकीय नटी-चित्रपत्राणि, नग्नस्त्रीप्रतिमाश्च नागरिकसूचिकाः संयोजिता-न्यभवन्। विदेशासादितवर्तिको-त्थापितः सुगन्धः मारुतवशात् सन्निकृष्टं स्थलमपि वासना-सहितमकार्षीत्। पीठोपरि स्थापिता आकाशवाणी पाश्चा-त्यदेशीयं सङ्गीतं मृदु प्रसारयति स्म। अपरत्र कस्मिंचन उन्नते पीठे धनिकास्वाद्यः आसवः केषु-चन पात्रेषु निक्षिप्तोऽभवत्। अल्पप्रकाशः कश्चित् विद्युद्दीपः कुवलयसमां कान्ति तत्र प्रकिरन् अभूत्। कट्फलदारुनिर्मितः अतिस्निग्धः विशालः पर्यङ्कः तं स्वापगृहं अलमकार्षीत्। विचि-त्रास्तरणयुक्तस्य सोपधान शय्यासनाथस्य तस्योपरि शयानः मद्यसेवनालसः वैद्युतिकव्यजनो-द्भूतं सुखस्पर्शं शीतवायुं अनु-भवन् स्वपाणिपादं दीर्घीकुर्वन् निश्शङ्कं कश्चित् सुप्तोऽदृश्यत। कोसौ? अहं जाने इमं। एषः आधिकारिकपक्षानुसारी सुन्दर-मूर्तिः एम्. एल्. ए.। योऽयं अचिरप्रवर्तिते एलक्षन्समये आधिकारिकपक्षाभ्यर्थित्वं प्रक-टयन्, जनसम्मतिपत्राधिक्येन प्रत्यर्थिनः पञ्चापि स्वयमेकाकी निर्जित्य, अनन्यलभ्यां कीर्ति, एम्. एल्. ए. (M. L. A.) पदवीं च प्राप्तवान्। अद्य एतदीयं वचनमेव अत्रत्यानां वेदवाक्। तन्नकोपि कदापि उल्लङ्घितुं क्षमते। रिक्तानां निर्मलचित्तानां च ग्रामवासिनां सकलानामपि स्वाम्ययमेत्र। छत्रचामरादि-चिन्हसहितः राजेव अयं ग्राम-मिमं प्रशास्ति इत्येवं चिन्तयति सति मयि, निश्शङ्कं स्वपन् सुन्दरमूर्तिः झटिति प्रतिबुद्धः शय्यायां उपविशन् सरोषं किमपि वक्तुमारभत। एतत् दृष्ट्वा विलक्षोऽहं मन्दंमन्दं शयनगृहस्थितवातायनसमीपं गत्वा इतराविदितं, गवाक्षरन्ध्र-द्वारा अन्त रपश्यम्। तत्र कश्चन देवसदृशः पुरुषः सुन्दरमूर्तेः पुर-तस्तिष्ठन् उच्चैः जहास। सद्यो-जातभयाक्रान्तः सुन्दरमूर्तिः इति कर्तव्यतामूढः सन् आत्मानं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परित: सम्यक् एकवारं दृष्ट्वा दीनस्वरेण कथञ्चिदपृच्छत् । कस्त्वं? कथं, किमर्थमागतोसि? मां दृष्ट्वा किमर्थं हससि? प्रत्युत्तरमलभमान: द्विगुणितभीति: स: पुन: पुन: तदेव आम्रेडितं चकार, अत:परं न किमपि वक्तुमशकत् । सुन्दरमूर्तेराशयं जानन्निव सोयं पुरुष: तं प्रति एवं अवोचत् । पुरुष: (सस्मितं) सुन्दरमूर्ते! मा भैषी: । नाहं चोर: । नापि त्वद्रिपु: । त्वच्छायाभूतं मां "मन:" इति "मनस्साक्षी" इति च जना वदन्ति । लोके प्रतिव्यक्ति अहं वसामि । प्राणिकृतं गुणं दोषं सत् असत् सर्वमप्यहं जानामि । मदविदितं न कोपि किमपि कर्तुं शक्नोति । केचन मूढा: सन्तमपि मां असन्तमाकलयन्त: यथेच्छमन्याय्यमाचरन्ति । अहो वैधेयता जनानाम् । चेतन: यदाहि अधर्मं चिकीर्षति तदा प्रथममहमेव तं प्रबोधयामि, अधर्मात्तं निवर्तयितुं च प्रयते । केचिद् दुरात्मान: मां निरुन्धन्त: केनाप्युपायेन स्वाभीष्टं साधयन्ति । एकाक्यहं किं कुर्याम्? अहन्तु त्वन्मन एव, सत्यमेतत् । रहसि त्वया सह सम्भाषितुं मानुषरूपं त्वत्सदृशं अद्य मया स्वीकृतम् । जीवितकाले भवता असंख्येयान्यधर्मकर्माण्यनुष्ठितानि । तान्यधिकृत्य भवता कदापि ईषच्चिन्तितं वा? क्षणिकोयं आयु:काल: । प्रथमक्षणे भाषमाण: सन् मर्त्य: द्वितीयक्षणे मृतो भवितुमप्यर्हति । अतएव प्रतिक्षणं मृत्यु: भविष्यतीति ज्ञात्वा कालविलम्बं विना द्रुतं पुण्यफलदं कर्म कर्तव्यम् । तथा नकृतम् त्वया । तदा तदा प्रतिषेधे । कृतेपि मामनादृत्य भवदनुष्ठितेषु पापकर्मसु भवत्प्रतिबोधनाय स्थालीपुलाकन्यायेन द्वित्रा: वृत्तान्ता: आवेद्यन्ते, प्रथमं भवच्चरित्रवर्णनं क्रियते सावधानं श्रूयताम् ।

पञ्चविंशतिवर्षेभ्य: पूर्वं जीर्णवस्त्र: अपरिष्कृतकेश: दशवर्षीय: बालक: कश्चित् पित्रो: बन्धोश्च अभावात् अनाथ: इतस्तत: वीथ्यां परिभ्रमन् क्षुत्पि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पासातः यत्र कुत्रापि यत्किमपि कर्मकुर्वाणः शुनासाकं रात्रौ रथ्यायां शयानः कालं निनाय । सः कदाचिदट्टशालादिषु पात्रादि शोधनं कलयन्, कदाचिद्धूमशकटालयं गत्वा आगन्तुकधनिकशय्यापेटिकादीनि स्वयं शिरसा धरन्, कदाचन प्रथितराजकीयपक्षसम्बन्धीनि ध्वजधारण समावेश सूचनापत्रदान कक्ष्यासमावेशनिर्वहणादीनि कार्याणि सोत्साहं अनुतिष्ठंश्च ववृधे । एवं बहूनि दिनानि व्यतीयुः । एष बालकोपि क्रमेण युवा सञ्जातः । प्रकृत्या वाचालत्वात्तस्य सर्वेपि जनाः तदीयां वाचं अनृतामपि सत्याममन्यन्त । स्वल्पेनैव स्वकीयेन लौकिकज्ञानेन दैशिकान् सकलानपि वृत्तान्तान्निश्शङ्कं स विमृशति स्म । स्वानभिलषितं यं कमपि सुशीलं प्रजानायकं प्रतिपक्षनेतारं वा निरङ्कुशं व्यनिन्दत् । अत एव राजकीयवेत्तारः स्वपक्षीयसिद्धान्तप्रकटनाय केचन एतदीयां वाचालतां जानन्तः तं स्वकक्ष्याप्रचारकं चक्रुः । तदाप्रभृति दैन्यवृत्तिं तिरस्कुर्वन् सः (कक्ष्या) पक्षनेतृकृतधनसाहाय्येन अनर्घं कञ्चुकादिकं दधार । आप्तैः पारितोषिकत्वेन दत्तां कालसूचिकां (Watch) हस्ते धरन्, नवनवानि वासना द्रव्याण्युपयुञ्जानः, युवतिजनचित्ताकर्षकं आकल्पं विरचयन्, स्वयं विद्या गन्धरहितोपि, अपरिचितराजकीयवृत्तान्तोपि विद्वद्भिः राजकीयसमर्मवेदिभिः प्रमुखैः सह साटोपं संवादयामास । स्वाश्रितः पक्ष एव श्रेयान् नान्यः इति सयुक्तिकं प्रतिपादयामास । एवं स्वल्पेनैव कालेन सः राजकीयविषयोपन्यासकः प्रवक्ता च संवृत्तः । राष्ट्रे तत्र तत्र गत्वा सार्वजनिकेषु समावेशेषु सर्वजनाकर्षकं उपन्यसति स्म । भोक्तुं मुष्टिपरिमितं अन्नमप्यलभमानः पूर्वं अनल्पां व्यथां योऽन्वभवत् स एवेदानीं प्रसिद्धः कश्चन राजकीयपक्षनायकः समपद्यत । सदा मोदकरयानेन सञ्चरन् भोजनशालासु परमान्नादीन्यभुङ्क्त ।

—(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

श्री यन्. रामनाथार्यः.

[पूर्वानुबन्धः]

अनुसरति करिकपोलं भ्रमरः श्रवणेन ताड्यमानोऽपि ।
गणयति न तिरस्कारं दानान्धविलोचनो मूर्खः ॥ ॥ ५३५ ॥

The bee hovers near the cheek of the elephant though warded off by its ears. A wicked person, blinded by arrogance, does not care for the contempt shown to him.

ऊर्जितं सज्जनं दृष्ट्वा द्वेष्टि नीचः पुनः पुनः ।
कबलीकुरुते स्वस्थं विधुं दिवि विधुन्तुदः ॥ ॥ ५३६ ॥

A low minded person is always jealous of the greatness of the noble minded. The planet Rahu, devours the Moon often, who is placed in happiness in the sky.

एकस्य कर्मसंवीक्ष्य करोत्यन्योऽपि गर्हितम् ।
गतानुगतिको लोकः न लोकः पारमार्थिकः ॥ ५३७ ॥

when one commits a sinful act, others follow suit. Generally people follow the example of others without considering the truth of it.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथैवात्मा परस्तद्वत् द्रष्टव्य स्सुखमिच्छता ।
सुखदुःखानि तुल्यानि यथात्मनि तथाऽपरे ॥ ॥ ५३८ ॥

One who would like to lead a happy life, should treat others as he would treat himself. For the happiness and misery experienced by a person are similar to the same experienced by others.

न क्लेशेन विना द्रव्यं, द्रव्यहीने कुतः क्रिया ।
क्रियाहीने न धर्मस्स्यात्, धर्महीने कुतस्सुखम् ॥ ॥ ५३९ ॥

Wealth is not acquired without privation; without wealth, no good deeds can be accomplished; without good deeds no merit can be acquired; without merit where is real happiness?

सुखं वाञ्छन्ति सर्वेऽपि तच्च धर्मसमुद्भवम् ।
तस्माद्धर्मस्सदा कार्यः सर्ववर्णैः प्रयत्नतः ॥ ॥ ५४० ॥

Everyone wants to live happily; happiness is the result of righteous conduct; it follows that everyone without distiction should perform righteous actions without remiss.

पत्नीमूलं गृहं पुंसां, यदि छन्दोनुवर्तिनी ।
गृहाश्रमात्परो नाऽस्ति, यदि भार्या सदाऽनुगा ॥ ५४१ ॥

The domestic happiness of a person rests on his wife provided she acts agreeably to the wishes of her husband. The position of a house holder is the best provided the wife behaves agreeably towards her husband.

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजासंस्कृतपरिषत्, गुंटूरु
द्वितीयवार्षिक प्रारंभोत्सवः

श्री नेति अनन्तरामशास्त्री, एम्. ए.

लिखितग्रन्थापेक्षया व्यवहृत शब्देनैव प्रजासु संस्कृतभाषायाः प्रचारः शीघ्रगत्या साधयितव्यः इति गुण्टूरुनगरे तत्रस्थ के. वि. के. संस्कृतकलाशाशालायां प्रजापरिषदः प्रारम्भोत्सवकाले उदीरितेषु बहुषु उपन्यासेषु पदे पदे उद्घाटितम् ।

तत्समावेशे अध्यक्षस्थानमलंकुर्वाणाः श्री चल्ला सत्यनारायणमहोदयाः संस्कृतभाषाप्रचारप्रारम्भः स्वगृहेष्वेव कर्तव्यः दैनन्दिनकार्यक्रमेषु स्वसुतादिभिस्सम्भाषणावसरेपि, संस्कृतभाषैवव्यवहर्तयाइत्युक्तवन्तः । कलाशालाध्यक्षाः श्री वै. अनन्तरामय्यमहोदया जातिसमैक्यनितान्तदोहदकारिण्याः संस्कृतभाषायाः पुनरुज्जीवनआवश्यकतामुद्घाटितवन्तः । तत्समावेशे बहवस्सभ्याः परिषदः चतुर्मुखीनं कार्यविधानमित्थं विशदी चक्रुः ।

१. संस्कृतभाषाभिज्ञानाम् विदुषां समाख्या एका व्यवस्थापयितव्या । ते परस्परं संभाषणं, उत्तरप्रत्युत्तरादिकम् संस्कृतभाषायामेव कुर्युः ।

२. कलाशालासु सुकृत संस्कृतभाषाभ्यासानाम् परस्तात्तदुपेक्षाणां न्यायवाद वैद्यादि विद्वद्वृत्त्यवलम्बिनां एकत्र संयोजनं कर्तव्यम् । साप्ताहिकगोष्ठीषु, चर्चा प्रधान कक्ष्यासु यथा ते भागस्वामिनः भवेयुः, तथा तेषां समुचितप्रोत्साहनं च कर्तव्यम् । अन्ततः ते न्यायवादादिवृत्त्यवलम्बिनः पूर्वप्राप्तभाषास्थानस्य सद्विनियोगं कुर्युः ।

३. मौलिकसंस्कृतभाषायां विद्यार्थिनः सुशिक्षितान्कर्तुं त्रैमासिकी प्रणालिका एका व्यवस्थापयितव्या । कलाशालागामिनां विद्यार्थिनां प्रतिदिनं संस्कृतभाषाबोधनं कर्तव्यम् । अन्ततः ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषायां व्यवहरणाय पर्याप्तं ज्ञानं प्राप्य, दैनन्दिनकार्येषु तद्भाषां स्वेच्छया व्यवहर्तुं समर्था भवेयुः ।

४. उन्नतपाठशालासु, संस्कृतकलाशालासु सर्वे छात्राः पंचवर्षपर्यन्तं संस्कृतभाषाभ्यसनावसाने, तद्भाषा भाषण कुशलाः यथा भवेयुः तथा व्यवस्थाम् कर्तुं तत्तदध्यक्षानाम् अभ्यर्थना कर्तव्या ।

इत्थं तदितरविधानैश्च, परिषत्, संस्कृतभाषा अभिज्ञवर्गैर्यथाव्यवहृता भवेत् तथा कर्तुं, अस्मिन्देशे ग्रामे ग्रामे नगरे नगरे संस्कृतवाणीव्यवहारकुशलः संघः यथा प्रवृद्धो भवेत् तथा कर्तुं सर्वथा यत्नः कार्यः ।

प्रारम्भोत्सवकाले कलाशालामन्दिरं विद्वद्भिर्विद्यार्थिभिरितरनरनारीसमूहैर्निबिडीकृतम् । सर्वेपि परिषदः देशभवत्युद्दीपितकार्याचरणविषये विजयमेव ऐच्छन् । वन्दनसमर्पणेन सभापर्यवसन्ना ।

पुस्तकसमीक्षा

श्रीमहागणपतिप्रादुर्भावः (रूपकम्)

श्रीगोकर्णसाम्बदीक्षितविरचितम्

मूल्यम् रू. २–००

श्री गोकर्णसाम्बदीक्षितमहोदयेन "श्रीमहागणपतिप्रादुर्भाव" नामकमिदं रूपकं अङ्कपञ्चकशोभितं गीर्वाणवाण्या वैभवपोषकं वाङ्मयं भूषणं संस्कृताभिमानिनां पाठकमहाशयानां करकमलयोः समर्पितमस्ति ।

अनेन रूपकेण विनायकपारम्यं प्रदर्शितं । सुश्लिष्टा सुलभा सरला च शैली । "सर्वान् वस्तमः कूपे पातनं" इति प्रयोगस्तु चिन्त्यः । प्रायशः सर्वत्र मुद्राक्षरस्खालित्यानि आपतितानि । "संवरण" पात्रप्रवेशनेन हास्यं निरूपितम् । प्रदर्शनयोग्यमिदं रूपकं निरवद्यं हृद्यं भवेदिति गैर्वाणी आशास्ते ।

"अवरः"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः शिव-केशवादि देववाचकानि नामानि सर्वाण्यपि तस्यैव परब्रह्मणः सगुणरूपवाचकानीत्यवधारणीयानि। मुमुक्षूणां भेदबुद्धि रत्त्याज्या, परं ब्रह्मैव ध्येयम्" इत्येव मद्वैततत्त्वं उपदिशन्नाचार्यः कतिपयकालं तत्रन्यवसत्।

ततः शिष्यकोटी समेतः शंकराचार्यः दक्षिणापथं प्रति निवृत्तः; काञ्चीपुरे स्वेनैवेतः पूर्वं स्थापितं कामकोटिपीठमागत्य द्वात्रिंशद्वत्सर परिमिते जीवितकाले समाप्ते सति कृतकृत्यतया जगद्गुरुः भौतिकदेहं परित्यज्य परब्रह्मभावं गतः।

३०. त्रिमूर्तिषु महान् कः ?

केदारक्षेत्रे हिमपातोऽधिकः। तत्र जलमप्यतिशीतलम्। यदा शंकराचार्यः तत्राऽसीत् तदा तस्य शिष्या दुस्सहेन शैत्येन स्नानसन्ध्यादिकं निर्वर्तयितुं अपारयन्तः आचार्य मुपसंगम्य प्राहुः— "महात्मन्! अस्माभि रत्रनैव स्थातुं शक्यते; अतिशीतलप्रदेशोऽय"मिति। आचार्यः शिवं प्रार्थ्य उष्णोदकनदीं कांचित् प्रवाहयामास शिष्यक्लेशं च निवारयामास।

तस्मिन् पुण्यक्षेत्रे तपस्तप्यन्तो महर्षयो बहवः प्रत्यहं शङ्कराचार्य मुपेत्य सद्गोष्ठीं विधाय गच्छन्ति स्म। कदाचित् गोष्ठीसमये त्रिमूर्तिषु महान् कः ? इति प्रश्न स्समुद्भूतः। तस्य समाधानं ब्रुवन् शङ्कराचार्यः कदाचित्साक्षात्कृतया आदिशक्त्या स्वस्मै कथितं कंचन वृत्तान्तं "श्रूयता" मिति उदाहरत्।

एकदा कलहाशिनः नारदस्य निरशनं सम्प्राप्तम् स भृशं चिन्तितः क्वचि दुपविश्य। अत्रान्तरे संयोगवशात् ब्रह्मविष्णुमहेश्वराः त्रिमूर्तयः गमनमार्गेण गच्छन्तः साक्षात्कृता नारदस्य। तत्सन्दर्शनमात्रेण, कलहप्रियस्य कलहबीज मस्फुरत्। अथ झडिति उत्थितो नारदः देवेन्द्रसभां तत्क्षण मगात्। इन्द्रेण सपर्याभिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सभाजितः उचितासने समुपविष्टो देवर्षिः किमपि सुदीर्घं चिन्तयन्निव नाटयति स्म। इन्द्रस्त मालोक्य "देवर्षे! किमिति भवान् चिन्तामुद्रितो दृश्यते" इति अप्राक्षीत्।

नारदः "त्रिमूर्तिषु उत्तमः कः? इति सन्दिहानः समाधानं पर्यालोचयामि। अस्यां देवसभायां कोऽपि महान् मदीयं संशयं निवारयितुं प्रभवति चेदुच्यता" मित्याह।

नारदोक्तं श्रुत्वा कश्चिद्देवः प्राह– सृष्टे रस्याः सर्वस्या अपि चतुर्मुख एव किल विधाता; अतस्स एव महा"निति।

अथान्यः कश्चिदुत्थाय "सृष्टिकर्तृत्वहेतोः न महत्त्वं सिद्धयति; किन्तु तद्रक्षणकर्तुरेव महत्त्वं; अतः स्थितिस्थापकस्य सत्त्वसमाश्रयस्य महाविष्णोरेव आधिक्य मिति जगाद। एव मपरः कश्चित् "जातं सर्वमपि यथातथं स्थितं चेत् लोको जीवराशिभिः निबिडीकृतो निरवकाशः स्यात्; अतस्तेषां लयोऽत्यन्तमपेक्ष्यते। यश्च लयकर्ता रुद्र इति स एव महान् भवितु मर्हति अन्ततो गत्वा" इत्याह।

निमेषमात्रेण देवसभा त्रिधा विभक्ताऽसीत्; केचिद्ब्रह्माणं महान्त माहुः; अन्ये विष्णुं परं मेनिरे; अपरे तु रुद्रं उत्तमं न्यरूपयन्।

इन्द्रः नारदं विलोक्य "ऋषिवर्य! भवदीयः संशयः यथावस्थितथितिं प्राप्तः" इत्याह।

नारदः– "सत्यमेतत्। सभ्याः स्वीया नभिप्रायान् प्राचीकटन्। अत्र कोवाऽभिप्रायः समीचीन इति निश्चेतु मशक्तस्य मे मनः भ्रमतीव; बुद्धिभ्रंशो भवतीव च। नेदं अत्र निर्णेतुं शक्यते; मेरुपर्वते महतीं सभा मायोज्य तत्र अशेषान् देवान्, यक्षान् किन्नरान् गन्धर्वान् दैत्यान् महर्षीन् अन्यांश्च आहूय अमुं विषय मधिकृत्य विचारः कर्तव्यः। किं ब्रूषे?" इतीन्द्रं प्रत्याह।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽपि "तथैव कर्तव्य" मित्याह ।

इन्द्रः मेरुगिरौ महासभायाः व्यवस्थां कारयन्नास्त । अत्रान्तरे नारदः ब्रह्मलोकं गत्वा ब्रह्माणं प्रणम्य तत्प्रदर्शित मुचितासनमधिष्ठाय देवसभावृत्तान्तं एवं व्यजिज्ञपत्– "भगवन् ! ह्यः देवसभायां त्रिमूर्तिषु महान् कः इति प्रश्ने समुत्थिते केचिद्विष्णुं अन्ये शिवं चाधिकं मत्वा वादोपवादैः कोलाहल मकुर्व"न्निति ।

ब्रह्मा– "मदीयमाधिक्यं न कोप्याह किम् ? इति पप्रच्छ । नारदः– भवदीय मप्याधिक्यं कैश्चित्प्रतिपादित मेव; परन्तु श्रोतॄणां संख्या अत्यल्पाऽसीत् । एतावता न किमपि इदमित्थमिति निर्णीतम् । आगामिन्या मेकादश्यां मेरुगिरौ इन्द्रेण काचिन्महती सभा आयोजयिष्यते । तत्र निर्णेष्यते को महानिति– इति हि श्रूयते" इत्याह ।

ब्रह्माऽह– "मां विहाय कमन्यं अधिकं भावयेयु र्देवाः; पश्यामितावत्" इति ।

नारदः– "सभाया मागत्य यदि भवानुपविशेत् को भवन्तं अपलपितुं शक्नुयात् ? अतोऽवश्यं भवताऽगन्तव्य" मित्यामन्त्र्य ततः प्रस्थितो वैकुण्ठमगात् ।

तत्रापि नारदः विष्णुना भुवनवृत्तान्तं परिपृष्टः देवसभावृत्तान्तं एवं न्यवेदयत् । "माधव ! लोके शैवानां बाहुल्य मस्तीति भाति । ह्यः प्रवृत्तायां देवसभायां शिवकिङ्कराणां कण्ठारव एव भृशं श्रुतः" इति ।

विष्णुः "ह्यः सभायां मद्भक्ता विरलाः स्युः; तावन्मात्रेण शैवाधिक्यं जातमिति न मन्तव्य" मित्याह । नारदः– "सत्यमुक्तं । भाविन्यां सभायां अस्माभिः निजपरिवारैः सह नेतव्यः" । विष्णु– सा सभा क्वनु प्रचलिष्यति ? किं वा ममाप्याह्वानं आगमिष्यति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारदः— किमुक्तं ? प्रप्रथमतया तत्र भवत एव आह्वानं भविष्यति । तदनन्तरमेवान्येषाम् । अवश्यं भवद्भिरागन्तव्यम् । आगमनसमये भवान् चक्रं गदां च माविस्मरतु ।

इति नारायणं प्रबोध्य नारदः कैलासं गतः । तत्र शिवाय इन्द्रसभावृत्तान्तं यथोद्वेगकरं वर्णयामास एवं— सृष्टिकार्यं रक्षण-कार्यं च श्रेष्ठं भवितु मर्हति; लयकार्यं कथं श्रेष्ठं भवतीति भव-दीयं सामर्थ्यं लघूकृतं बहुभिः ह्यः सभाया"मिति । एतच्छ्रुत्वा शिवो रौद्रेणाह— " तथा चेत् तेषां नामानि ब्रूहि; अहं मत्तृतीय-नेत्रेण तान् भस्मसात्करोमि तावत्" इति ।

नारदः— तत्र भवतः असन्निधौ किल तदुक्तं तथोक्तं च । मेरुपर्वते भाविन्यां सभायां भवत्करे लसत्त्रिशूलं सफूत्कारफणो-ल्लासान् पन्नगांश्च पश्यता मेव सतां समेषां मुखतः "नमश्शिवाये" ति निस्सरेद्ध्वनिः साञ्जलिबन्धम् ।

शिवः— यदि न तथा कुर्युः, मन्यतां तेषां विनाशकालः सम्प्राप्त इति ।

इति ब्रुवति रुद्रे नारद "स्तत् सत्यं तत् सत्यं" इति वदन् मेरुगिरिं गतः ।

तत्र क्वचि दत्युन्नतस्थले रत्नखचितसिंहासनमेकं स्थापितम् । ततः किञ्चिदधोभागे त्रीणि उन्नतासनानि स्थापितानि । ततो-ऽप्यधोऽधः बहून्यासनानि सहस्रशः पङ्क्तिशश्च व्यवस्थापितानि सन्ति ।

निर्देशितायामेकादश्यां इन्द्रादयो दिक्पालकाः यक्षगन्धर्व-किन्नराद्या अन्ये देवगणाः महर्षयश्च आगत्य स्वेभ्यः कल्पिता-न्यासनानि अध्यतिष्ठन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्द दक्षिणायन सिंहमास (1974 September) परीक्षाणां कालसूची

परीक्षाः	7—9—74		8—9—74		9—9—74
	प्रातः 10 A. M.	सायम् 2 P. M.	प्रातः 10 A. M.	सायम् 2 P. M.	प्रातः 10 A. M.
परिचयः	—	—	परिचयः	—	—
अभिज्ञः	—	—	प्रथमपत्रम्	द्वितीयपत्रम्	—
विचक्षणः	—	प्रथमपत्रम्	द्वितीयपत्रम्	तृतीयपत्रम्	—
समर्थः	प्रथमखण्डे प्रथमपत्रम्	प्रथमखण्डे द्वितीयपत्रम्	द्वितीयखण्डे प्रथमपत्रम्	द्वितीयखण्डे द्वितीयपत्रम्	—
कोविदः	प्रथमखण्डः	द्वितीयखण्डः	तृतीयखण्डः	चतुर्थखण्डः	पञ्चमखण्डः

संस्कृतभाषाप्रचारिणी सभा,
20—7—74

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. Postal C. T. R. II.
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.
Licensed to Post without Prepayment. LICENCE No. 57.

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ५-००

प्रहेलिका

पुष्पेषुमाता पुरुषायमाणा लज्जावती विश्वसृजं विलोक्य ।
नाभीसरोजे नयनं मुरारे र्वामेतरं वारयति स्म चित्रम् ॥

अर्थः– पुष्पेषोः मदनस्य माता लक्ष्मी, पुरुषायमाणा पुरुषवदाचरन्ती विपरीतरतं कुर्वतीत्यर्थः, विश्वसृजं भगवन्नाभिसरोजस्यं ब्रह्माणं विलोक्य लज्जावती सती मुरारेर्दक्षिणं नयनं वारयति स्म, यतो भगवन्नेत्रे हि सूर्यचन्द्रात्मके, तत्र दक्षिणस्य सूर्यात्मकत्वात्तद्वारणेन सरोजं मुकुलितं भवेत् । ततश्च ब्रह्मापि सरोजकोशेऽन्तर्हितो भवेत्, इति मनसि कृत्वा तद्वारयामासेति भावः ।

Published by Sri N. Ramanatha Aiyer B. A; B. L., Advocate
& Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri K. V. Raghavan, (in-charge)
at Vijaya Press, Chittoor (A. P.) C. 1500.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार
Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरध्वनि – "संस्कृतम्"

वाणीं भजत गैर्वाणीम् !

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आं. प्र.) भारतम्.

संपुटः १२ | 15 th. AUGUST 1974 | क्रमांकः ७

नवदेहल्यां अस्मत्सभाकेन्द्रम्



श्री के. यस्. रावः, अस्मद्देहली प्रचारकः,
तद्दक्षिणभागे श्रीवत्सबालमन्दिर संस्थापकः श्री चक्रदेवः

आनन्द-श्रावणाङ्कः | शकाब्दाः १८९६ | मूल्यम् ०–५० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूची

१. दैवीवाक्	१
२. संपादकीयम् (आकाशवाण्यां अमरवाणि:)	२
३. दशावतारस्तोत्रम्	३
४. गजेन्द्रमोक्षणकथा	५
५. श्रीरामवर्णमालास्तव:	९
६. अञ्जलिमहिमा	१३
७. वर्षाऋतु	१७
८. गणेशकरावलम्बस्तोत्रम्	१८
९. तपोवनम्, चित्तूरु	१९
१०. संस्कृतदिनोत्सव:	२०
११. लोकेऽस्मिन् सर्वक्रुद्धनम्	२१
१२. सुभाषितानि	२५
१३. प्रजासंस्कृतपरिषत्, गुंटूरु द्वितीयवार्षिक प्रारंभोत्सव:	२७
१४. पुस्तकसमीक्षा	२८
१५. श्रीशंकराचार्य:	

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवीवाक्

अग्ने यं यज्ञ मध्वरं विश्वतः परिभूरसि ।

स इद्देवेषु गच्छति ॥

हे अग्ने ! त्वं यं यज्ञं विश्वतः सर्वासुदिक्षु, परिभूः परितः प्राप्तवानसि, स इन् = स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गं गच्छति । कीदृशं यज्ञं ? अध्वरं = हिंसारहितं । न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति ।

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।

देवो देवेभि रागमत् ॥

अय मग्निर्देवो देवेभिः = अन्यैर्देवैः हविर्भोजिभिः सह आगमत् = अस्मिन् यज्ञे समागच्छतु । कीदृशोऽग्निः ? होता = होमनिष्पादकः, कविक्रतुः = कविशब्दः क्रान्तवाची, क्रतुकर्म वा प्रज्ञानं वाऽभिधत्ते । अतः क्रान्तप्रज्ञः क्रान्तकर्मा वा । सत्यः=अनृतरहितः फलमवश्यं प्रयच्छतीत्यर्थः । चित्रश्रवस्तमः = श्रूयते इति श्रवः कीर्तिः, अतिशयेन विविधकीर्तियुक्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

आकाशवाण्यां अमरवाणिः

महदिदं प्रमोदस्थानं, यत्केन्द्राधिकारिनिर्देशात् १९७४ जून् ३० तिथितः आरभ्य प्रातः नवघण्टा समये पञ्चनिमेषपर्यन्तं आकाशवाण्यां प्रतिदिनं वार्ताः पठ्यन्ते। एतस्मिन् वार्ताश्रवणे, संस्कृतज्ञा न केवलं, किन्तु अनभिज्ञा अपि समुत्सुका वर्तन्त इति सुविदितमेवैतत्। सर्वेषामपि मनोरञ्जने गैर्वाण्याः तादृशी शक्तिरस्तीति सुनिरूपितमासीत्। प्रशंसापत्राणि देशस्य कोणकोणेभ्य अतितरामापतन्ति च। सर्वोऽपि जनः अर्थावगतिं प्राप्नुवन्तीति कथने न काप्यतिशयोक्तिः। एतत्कार्यक्रमनिर्देशकतॄन्वयं बहुधा अभिनन्दामः। संस्कृतस्य इतोधिकाऽत्यन्तव्याप्तेरयं कार्यक्रमः मुख्यं साधनञ्च भवतीति वक्तुं शक्यते। रात्रावपि, संस्कृतवार्ता प्रसारः करणीय इति प्रभुताऽमभ्यर्थयामः।

आकाशवाण्यां गैर्वाणवाण्याः प्रसारः जातीयतैक्यकरणे महान्तमुपकारमातनोतीति निश्चिप्रचमेव। स्वातन्त्र्यसंपादनानन्तरमस्मत्प्रभुतया संस्कृतस्य व्याप्त्यै बहुधा श्रद्धा आधीयते। किन्तु एतन्नालमिति मन्यामहे। प्रतिविद्यालयं एकः संस्कृतोपाध्यायः निवेशनीयः। सर्वेषाऽमपि विद्यार्थिनां संस्कृतमवश्यपठनीयत्वेन निर्णयः कार्यः। संस्कृतोपाध्यायानां किञ्चिदधिकतया वेतनादिषु आधिक्यं प्रदर्शनीयम्। विना जातिमतभेदं संस्कृताभ्यासकानां विद्यार्थिनां उचितभोजनप्रदानं न केवलं, अपितु उपकारवेतनादिकमपि दीयेत, तदा क्षिप्रमितोधिकां व्याप्तिं संस्कृतं प्राप्नुयादिति विज्ञाप्यते।

आकाशे "उत्पन्नश्शब्दः आकाशे विनष्ट" इति, न्यायस्य दूरीभवन्नयं आकाशवाण्यां संस्कृते वार्ताप्रसारः इतोऽप्यधिकं समयं प्राप्नुवन् चिरं विलसतु इति प्रार्थयामः। ***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशावतारस्तोत्रम्

श्री डा. वेमूरि आंजनेयशर्मा.

मीन - प्रहर्षिणी

हृत्वा तन्निगमधनं विधेः सकाशा-
दंभोधिं गतमसुराधमं निहन्तुं;
मीनोऽभूर्गुरुकृपयाऽभयप्रदायिन्
रूपं तत् तव कलयामि सर्वरूप ॥

कूर्म - मंजुभाषिणी

विभवेप्सया सुरगणैः पयोनिधौ
मथितेतु मंदरगिरौ निमज्जति ।
वरकूर्मरूपमुपगम्यशैलमु-
द्धृतवांस्त्वमीशतदहं स्मरामि ते ॥

वराह - द्रुतविलंबितम्

सकलजीवधरामवनिं पुरा
जलनिधौ विनिपातितुमुद्यतम् ।
तमसुरं कनकाक्षमहन् भवान्
वरवराहशरीर नमोऽस्तु ते ॥

नरकेसरि - हरिणी

दितिजतनयः प्रह्लादस्ते प्रपन्नगणाग्रणीः
त्वयि समधिकाद् वैरात् पित्रा भृशं खलु पीडितः ।
निजजनपरित्राणायाभूद् भवान् नरकेसरी
कनककशिपुं हंतुं च त्वा महं हृदि भावये ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिविक्रम - पुष्पिताग्रा

सकलसुरगणान् विजित्य नाकं
समधिगतस्य बलेर्विलंभगर्वम् ।
परिशिथिलयितुं त्रिविक्रमोऽभूः
तमज, भजे तव वामनावतारम् ।।

वीरविप्रानुष्टुम्

जमदग्निसुतो भूत्वा क्षत्रियान् पितृघातुकान् ।
जघान यः परशुना वीरविप्रं नमामि तम् ।।

रामवसंततिलकम्

आपूरिता दशरथेश्वर पुत्रकाम्या
यस्योदयेन, निहतो दशकंधरोऽपि ।
लीलातिरोहित निजप्रतिभं परेशम्
तं दिव्यतैकनिलयं कलयामि रामम् ।।

कृष्णानुष्टुम्

निराकारं परं ब्रह्म नराकारमवाप यम् ।
गीतामृतं येन दुग्धं कृष्णाख्यं तं नमाम्यहम् ।।

गौतम - पृथ्वी

अपारकरुणोदयं निखिलचेतनव्रातके
प्रसन्नघनतेजसं विमलतालसन्मानसम् ।
प्रशांतिविभवास्पदं स्वगतसच्चिदानंदनम्
ऋषिप्रभुमनारतं मनसि भावये गौतम् ।।

कल्क्यनुष्टुम्

शिक्षार्थं धर्मबाह्यानां सुजनान् परिरक्षितुं ।
धर्तासि कल्किरूपं ते भावये तत् परात्पर ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गजेन्द्रमोक्षणकथा

'बोधकरत्नम्', 'रामायणज्योति', 'उपन्यासचक्रवर्ती'
मु. वि. श्रीनिवासाचार्यः, अवलूर्.

पुरा द्राविडान्तर्गते पाण्डच-देशे इन्द्रद्युम्नः इति राजा बभूव। सः प्रजापालनतत्परः नित्यनैमित्तिककर्मानुष्ठानधुरंधरः, भगवद्भागवतभक्तिमान्, भगवदाराधनबद्धश्रद्धः, सर्वशास्त्रविचक्षणश्च आसीत्। अथ कदाचित् कस्मिश्चित् दिने पूजागृहं आगत्य भगवत्येकाग्रचित्तः गृहीतमौनव्रतः पूजां कृत्वा हरिमेव ध्यायन्नास्त। तस्मिन्नवसरे देवर्षिः नारदः भूलोके संचरन् अन्ततः राज्ञः इन्द्रद्युम्नस्य पूजागृहं आगच्छत्। तत्र क्षणमिव स्थित्वा पूजागृहे भगवध्यानमग्नं राजानं दृष्ट्वा स्वमनसि तं विष्णुभक्तं प्रशंसन् तूष्णीं अतिष्ठत्। मुहूर्तकालं स्थितः नारदः तस्मात् स्वागतनिवेदनं अपेक्षमाणः शनैश्शनैः "हे राजन्, इन्द्रद्युम्न" इति आह्वानध्वनिं अदात्। ध्यानमग्नः राजा तु नारदागमनं तस्याह्वानचेष्टां च नाबुधत्। कोपाविष्टः मुनिवरः "गजो भूत्वा वने संचर" इत्यशपत्। तच्छापमपि राजा नाशृणोत्। शापं तस्मै निवेद्यैव गन्तव्यमिति मन्वानः मुनिः तत्रैव चिरं तूष्णीं अवर्तत। अथ राजा यदा ध्यानं परिसमाप्य उन्मीलितलोचनः इतस्ततः पश्यति तदा मुनिपुंगवं दृष्ट्वा विनीतवेषः साष्टांगप्रणामकरणोद्युक्त आसीत्। तमवलोक्य मुनिः "रे मूर्ख, किमिति तव प्रणामः? भागवतापचारः कृतः त्वया "आराधनानां सर्वेषां विष्णोराराधनं परम्। तस्मात् परतरं प्रोक्तं तदीयाराधनं परम्" इति सकलशास्त्रज्ञेन त्वया कथं न ज्ञायते? प्रथमतः त्वया क्रिय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणं आराधनं भगवद्ध्यानं च प्रशंसन् आसम्। मुहूर्तकालं स्थित्वापि ममाऽगमनं मम ध्वनिं च त्वं तु न ज्ञातवान्। अथ भागवतापचारयुक्तं त्वां "गजो भव, वने संचर" इत्यशपम्। तदपि त्वया न ज्ञातम्। साक्षात् शापं निवेद्य गन्तव्यमिति तव बहिश्चिन्तां प्रतीक्ष्य तिष्ठामि "शापमनुभव" इति राजानं अवोचत्। राजा इन्द्रद्युम्नः तच्छापं शिरसा अंगीकृत्य महामुनिं अगस्त्यं इत्थं प्राह च – "प्रभो, भागवतापचारस्य फलं तु मया अनुभोक्तव्यमेव, किन्तु गजरूपग्रहणानन्तरमपि भगवदाराधनचिन्ता मन्मनसि नित्यं भवतु इति भवन्तः अनुगृह्णन्तु" इति। तादृशीं राज्ञः प्रार्थनां अंगीकृत्य 'तथा भवतु इत्युक्त्वा मुनिश्श्रेष्ठः कुंभसंभवः' यथागतं अगात्। झटिति राजापि गजरूपं प्राप्य वने संचरति स्म। प्रतिदिनं स गजः यत्रकुत्रापि तटागात् पंकजपुष्पं गृहीत्वा वनात् ग्रामं वा नगरं वा आगत्य यत्र विष्णवालयः वर्तते, तत्र स्थित्वा शब्दं कृत्वा तिष्ठति स्म। तच्छब्दं श्रुत्वा अर्चकः बहिः आगम्य पश्यति, तदा गजः शुण्डेन गृहीतं तामरसपुष्पं तस्य हस्ते दत्वा भगवदर्पणं कुरुत इति संज्ञां करोति स्म। अर्चकश्च तत्पुष्पं भगवतः चरणारविन्दयोः समर्प्य पुनः तत् कुसुमं गजाय यच्छति स्म। अनन्तरमेव गजः यथागतं गत्वा स्वाऽभ्यवहारं करोति स्म। इत्थं तस्य गजस्य गतिः चलति स्म। अनेन रीत्या बहवो संवत्सराः गताः। अन्ते गजशापविमोचनकालः आगतः। भूलोके अनावृष्टिः समजायत। तेन कारणेननद-नदी-कासारतटाकाःजलरहिता अभवन्। गजस्तु इतस्ततः कमलपुष्पहरणाय जलाशयान् विचिनोति स्म। जलरहितान् बहून् कासारान् तटागान् वीक्ष्य किंकर्तव्यतामूढहृदयः हस्ती स्वमनसि इत्थं अचिन्तयत्–अद्यास्मिन् दिने भगवदाराधनं विना कथं मम आहारः गृहीतव्यः तामरसपुष्पं विना भग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वदाराधनं कथं कर्तुं शक्यं, तेन हि मम मरणमेव भविष्यति" इति। विचिन्त्यैवं वने परिभ्रमन् अन्ततः कस्मिश्चित् पादपमूलं आगत्य श्रमपरिहारं करोति स्म। तदानीं आकाशे केचन पक्षिणः डयमाना आसन्। तेषां पक्षेभ्यः तेषां चलनेन जलबिन्दवः गजमस्तके कतिचन अपतन्। जलबिन्दूनां शैत्यस्पर्शात् वारणराजः, दूरे कोपि जलाशयः वर्तते इति द्योतते इति मत्वा तरुमूलात् तत्राजगाम। तत्र आश्चर्यभूतं अतिमनोहरं कमलपुष्पभरितं अगाधं जलाशयं तटागं दृष्ट्वा परमानन्दपूर्णः जले अवतीर्य पुष्पाणि अवचिनोति स्म। तदानीं तत्र वर्तमानः ग्राहः गजस्य पादमेकं स्वदन्तैः गृहीत्वा दष्ट्वा खादति स्म। गजस्तु सन्तोषाधिक्यात् तन्न ज्ञातवान्।

पुष्पाणि लतया बद्ध्वा तानि गृहीत्वा मस्तके निक्षिप्य यदा तीरं गन्तुं उपरि पदानि निक्षेप्तुमारभत तदा जलाशयात् उपरि आगन्तुं न शशाक। गजः यथाशक्ति उद्युक्तोपि मकरबलं अधिकऽमासीत्। नक्रदशनपीडाधिक्यात् स्वपादव्रणं असहमानः हस्ती उच्चैः अक्रन्दत्। गजरोदनशब्दं श्रुत्वा वनगजाः बहवः तं उद्धर्तुं तत्र आगमन्। सर्वेपि गजाः तटागे ग्राहेण पीडितपादं वारणं स्वशुण्डैः गृहीत्वा आकर्षन्ति स्म। तथापि ग्राहस्य बलं अधिकमेवासीत्। तदा पीडितगजः स्वजीवनाशां परित्यज्य इन्द्रब्रह्मरुद्रादीन् देवान् आह्वयति स्म। तेपि गजसमीपं आगमन्। तान् दृष्ट्वा गजराजः इत्थम् प्रार्थयामास "भो देवाः मम तु स्थले सिंहमयं जले मकरमयं च वर्तते। तस्मात् भयरहितं नित्यं शरीरं मह्यं दत्वा अनुगृह्णन्तु इति। विष्णुं नारायणं विना सर्वेपि देवाः "नित्यशरीरप्राप्तिं विना अन्यं वरं वृणीष्व। नित्यशरीरदाने वयं न समर्थाः" इति प्रत्यब्रुवन्। तदा गजः तादृशीं देववार्तां श्रुत्वा, आस्तां तावत् तेषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्तिः, अमीषां देवानां नियन्ता कश्चित् नूनं वर्तते तस्य नाम किमिति न ज्ञायते। तथापि इत्थं संबोधनं कृत्वा आह्वयामीति मनसि विचिन्त्य आदिमूल! इति उच्चैः आक्रोशत्। पर-व्यूह-विभव-अर्चा-अन्तर्यामी स्वरूपः श्रीमन्नारायणः गरुडारूढः तत्रागत्य सुदर्शनचक्रायुधेन मकरं कृन्द्वा गजं अरक्षत्। शंख-चक्र-धारिणं चतुर्भुजयुक्तं पक्षिराजारूढं भगवन्तं विष्णुं नारायणं दृष्ट्वा "प्रभो आदिमूल! नित्यशरीरं दत्वा मां पाहीऽत्यवदत्। तथा कृत्वा तं गजराजं भगवान् ररक्ष। तदैव चक्रस्पर्शप्रभावात् नक्रश्च स्वकं रूपं परित्यक्तः हूहूनाम गन्धर्वो भूत्वा भगवन्तं प्रदक्षिणीकृत्य पूर्वं प्राप्तशापात् विमुक्तः गन्धर्वलोकं अगात्। भागवतपादस्पर्शप्रभावः पापशापविमोचनहेतुरिति ज्ञायते ननु? उक्तम् च—

आराधनानां सर्वेषां
विष्णोराराधनं परं।
तस्मात् परतरं प्रोक्तं
तदीयाराधनं परम्॥

नक्राक्रान्ते करीन्द्रे मुकुलितनयने
मूलमूलेति खिन्ने
नाहं नाहं नचाहं न च
भवति पुनस्तादृशोयादृशेषु
इत्येवं त्यक्त हस्ते सपदि
सुरगणे भावशून्ये समस्ते
मूलं यत्प्रादुरासीत् स दिशतु
भगवान् मंगलं सततं नः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरामवर्णमालास्तवः

अन्तस्समस्तजगतां यदनुप्रविष्टं
आचक्षते मणिगणेष्विव सूत्रमार्याः ।
तं केलिकल्पितरघूद्वहरूपमाद्यं
पङ्केरुहाक्षमनिशं शरणं प्रपद्ये ।।

आम्नायशैलशिखरैकनिकेतनाय
वाल्मीकिवाग्जलनिधिप्रतिबिम्बिताय ।
कालाम्बुदाय करुणारसमेदुराय
कस्मैचिदस्तु मम कार्मुकिणे प्रणामः ।।

इन्दुं प्रसादमवतंसयता त्वदीयं
कोपं करे हुतवहं वहता करेण ।
शङ्के जगत्त्रयमनुग्रहनिग्रहाभ्यां
संयोज्यते रघुपते समयान्तरेषु ।।

ईदृग्विधस्त्वमिति वेद न सोऽपि वेदः
शक्नोति कस्स्थितमवेक्षितुमुत्तमाङ्गे ।
श्रोतुं क्षमं न तु मृषेक्षितुमप्यतस्त्वां
सर्वे विदन्तु कथमीश कथं स्तुवन्तु ।।

उष्णांशुबिम्बमुदधिस्मयघस्मरास्त्र-
ग्रावा च तुल्यमजनिष्ट गृहं यथा ते ।
वाल्मीकिवागपि मदुक्तिरपि प्रभुं त्वां
देव प्रशंसति तथा यदि कोऽत्र दोषः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊढः पुराऽसि विनतान्वयसम्भवेन
देव त्वया किमधुनाऽपि तथा न भाव्यम् ।
पूर्वे जना मम विनेमुरसंशयं त्वां
जानासि राघव तदन्वयसम्भवं माम् ॥

ऋक्षं प्लवङ्गमपि रक्षसि चेन्महात्मन्
विप्रेषु किं पुनरथाऽपि न विश्वसामः ।
अत्राऽपराध्यति किल प्रथमद्वितीयौ
वर्णौ तवौदनतया निगमो विवृण्वन् ॥

नृणां न केवलमसि त्रिदिवौकसां च
राजा यमार्कमरुतोऽपि यतस्त्रसन्ति ।
दीनस्य वाङ्मम तथाऽपि तते तव स्यात्
कर्णे रघूद्वह यतः ककुभोऽपि जाताः ॥

क्लृप्तामपि व्यसनिनी भवितव्यतां मे
नाथाऽन्यथा कुरु तव प्रभुतां दिदृक्षे ।
चक्रे शिलाऽपि तरुणी भवता तदास्तां
मायाऽपि यद्घटयते ननु दुर्घटानि ॥

एकं भवन्तमृषयो विदुरद्वितीयं
जानामि कार्मुकमहं तु तव द्वितीयम् ।
श्रुत्याऽऽश्रिता जगति मद्गुणघोषणा सा
दूरीकरोति दुरितानि समाश्रितानाम् ॥

ऐशं शरासमचलोपममिक्षुवल्लि-
भञ्जं बभञ्ज किल यस्तव बाहुदण्डः ।
तस्य त्वशीतकरवंशवतंस शंस
किं दुष्करो भवति मे विधिपाशभङ्गः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

ओजस्तव प्रहितशेषविषाग्निदग्धैः
स्पष्टं जगद्भिरुपलभ्य भयाऽऽकुलानाम् ।
गीतोक्तिभिस्त्वयि निरस्य मनुष्यबुद्धिं
देव स्तुत्योऽसि विधिविष्णुवृषध्वजानाम् ॥

औत्कण्ठ्यमस्ति दशकण्ठरिपो ममैकं
द्रक्ष्यामि तावकपदाम्बुरुहं कदेति ।
अप्येति कर्म निखिलं मम यत्र दृष्टे
लीनाश्च यत्र यतिभिस्सह मत्कुलीनाः ॥

अम्भोनिधाववधिमत्यवकीर्य बाणान्
किं लब्धवानसि ननु श्वशुरस्तवाऽयम् ।
दृष्ट्वाऽपनेतुमथवा यदि बाणकण्डूः
देवाऽयमस्त्यनवधिर्मम दैन्यसिन्धुः ॥

अश्रान्तमर्हति तुलाममृताम्शुबिम्बं
भग्नाम्बुजद्युतिमदेन भवन्मुखेन ।
अस्मादभूदनल इत्यकृतोक्तिरीशं
सत्या कथं भवतु साधु विवेकभाजाम् ॥

कल्याणमावहतु नः कमलोदरश्रीः
आसन्नवानरभटौघगृहीतशेषः ।
श्लिष्यन्मुनीन्प्रणतदेवशिरःकिरीट-
दाम्नि स्खलन्दशरथात्मज ते कटाक्षः ॥

खं वायुरग्निरुदकं पृथिवी च शब्द-
स्स्पर्शश्च रूपरसगन्धमपि त्वमेव ।
ध्यानाय किन्त्वविदुषां दययात्तबन्धो
धत्से वपुश्शरशरासभृदभ्रनीलम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गङ्गा पुनाति रघुपुङ्गव यत्प्रसूता
यद्रेणुना च पुपुवे यमिनः कलत्रम् ।
तस्य त्वदङ्घ्रिकमलस्य निषेवया स्यां
पूतो यथा पुनरघेऽपि तथा प्रसीद ।।

घण्टाघणंघणितकोटिशरासनं ते
लुण्टाकमस्तु विपदां मम लोकनाथ ।
जिह्वालतां वहति यद्धजगो रिपूणां
उष्णैरसृग्भिरुदरम्भरिणा शरेण ।।

प्राङ्स्यवाङसि परेश तथाऽसि तिर्यङ
ब्रूमः किमन्यदखिला अपि जन्तवोऽसि ।
एकक्रमेऽपि कति वा भुवि न भ्रियन्ते
मन्दस्य राघव सहस्व ममाऽपराधान् ।।

चण्डानिलव्यतिकरक्षुभिताम्बुवाह-
दम्भोलिपातमिव दारुणमन्तकालम् ।
स्मृत्वाऽपि सम्भविनमुद्विजते न धन्यो
लब्ध्वा शरण्यमनरण्यकुलेश्वरं त्वाम् ।।

छन्नं निजं कुहनया मृगरूपभाजो
नक्तञ्चरस्य न किमाविरकारि रूपम् ।
त्वत्पत्रिणाऽपि रघुवीर ममाऽद्य माया-
गूढस्वरूपविवृतौ तव कः प्रयासः ।।

जन्तोः किल त्वदभिधाम मणिकर्णिकायां
कर्णे जपन्हरति कश्चन पञ्चकोशान् ।
इत्यामनन्ति रघुवीर ततो भवन्तं
राजाधिराज इति विश्वसिमः कथं वा ।।

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अञ्जलिमहिमा

श्री शेषाद्रि अय्यंगार्यः, न्यायाध्यापकः, S. V. O. C. श्रीपदपुरम्.

बद्धाञ्जलिं नतं दृष्ट्वा वितरन् सकलं फलं। योऽतृप्यन् लज्जते देवः नतोऽस्म्यञ्जलिकिंकरम् ।

लोके तावत् अपराधिनां दासानां स्वामिप्रसादने शरणागतेः तुल्यः कोप्यन्यः उपायः नास्ति । अतएव तैत्तरीयब्राह्मणे "तस्माद्वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति" इति वधार्होऽपि प्रपन्नः स्वामिना क्षन्तव्य एवेत्युपदिष्टम् । रक्षणकुशलः दयाळुश्च, यः शत्रुमपि पादयोः पतितं न परित्यजति स इति "स तं निपतितं भूमौ शरण्यः शरणागतं वधार्हमपि काकुत्स्थः. कृपया पर्यपालयेत्" इति काकासुरवृत्तान्तकथनावसरे वाल्मीकिनोक्तम् । "अनतिक्रमणीयं हि चरणग्रहणं" इति देशिकाः ।

शरणागतिर्नाम कुपितस्य प्रभोः प्रसादजनकः सुलभः उपायः । स च मनोवाक्कायैः त्रिभिः क्रियमाणः पूर्णः इत्युच्यते । श्रीरामायणे वनं प्रति प्रस्थितस्य भ्रातुः पादयोः पतित्वा लक्ष्मणः शरणागतोऽभूदिति "स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः" इत्यवाचि । विभीषणशरणागति घट्टे "सर्वलोकशरण्याय राघवाय महात्मने । निवेदयत मां क्षिप्रं विभीषणमुपस्थितं" इति वाचा पूर्वं विभीषणः स्वप्रपत्तिं निवेदयति । इति बहूनि उदाहरणयोग्यानि । तत्र कथितः शरणागतिव्यापारः नमस्कारः । स चाञ्चलिरूपः । तत्र "बद्धाञ्जलिपुटाः हृष्टाः नमः इत्येववादिनः" इत्यादिषु तस्य नमः शब्द साहचर्यमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतीतम् । तस्य माहात्म्यं सहस्रवदनेनापि दुर्वर्णनमिति प्रतिभाति । मादृशस्य मितंपचस्य तत्प्रतिपादने का शक्तिः ? तथा हि ।

अञ्जलिना नरः स्वकीयं प्रेम, भक्ति, कार्तज्ञ्यं, शरणवरणं, आकिञ्चन्यं, दैन्यं, अनन्यगतितां, रक्षापेक्षां, अपराधक्षमायाञ्चां, स्वापकर्षं, परोत्कर्षं, दास्यं इत्यादिकं बहुना वाक्प्रपञ्चेन प्रकटनीयं सर्वं प्रकटयति । यदि वयं कंचन प्रियसुहृदं बहोः कालादनन्तरं पश्येम, तर्हि स्मेरमुखाः साञ्जलिबन्धं कुशलंच्छामः । अधुना पुनः पाश्चात्य संस्कृतौ मुग्धाः नागरिकाः एकहस्तेन प्रणमन्ति । बहोः कालात् पूर्वं आरभ्य महर्षिभिः प्रवर्तितायां भारतीयसंस्कृतौ करद्वयप्रणाम एव आदृतः इति तदाचरणमेवास्माकं समीचीनम् ।

"तौ युतावञ्जलिः पुमान्" इत्यमरकोशे तत्स्वरूपं उपदिष्टम् । प्राचामाचारश्च रामायणादिभिः ज्ञेयः । तत्र "शिरस्यञ्जलिमाधाय कैकेय्यानन्दवर्धनः । बभाषे भरतो ज्येष्ठं" इत्यादिषु भ्रातृ प्रभृतिषु विनयप्रदर्शनावसरे कनिष्ठैः आचरिततया प्रतीयते । देवालयेषु आञ्जनेय वैनतेयादि भक्तानां उत्सवमूर्तयः साञ्जलिमुद्रा एव प्रतिष्ठिताः दृश्यन्ते । देवालयनिर्मातृणां कृष्णदेवरायादिनृपाणां प्रतिमा अपि तथैव स्तंभेषु शिल्पिभिः निर्मिताः । अतोऽयं प्राचीनः आचार इति अकामैरप्यंगीकार्यम् ।

भगवद्भक्तिपरीवाहभूतेषु स्तुतिनमस्कारकीर्तनार्चनगान - भजनादिषु अञ्जलिरेव पूर्वभावी सुसाध्यो मुख्यश्च । शत्रोः सकाशादपि प्राणरक्षणं अञ्जलिवैभवकृतमिति बहुभिर्वृत्तान्तैरवगम्यते । "बद्धाञ्जलिपुटं दीनं योहन्याद्वैरिणं, तादृशस्य नरकानुभवः जन्मान्तरे, इहजन्मनि साधुसंसदि गर्हणं च भवति । "ब्रह्मघ्ने च सुरापे च स्तेने च गुरुतल्पगे । निष्कृति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहिता शास्त्रैः कृतघ्ने नाऽस्ति निष्कृतिः" इति कृतोपकार-विस्मरणदोषः पञ्च महापातकानप्यतिशेते। नरः उपकृतवते जनाय अञ्जलिना कृतज्ञतामाविष्कुर्वन् उक्तं दोषमपि अनायासं दूरीकुर्वन् आत्मानं रक्षति।

अञ्जलिमुकुले कराभ्यां धृते सति तत्समानेन तस्मात् अभ्यधिकेन वा अर्हणेन अप्रसन्नोऽपि भगवान् प्रसीदति। अतएव "तेजमान अणिकलनुं ऍन् कैकूप्पुच्चैऽकैये" इति द्राविड सहस्रगीत्यां शठकोपसूरिः ऊचे। भावस्तु-बाह्याडम्बरभूतैः सुवर्णरत्नादिभूषणैः भूषितो भगवान् न प्रसीदति किन्तु मदीयाञ्जलिबन्धेनैव हृदयपुण्डरीकस्थो हरिः भूषितो मोदते" इति अं=जलयति-दयार्द्रं जलवच्छीतं, प्रसन्नं करोतीति अञ्जलिः। अथवा लडयोरभेदात् अं=जडयति - सर्वज्ञमपि जडं अपराधानभिज्ञं करोतीत्यञ्जलिः। अव रक्षणे इति धातोः अवतीत्यर्थे "अः" इति शब्दः सर्वरक्षणोपयुक्तकारुण्य-वात्सल्यादि कल्याणगुणाकरं भगवन्तमभिधत्ते। अतो भगवन्तं नारायणमेव अस्मासु मुग्धं करोति चेत् लौकिकजनप्रसादनेऽस्यांजलेर्महिमा किमु वर्णनीया?

नास्तिकतया श्रद्धाभक्तिहीनो यः पुरुषः जीवन् कदाऽपि बुद्धिपूर्वं भगवन्तं नैव नमोऽकरोत्, सः अन्त्यकाले समीपगतैः प्रयासात् बद्धाञ्जलिः कृतः शरीरं विजहाति चेत् सोऽप्यंजलिः तस्मै निःश्रेयसाय कल्पते इति "माळुमोरिडत्तिलुं वणक्कोडु माळ्वदुवलमे" इति द्राविडगीतेन शठकोपमुनिरगायत्। एतदनुसंधाय यामुनाचार्योऽपि स्वकीये स्तोत्ररत्ने "त्वदंघ्रिमुद्दिश्य कदाऽपि केनचिद्यथा तथावापि सकृत्कृतोऽञ्जलिः।
तथैवमुष्णात्यशुभान्यशेषतः
शुभानि पुष्णाति न जातु हीयते"
इति तद्वैभवं व्यशदयत्। अत्र "सर्वेषामेव धर्माणामुत्तमो-वैष्णवो विधिः। रक्षते भगवान्विष्णुः भक्तानात्मशरीरवत्" इति सर्वाधिकत्वेन कथितेभ्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मार्जनोपलेपन - मालाकरण-दीपारोपणादि प्रसादनानन्तरेभ्यः समधिकं बहुवित्तव्ययायासनिरपेक्षं विवक्षितस्य सुकरं स्वरूपमाहे"ति वेदान्ताचार्य एतच्छ्लोकमवतारयामास ।

एतेनाञ्जलेः कैङ्कर्यरूपपुरुषार्थरूपतया स्वयं आनन्दात्मकतया अत्र स्वरसतः सतां प्रवृत्तिरपि गम्यते । स्वामि प्रीतिजनकस्य तदाज्ञप्तस्य कर्मणः किल लोके कैङ्कर्यपदप्रयोज्यता ।

भागवतापचारमपि अञ्जलिः परिहरति । नान्यः । श्रीरामायणे किष्किन्धाकाण्डे श्रीलक्ष्मणस्य कोपपात्रभूतं सुग्रीवं प्रति हनुमदादेशः "कृतापराधस्य हितेनान्यत्पश्याम्यहं क्षमं । अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात्" इति ।

दर्शपूर्णमासादिः स्वर्गसाधनं धर्मः बहुकालव्यवहितफलदायकः । "अञ्जलिः परमा मुद्रा क्षिप्तं देवप्रसादनी" इति तदात्वे एव फलोपधायकतया प्रमणेषक्तः । कृच्छ्रचान्द्रायणोपवासादिरूपः प्रायश्चित्तधर्मः कस्यचन प्रतिनियतस्यैव पापस्य निवारकः । किंतु सर्वपापप्रतिभूरञ्जलिः । वेदान्तदेशिकः "हस्तीशदुःखविषदिग्धफलानुबन्धिन्याब्रह्मकीटमपराहत संप्रयोगे । दुष्कर्मसञ्चयवशाद् दुरतिक्रमे नः प्रत्यस्त्रमंजलिरसौ तव निग्रहास्त्रे" इत्याह । यदि युद्धे रिपुणा नारायणास्त्रं प्रयुज्यते तदा यद्यंजलिं बद्ध्वा नमस्क्रियते तर्हि तदस्त्रं प्रतिनिवृत्य प्रयोक्तुः इषुधिमधिशेते । एवं आब्रह्मस्तम्बमपरिहार्ये निग्रहसङ्कल्परूपे दुःखफलप्रदे अस्त्रे भगवता प्रयुक्ते प्रायश्चित्तादिकं तत्र प्रत्यस्त्रं न भवितुमर्हति । अपितु अजलिरेव प्रत्यस्त्रं, येन प्रयुक्तेन स्वेरितं निग्रहास्त्रं भगवान्प्रतिसंहरति इति भावः । पराशरभट्टारका अपि सांजलिबन्धं रङ्गनायिकां संसेव्य लज्जयेव किञ्चिदवनतमुखीं देवीमालोक्य "ऐश्वर्यमक्षरगतिं परमं पदं वा कस्मैचिदंजलिभरं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहते वितीर्य । अस्मै न किंचिदुचितं कृतमित्यथाम्ब! त्वं लज्जसे कथय कोऽयमुदारभावः" इति उत्प्रेक्षते । अल्पमप्यंजलिभारं वहन्तं स्वस्मै प्रत्युपकाररहितं उपकर्तारं च आश्रितं मन्यमाना देवी तस्मै मुक्त्यन्तमैश्वर्यं दत्वा दातव्यस्य अनवशिष्टतया अन्यस्य च दातुमशक्यतया लज्जसे इव दृश्यसे इति भावः ।

अतः क्रूरे कलौ लब्धजन्मनोऽपि वयं सुलभेनांजलिना भगवन्तं संप्रसाद्य स्वाभीष्टं पूरयितुं समर्थाः ।

अञ्जलेर्महिमानन्नू-
मितप्रज्ञगोचरः ।
वार्धिनिर्देशनयतः
किञ्चिदेव प्रदर्शितः ॥

इति शम् ।

वर्षाऋतुः

कविः काव्यतीर्थ ज. व्यं. पल्लेवारः उपाख्यः जयेशः, M.A. LL.B.
पुसद. (महाराष्ट्र)

नृत्यन्ति वर्षागमनात् मयूराः नर्दन्ति नद्यो नवनीरनर्तैः ।
स्फुटन्ति शीघ्रं नवपल्वलानि नवाम्बुफुल्लानि च पल्वलानि ॥
मदान्धतां गच्छति हस्तियूथम् मदप्रमत्ता वृषभा भवन्ति ।
हसन्ति मुग्धाः हृतधीकृषाणाः त्यजन्ति यात्रां पथिकाः प्रियोत्काः ॥
क्लिन्नाम्बुधारैः धरणी सुगन्धा तृणाङ्कुरैर्भूषितशाद्वलांगी ।
तटिल्लता ताडित चंचलांगी महेन्द्रचापांकितमोहनीया ॥
चिन्तापहारी खगचातकानाम् चित्तप्रहारी युवतीजनानाम् ।
कामातुरप्रोषितभर्तृकाणाम् संयोगकारी विरहार्तितानाम् ॥
वर्षाऋतुर्वर्षतु वर्षधाराः वर्षा समागच्छतु योग्यकाले ।
वर्षा समागच्छतु सस्यभूमिं वर्षा समागच्छतु कर्षके वा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गणेशकरावलम्बस्तोत्रम्

रचयिता– विद्वान् श्री बालगणपतिभट्टः, श्रीरङ्गपत्तनम्

गंगाधरात्मज गणेश गकारपूज्य
गौर्यङ्गपङ्ककृतदेह गजास्य देव ।
गीर्वाणवन्द्य गुहपूर्वज गानलोल
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

गर्जाविनिर्जितनिशाचरसंघ देव
गात्रानुलेपितसुगन्ध गिरीशपुत्र ।
गोपार्तिनाशनधुरन्धर गोपपूज्य
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

गान्तादिगेश करुणाकर दीनबन्धो
लम्बोदराऽद्रितनयात्मज सुन्दराङ्ग ।
सर्पैकभूषण विभो रदनैकदेव
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

पद्मेशपद्मभवपद्मकरार्चितांघ्रे
पापापनोदनविचक्षण पावनाङ्ग ।
पञ्चास्यवाहजननीमुखपद्मबन्धो
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

तर्कातिदूरमहिमान्वित तारकारि-
पूर्वोत्थ तूर्णवरदानसुसिद्धहस्त ।
तत्सत्स्वरूप तरुणारुणकान्तिकान्त
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येचेह लब्धजननाः भवसिन्धुमग्नाः
नित्यान्तरायतिमिनक्रझषादिदष्टाः ।
त्वत्पादपोततरणेन नितान्ततुष्टाः
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

नीत्वा त्वदीय पदपङ्कजमेव लोकाः
निर्विघ्नकार्यकरणे हि भवन्ति दक्षाः ।
नाकेशमुख्य सुरलोक नुतांघ्रिपद्म
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

मोक्षप्रदाऽशु नतलोकजनस्य देव
मोदाहृतैककरमोदक मातृभक्त ।
माणिक्यभूषण सुमाणवकस्वरूप
विघ्नाद्रिवज्र मम देहि करावलम्बम् ॥

तपोवनम्, चित्तूरु

चित्पुर्यां तपोवने गतवत्सरे स्थापितायां गौतमीजीवकारुण्य-संस्कृतप्राथमिकपाठशालायां श्रीमलयाळस्वामि संस्कृतोन्नतपाठ-शालायां च आगस्टमासे तृतीयदिने (३-८-७४) संस्कृतदिनोत्सवः श्रीचिदानन्दगिरिस्वामिनां आध्यक्ष्येण प्रचालितः । श्री पि. सुब्ब-राघवशर्मणा संस्कृतस्य प्राशस्त्यं पठनावश्यकतां उद्दिश्य उपन्यासः कृतः । पाठशालाप्रधानोपाध्यायेन धन्यवादाः अध्यक्षस्य उपन्यास-कस्य सभ्यानां च समर्पिताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतदिनोत्सवः

३-८-७४ दिने सायं पञ्चघण्टावादनसमये संस्कृतभाषाप्रचारिणीसभाभवने संस्कृतदिनमधिकृत्य सभा प्रचलिता । मेजर् श्री के. राममूर्तिः (प्रांशुपालः, प्रभुत्वकलाशाला, चित्तूरु) अध्यक्षस्थान मलञ्चकार । सभायाः कार्यदर्शी श्री यन्. रामनाथार्यः दैवप्रार्थनाऽमकरोत् । ततस्स एव अध्यक्षस्य, सभ्यानाञ्च स्वागतं वदन्, एतन्महोत्सवकरणाऽऽवश्यकतां विशदीचकार । अनन्तरं अध्यक्षः श्री के. राममूर्तिः एवमभाषत– "एषा संस्कृतभाषा अतीव प्राचीनतमा । न केवलं भारतीयभाषाणां, अपितु प्रपञ्चे वर्तमानानां सकलानामऽपि भाषाणां मूलभूता वर्तते । विना जातिमतभेदं सर्वैःऽपि एषा भाषा अभ्यसनीया । अभ्यस्तसंस्कृतभाषाणां, यस्यां कस्याञ्चित् शाखायामुद्योगं कुर्वतां प्रत्येकवेतनं (Special Allavance) दातव्यं, तेन संस्कृतव्याप्तिरितोऽप्यधिकतरास्यात्' अस्मिन्विषये संस्कृताभिमानिभिः प्रयत्नः कार्यः" इति ।

अनन्तरं श्री गोपालः (भूतपूर्वतमिलोपाध्यायः) तु "अधुनातनकाले संस्कृताऽभ्यासः सर्वेषा मावश्यकः पाश्चात्या अपि संस्कृताभिमानिनः वर्तन्ते । देशसमैक्यतायाः इयं भाषा अत्यन्तमुपकरोतीत्यवोचत् ।

ततः श्री के. मुनिरेड्डिः (आन्ध्रप्रदेशसाहित्य अकाडमी सभ्यः) संस्कृतस्य अभ्यासे सर्वे अधिकारिण इति संस्कृतभाषा सरला, मनोहरा भारतदेशस्य उन्नतेः कारणमिति संस्कृतभाषायां उपन्यासं चकार ।

अनन्तरं श्री टि. कामेश्वररायः संस्कृतभाषाकवीनां कालिदासप्रभृतीनां कवितामहत्वं प्रोवाच श्री केः सि. जयचन्द्रशास्त्री (सभायाः मानेजरः) संस्कृते संस्कृतस्य वैशिष्टचऽमाबभाषे ।

अन्ततः श्री सुब्बराघवार्यः (स्थानिक - संस्कृतोपाध्यायः) संस्कृतं प्रशंसन् अध्यक्षस्य, सभ्यानाञ्च वन्दनसमर्पणऽमकरोत् ।

एवं कार्यसरण्या सभाऽवसिता । ***

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकेऽस्मिन् सर्वकृद्धनम्

श्री ना. व. निगमान्तः, प्रोद्दुटूरु.

सा कृष्णपक्षीया रात्रिः। अञ्जननिभोऽन्धकारः सर्वत्र गाढं लिप्त इव अभासत। नववर्षतृषिता भेकाः आसन्नतटाकवासिनः "बकबकेति भृशं रटन्ति स्म। पामापीडितः कश्चन जरच्छ्वा कुत्रापि कुटीररन्ध्रेशयानः दीनमरोदीत्। नीरन्ध्रान्मेघपुञ्जात् उदकबिन्दवः वायुवशात्तदा तदा भुवि न्यपतन्। शीतवातमुदिता इव झिल्लिका अपि "जुय्म्" शब्दं उत्पादयन्ति स्म। अल्पजनसङ्ख्याकः ग्रामविशेषः सः। चतस्रः वीथिका एव तत्रासन्। परं प्रकृतिसुन्दरः। अष्टघण्टातः पूर्वमेव निश्शब्दोऽभूत् सः संवसधः। उटजभूयिष्ठे तत्र अत्युन्नतं त्रिभूमभासुरं भवनमेकं व्यराजत। नूतनतया आधुनिकपद्धत्या निर्मितं तत् नानाविधैः कृत्रिमवर्णैः चित्रीकृतमभूत्। प्रधानद्वारस्योपरि "सुन्दरमन्दिरम्" इति स्थूलाक्षरैः विलिखितमासीत्। भवनपुरोभागे अधुनातनाः वृक्षाः लताश्च विचित्रैः पुष्पैः निकेतनमिदं द्विगुणितशोभामकार्षुः। सद्मभितः पुरुषोन्नतः प्राकारविशेषः तदलञ्चकार। प्राकारस्य अन्तः एकत्र अतिनवं बहुमूल्यं पाश्चात्यदेशानीतं मोदकरयानं (Motor Car) अलक्ष्यत। प्रधानद्वारि कञ्चुकच्छुरिकाद्यलङ्कृतः कश्चिद् द्वारपालकः नातिविस्तृते पीठे उपविशन्नेव स्वपन्नदृश्यत। चन्द्रशालोपरिष्टात् गृहस्वाम्यवलम्बितराजकीयपक्षध्वजः वायुवेगात् चलन् "पटपटेति" निनदमुत्पादयामास। प्रासादे विशालमेकं शयनगृहम्। तदन्तः सर्वत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भित्तिषु वैद्युतिकनाटकीय नटी-चित्रपत्राणि, नग्नस्त्रीप्रतिमाश्च नागरिकसूचिकाः संयोजिता-न्यभवन्। विदेशासादितवर्तिको-त्थापितः सुगन्धः मारुतवशात् सन्निकृष्टं स्थलमपि वासना-सहितमकार्षीत्। पीठोपरि स्थापिता आकाशवाणी पाश्चा-त्यदेशीयं सङ्गीतं मृदु प्रसारयति स्म। अपरत्र कस्मिंचन उन्नते पीठे धनिकास्वाद्यः आसवः केषु-चन पात्रेषु निक्षिप्तऽभवत्। अल्पप्रकाशः कश्चित् विद्युद्दीपः कुवलयसमां कान्ति तत्र प्रकिरन् अभूत्। कट्फलदारुनिर्मितः अतिस्निग्धः विशालः पर्यङ्कः तं स्वापगृहं अलमकार्षीत्। विचि-त्रास्तरणयुक्तस्य सोपधान शय्यासनाथस्य तस्योपरि शयानः मद्यसेवनालसः वैद्युतिकव्यजनो-द्भूतं सुखस्पर्शं शीतवायुं अनु-भवन् स्वपाणिपादं दीर्घीकुर्वन् निश्शङ्कं कश्चित् सुप्तोऽदृश्यत। कोसौ? अहं जाने इमं। एषः आधिकारिकपक्षानुसारी सुन्दर-मूर्तिः एम्. एल्. ए.। योऽयं अचिरप्रवर्तिते एलक्षन्समये आधिकारिकपक्षाभ्यर्थित्व प्रक-टयन्, जनसम्मतिपत्राधिक्येन प्रत्यर्थिनः पञ्चापि स्वयमेकाकी निर्जित्य, अनन्यलभ्यां कीर्ति, एम्. एल्. ए. (M. L. A.) पदवीं च प्राप्तवान्। अद्य एतदीयं वचनमेव अत्रत्यानां वेदवाक्। तन्नकोपि कदापि उल्लङ्घितुं क्षमते। रिक्तानां निर्मलचित्तानां च ग्रामवासिनां सकलानामपि स्वाम्ययमेव। छत्रचामरादि-चिन्हसहितः राजेव अयं ग्राम-मिमं प्रशास्ति इत्येवं चिन्तयति सति मयि, निश्शङ्कं स्वपन् सुन्दरमूर्तिः झटिति प्रतिबुद्धः शय्यायां उपविशन् सरोषं किमपि वक्तुमारभत। एतत् दृष्ट्वा विलक्षोऽहं मन्दंमन्दं शयनगृहस्थितवातायनसमीपं गत्वा इतराविदितं, गवाक्षरन्ध्र-द्वारा अन्त रपश्यम्। तत्र कश्चन देवसदृशः पुरुषः सुन्दरमूर्तेः पुर-तस्तिष्ठन् उच्चैः जहास। सद्यो-जातभयाक्रान्तः सुन्दरमूर्तिः इति कर्तव्यतामूढः सन् आत्मानं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परितः सम्यक् एकवारं दृष्ट्वा दीनस्वरेण कथञ्चिदपृच्छत् । कस्त्वं? कथं, किमर्थमागतोसि? मां दृष्ट्वा किमर्थं हससि? प्रत्युत्तरमलभमानः द्विगुणितभीतिः सः पुनः पुनः तदेव आम्रेडितं चकार, अतःपरं न किमपि वक्तुमशकत् । सुन्दरमूर्तेराशयं जानन्निव सोयं पुरुषः तं प्रति एवं अवोचत् । पुरुषः (सस्मितं) सुन्दरमूर्ते! मा भैषीः । नाहं चोरः । नापि त्वद्रिपुः । त्वच्छायाभूतं मां "मनः" इति "मनस्साक्षी" इति च जना वदन्ति । लोके प्रतिव्यक्ति अहं वसामि । प्राणिकृतं गुणं दोषं सत् असत् सर्वमप्यहं जानामि । मदविदितं न कोपि किमपि कर्तुं शक्नोति । केचन मूढाः सन्तमपि मां असन्तमाकलयन्तः यथेच्छमन्याय्यमाचरन्ति । अहो वैधेयता जनानाम् । चेतनः यदाहि अधर्मं चिकीर्षति तदा प्रथममहमेव तं प्रबोधयामि, अधर्मात्तं निवर्तयितुं च प्रयते । केचिद्दुरात्मानः मां निरुन्धन्तः केनाप्युपायेन स्वाभीष्टं साधयन्ति । एकाक्यहं किं कुर्याम्? अहन्तु त्वन्मन एव, सत्यमेतत् । रहसि त्वया सह सम्भाषितुं मानुषरूपं त्वत्सदृशं अद्य मया-स्वीकृतम् । जीवितकाले भवता असंख्येयान्यधर्मकर्माण्यनुष्ठितानि । तान्यधिकृत्य भवता कदापि ईषच्चिन्तितं वा? क्षणिकोयं आयुःकालः । प्रथमक्षणे भाषमाणः सन् मर्त्यः द्वितीयक्षणे मृतो भवितुमप्यर्हति । अतएव प्रतिक्षणं मृत्युः भविष्यतीति ज्ञात्वा कालविलम्बं विना द्रुतं पुण्यफलदं कर्म कर्तव्यम् । तथा नकृतम् त्वया । तदा तदा प्रतिषेधे । कृतेपि मामनादृत्य भवदनुष्ठितेषु पापकर्मसु भवत्प्रतिबोधनाय स्थालीपुलाकन्यायेन द्वित्राः वृत्तान्ताः आवेद्यन्ते, प्रथमं भवच्चरित्रवर्णनं क्रियते सावधानं श्रूयताम् ।

पञ्चविंशतिवर्षेभ्यः पूर्वं जीर्णवस्त्रः अपरिष्कृतकेशः दशवर्षीयः बालकः कश्चित् पित्रोः बन्धोश्च अभावात् अनाथः इतस्ततः वीथ्यां परिभ्रमन् क्षुत्पि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पासातै: यत्र कुत्रापि यत्किमपि कर्मकुर्वाण: शुनासाकं रात्रौ रथ्यायां शयान: कालं निनाय । स: कदाचिदट्टशालादिषु पात्रादि शोधनं कलयन्, कदाचिद्धूम-शकटालयं गत्वा आगन्तुकधनिक-शय्यापेटिकादीनि स्वयं शिरसा धरन्, कदाचन प्रथितराजकीय-पक्षसम्बन्धीनि ध्वजधारण समा-वेश सूचनापत्रदान कक्ष्यासमा-वेशनिर्वहणादीनि कार्याणि सोत्साहं अनुतिष्ठंश्च ववृधे । एवं बहूनि दिनानि व्यतीयु: । एष बालकोपि क्रमेण युवा सञ्जात: । प्रकृत्या वाचालत्वा-त्तस्य सर्वेपि जना: तदीयां वाचं अनृतामपि सत्याममन्यन्त । स्वल्पेनैव स्वकीयेन लौकिक-ज्ञानेन दैशिकान् सकलानपि वृत्तान्तान्निश्शङ्कं स विमृशति स्म । स्वानभिलषितं यं कमपि सुशीलं प्रजानायकं प्रतिपक्षनेतारं वा निरङ्कुशं व्यनिन्दत् । अत एव राजकीयवेत्तार: स्वपक्षीय-सिद्धान्तप्रकटनाय केचन एत-दीयां वाचालतां जानन्त: तं स्वकक्ष्याप्रचारकं चक्रु: । तदा-प्रभृति दैन्यवृत्तिं तिरस्कुर्वन् स (कक्ष्या) पक्षनेतृकृतधनसाहा-य्येन अनर्घं कञ्चुकादिकं दधार। आप्तै: पारितोषिकत्वेन दत्तां कालसूचिकां (Watch) हस्ते धरन्, नवनवानि वासना द्रव्या-ण्युपयुञ्जान:, युवतिजनचित्ता-कर्षकं आकल्पं विरचयन्, स्वयं विद्या गन्धरहितोपि, अपरिचित-राजकीयवृत्तान्तोपि विद्वद्भि: राजकीयमर्मवेदिभि: प्रमुखै: सह साटोपं संवादयामास । स्वाश्रित: पक्ष एव श्रेयान् नान्य: इति सयुक्तिकं प्रतिपादयामास । एवं स्वल्पेनैव कालेन स: राजकीय-विषयोपन्यासक: प्रवक्ता च संवृत्त: । राष्ट्रे तत्र तत्र गत्वा सार्वजनिकेषु समावेशेषु सर्व-जनाकर्षकं उपन्यसति स्म । भोक्तुं मुष्टिपरिमितं अन्नमप्य-लभमान: पूर्वं अनल्पां व्यथां योऽन्वभवत् स एवेदानीं प्रसिद्ध: कश्चन राजकीयपक्षनायक: सम-पद्यत । सदा मोदकरयानेन सञ्चरन् भोजनशालासु पर-मान्नादीन्यभुङ्क्त ।

—(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

श्री यन्. रामनाथार्यः

[पूर्वानुबन्धः]

अनुसरति करिकपोलं भ्रमरः श्रवणेन ताड्यमानोऽपि ।
गणयति न तिरस्कारं दानान्धविलोचनो मूर्खः ॥ ॥ ५३५ ॥

The bee hovers near the cheek of the elephant though warded off by its ears. A wicked person, blinded by arrogance, does not care for the contempt shown to him.

ऊर्जितं सज्जनं दृष्ट्वा द्वेष्टि नीचः पुनः पुनः ।
कबलीकुरुते स्वस्थं विधुं दिवि विधुन्तुदः ॥ ॥ ५३६ ॥

A low minded person is always jealous of the greatness of the noble minded The planet Rahu, devours the Moon often, who is placed in happiness in the sky.

एकस्य कर्मसंवीक्ष्य करोत्यन्योऽपि गर्हितम् ।
गतानुगतिको लोकः न लोकः पारमार्थिकः ॥ ५३७ ॥

when one commits a sinful act, others follow suit. Generally people follow the example of others without considering the truth of it.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथैवात्मा परस्तद्वत् द्रष्टव्य स्सुखमिच्छता ।
सुखदुःखानि तुल्यानि यथात्मनि तथाऽपरे ॥ ॥ ५३८ ॥

One who would like to lead a happy life, should treat others as he would treat himself. For the happiness and misery experienced by a person are similar to the same experienced by others.

न क्लेशेन विना द्रव्यं, द्रव्यहीने कुतः क्रिया ।
क्रियाहीने न धर्मस्स्यात्, धर्महीने कुतस्सुखम् ॥ ॥ ५३९ ॥

Wealth is not acquired without privation; without wealth, no good deeds can be accomplished; without good deeds no merit can be acquired; without merit where is real happiness?

सुखं वाञ्छन्ति सर्वेऽपि तच्च धर्मसमुद्भवम् ।
तस्माद्धर्मस्सदा कार्यः सर्ववर्णैः प्रयत्नतः ॥ ॥ ५४० ॥

Everyone wants to live happily; happiness is the result of righteous conduct; it follows that everyone without distiction should perform righteous actions without remiss.

पत्नीमूलं गृहं पुंसां, यदि छन्दोनुवर्तिनी ।
गृहाश्रमात्परो नाऽस्ति, यदि भार्या सदाऽनुगा ॥ ५४१ ॥

The domestic happiness of a person rests on his wife provided she acts agreeably to the wishes of her husband. The position of a house holder is the best provided the wife behaves agreeably towards her husband.

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

प्रजासंस्कृतपरिषत्, गुंटूरु द्वितीयवार्षिक प्रारंभोत्सवः

श्री नेति अनन्तरामशास्त्री, एम्. ए.

लिखितग्रन्थापेक्षया व्यवहृत शब्देनैव प्रजासु संस्कृतभाषायाः प्रचारः शीघ्रगत्या साधयितव्यः इति गुण्टूरुनगरे तत्रस्थ के. वि. के. संस्कृतकलाशाशालायां प्रजापरिषदः प्रारम्भोत्सवकाले उदीरितेषु बहुषु उपन्यासेषु पदे पदे उद्घाटितम् ।

तत्समावेशे अध्यक्षस्थानमलंकुर्वाणाः श्री चल्ला सत्यनारायणमहोदयाः संस्कृतभाषाप्रचारप्रारम्भः स्वगृहेष्वेव कर्तव्यः दैनन्दिनकार्यक्रमेषु स्वसुतादिभिस्सम्भाषणावसरेपि, संस्कृतभाषैवव्यवहर्तयाइत्युक्तवन्तः । कलाशालाध्यक्षाः श्री वै. अनन्तरामय्यमहोदया जातिसमैक्यनितान्तदोहदकारिण्याः संस्कृतभाषायाः पुनरुज्जीवनआवश्यकतामुद्घाटितवन्तः । तत्समावेशे बहवस्सभ्याः परिषदः चतुर्मुखीनं कार्यविधानमित्थं विशदी चक्रुः ।

१. संस्कृतभाषाभिज्ञानाम् विदुषां समाख्या एका व्यवस्थापयितव्या । ते परस्परं संभाषणं, उत्तरप्रत्युत्तरादिकम् संस्कृतभाषायामेव कुर्युः ।

२. कलाशालासु सुकृत संस्कृतभाषाभ्यासानाम् परस्तात्तदुपेक्षाणां न्यायवाद वैद्यादि विद्वद्वृत्त्यवलम्बिनां एकत्र संयोजनं कर्तव्यम् । साप्ताहिकगोष्ठीषु, चर्चा प्रधान कक्ष्यासु यथा ते भागस्वामिनः भवेयुः, तथा तेषां समुचितप्रोत्साहनं च कर्तव्यम् । अन्ततः ते न्यायवादादिवृत्त्यवलम्बिनः पूर्वप्राप्तभाषास्थानस्य सद्विनियोगं कुर्युः ।

३. मौलिकसंस्कृतभाषायां विद्यार्थिनः सुशिक्षितान्कर्तुं त्रैमासिकी प्रणालिका एका व्यवस्थापयितव्या । कलाशालागामिनां विद्यार्थिनां प्रतिदिनं संस्कृतभाषाबोधनं कर्तव्यम् । अन्ततः ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषायां व्यवहरणाय पर्याप्तं ज्ञानं प्राप्य, दैनन्दिनकार्येषु तद्भाषां स्वेच्छया व्यवहर्तुं समर्था भवेयुः ।

४. उन्नतपाठशालासु, संस्कृतकलाशालासु सर्वे छात्राः पंचवर्षपर्यन्तं संस्कृतभाषाभ्यसनावसाने, तद्भाषा भाषण कुशलाः यथा भवेयुः तथा व्यवस्थाम् कर्तुं तत्तदध्यक्षानाम् अभ्यर्थना कर्तव्या ।

इत्थं तदितरविधानैश्च, परिषत्, संस्कृतभाषा अभिज्ञवर्गैर्यथाव्यवहृता भवेत् तथा कर्तुं, अस्मिन्देशे ग्रामे ग्रामे नगरे नगरे संस्कृतवाणीव्यवहारकुशलः संघः यथा प्रवृद्धो भवेत् तथा कर्तुं सर्वथा यत्नः कार्यः ।

प्रारम्भोत्सवकाले कलाशालामन्दिरं विद्वद्भिर्विद्यार्थिभिरितरनरनारीसमूहैर्निबिडीकृतम् । सर्वेपि परिषदः देशभवत्युद्दीपितकार्याचरणविषये विजयमेव ऐच्छन् । वन्दनसमर्पणेन सभापर्यवसन्ना ।

पुस्तकसमीक्षा

श्रीमहागणपतिप्रादुर्भावः (रूपकम्)

श्रीगोकर्णसाम्बदीक्षितविरचितम्

मूल्यम् रू. २–००

श्री गोकर्णसाम्बदीक्षितमहोदयेन "श्रीमहागणपतिप्रादुर्भाव" नामकमिदं रूपकं अङ्कपञ्चकशोभितं गीर्वाणवाण्या वैभवपोषकं वाङ्मयं भूषणं संस्कृताभिमानिनां पाठकमहाशयानां करकमलयोः समर्पितमस्ति ।

अनेन रूपकेण विनायकपारम्यं प्रदर्शितं । सुश्लिष्टा सुलभा सरला च शैली । "सर्वान् वस्तमः कूपे पातनं" इति प्रयोगस्तु चिन्त्यः । प्रायशः सर्वत्र मुद्राक्षरस्खालित्यानि आपतितानि । "संवरण" पात्रप्रवेशनेन हास्यं निरूपितम् । प्रदर्शनयोग्यमिदं रूपकं निरवद्यं हृद्यं भवेदिति गैर्वाणी आशास्ते ।

"भवरः"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः शिव-केशवादि देववाचकानि नामानि सर्वाण्यपि तस्यैव परब्रह्मणः सगुणरूपवाचकानीत्यवधारणीयानि । मुमुक्षूणा भेदबुद्धि रत्याज्या, परं ब्रह्मैव ध्येयम्" इत्येव मद्वैततत्त्वं उपदिशन्नाचार्यः कतिपयकालं तत्रन्यवसत् ।

ततः शिष्यकोटी समेतः शंकराचार्यः दक्षिणापथं प्रति निवृत्तः; काञ्चीपुरे स्वेनैवेतः पूर्वं स्थापितं कामकोटिपीठमागत्य द्वात्रिंशद्वत्सर परिमिते जीवितकाले समाप्ते सति कृतकृत्यतया जगद्गुरुः भौतिकदेहं परित्यज्य परब्रह्मभावं गतः ।

३०. त्रिमूर्तिषु महान् कः ?

केदारक्षेत्रे हिमपातोऽधिकः । तत्र जलमप्यतिशीतलम् । यदा शंकराचार्यः तत्राऽसीत् तदा तस्य शिष्या दुस्सहेन शैत्येन स्नानसन्ध्यादिकं निर्वर्तयितुं अपारयन्तः आचार्य मुपसंगम्य प्राहु— "महात्मन् ! अस्माभि रत्रनैव स्थातुं शक्यते; अतिशीतलप्रदेशोऽय"मिति । आचार्यः शिवं प्रार्थ्य उष्णोदकनदीं कांचित् प्रवाहयामास शिष्यक्लेशं च निवारयामास ।

तस्मिन् पुण्यक्षेत्रे तपस्तप्यन्तो महर्षयो बहवः प्रत्यहं शङ्कराचार्य मुपेत्य सद्गोष्ठीं विधाय गच्छन्ति स्म । कदाचित् गोष्ठीसमये त्रिमूर्तिषु महान् कः ? इति प्रश्न स्समुद्भूतः । तस्य समाधानं ब्रुवन् शङ्कराचार्यः कदाचित्साक्षात्कृतया आदिशक्त्या स्वस्मै कथितं कंचन वृत्तान्तं "श्रूयता" मिति उदाहरत् ।

एकदा कलहाशिनः नारदस्य निरशनं सम्प्राप्तम् स भृशं चिन्तितः क्वचि दुपविश्य । अत्रान्तरे संयोगवशात् ब्रह्मविष्णुमहेश्वराः त्रिमूर्तयः गमनमार्गेण गच्छन्तः साक्षात्कृता नारदस्य । तत्सन्दर्शनमात्रेण, कलहप्रियस्य कलहबीज मस्फुरत् । अथ झडिति उत्थितो नारदः देवेन्द्रसभां तत्क्षण मगात् । इन्द्रेण सपर्याभिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सभाजितः उचितासने समुपविष्टो देवर्षिः किमपि सुदीर्घं चिन्तयन्निव नाटयति स्म। इन्द्रस्त मालोक्य "देवर्षे! किमिति भवान् चिन्तामुद्रितो दृश्यते" इति अप्राक्षीत्।

नारदः "त्रिमूर्तिषु उत्तमः कः? इति सन्दिहानः समाधानं पर्यालोचयामि। अस्यां देवसभायां कोऽपि महान् मदीयं संशयं निवारयितुं प्रभवति चेदुच्यता" मित्याह।

नारदोक्तं श्रुत्वा कश्चिद्देवः प्राह– सृष्टे रस्याः सर्वस्या अपि चतुर्मुख एव किल विधाता; अतस्स एव महा"निति।

अथान्यः कश्चिदुत्थाय "सृष्टिकर्तृत्वहेतोः न महत्त्वं सिद्धयति; किन्तु तद्रक्षणकर्तुरेव महत्त्वं; अतः स्थितिस्थापकस्य सत्त्वसमाश्रयस्य महाविष्णोरेव आधिक्य मिति जगाद। एव मपरः कश्चित् "जातं सर्वमपि यथातथं स्थितं चेत् लोको जीवराशिभिः निबिडीकृतो निरवकाशः स्यात्; अतस्तेषां लयोऽत्यन्तमपेक्ष्यते। यश्च लयकर्ता रुद्र इति स एव महान् भवितु मर्हति अन्ततो गत्वा" इत्याह।

निमेषमात्रेण देवसभा त्रिधा विभक्ताऽसीत्; केचिद्ब्रह्माणं महान्त माहुः; अन्ये विष्णुं परं मेनिरे; अपरे तु रुद्रं उत्तमं न्यरूपयन्।

इन्द्रः नारदं विलोक्य "ऋषिवर्य! भवदीयः संशयः यथावस्थितर्थितिं प्राप्तः" इत्याह।

नारदः– "सत्यमेतत्। सभ्याः स्वीया नभिप्रायान् प्राचीकटन्। अत्र कोवाऽभिप्रायः समीचीन इति निश्चेतु मशक्तस्य मे मनः भ्रमतीव; बुद्धिभ्रंशो भवतीव च। नेदं अत्र निर्णेतुं शक्यते; मेरुपर्वते महतीं सभा मायोज्य तत्र अशेषान् देवान्, यक्षान् किन्नरान् गन्धर्वान् दैत्यान् महर्षीन् अन्यांश्च आहूय अमुं विषय मधिकृत्य विचारः कर्तव्यः। किं ब्रूषे?" इतीन्द्रं प्रत्याह।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽपि "तथैव कर्तव्य" मित्याह ।

इन्द्रः मेरुगिरौ महासभायाः व्यवस्थां कारयन्नास्त । अत्रान्तरे नारदः ब्रह्मलोकं गत्वा ब्रह्माणं प्रणम्य तत्प्रदर्शित मुचितासनमधिष्ठाय देवसभावृत्तान्तं एवं व्यजिज्ञपत्– "भगवन् ! ह्यः देवसभायां त्रिमूर्तिषु महान् कः इति प्रश्ने समुत्थिते केचिद्विष्णुं अन्ये शिवं चाधिकं मत्वा वादोपवादैः कोलाहल मकुर्व"न्निति ।

ब्रह्मा– "मदीयमाधिक्यं न कोप्याह किम् ? इति पप्रच्छ । नारदः– भवदीय मप्याधिक्यं कैश्चित्प्रतिपादित मेव; परन्तु श्रोतॄणां संख्या अत्यल्पाऽसीत् । एतावता न किमपि इदमित्थमिति निर्णीतम् । आगामिन्या मेकादश्यां मेरुगिरौ इन्द्रेण काचिन्महती सभा आयोजयिष्यते । तत्र निर्णेष्यते को महानिति– इति हि श्रूयते" इत्याह ।

ब्रह्माऽह– "मां विहाय कमन्यं अधिकं भावयेयु र्देवाः; पश्यामितावत्" इति ।

नारदः– "सभाया मागत्य यदि भवानुपविशेत् को भवन्तं अपलपितुं शक्नुयात् ? अतोऽवश्यं भवताऽगन्तव्य" मित्यामन्त्र्य ततः प्रस्थितो वैकुण्ठमगात् ।

तत्रापि नारदः विष्णुना भुवनवृत्तान्तं परिपृष्टः देवसभावृत्तान्तं एवं न्यवेदयत् । "माधव ! लोके शैवानां बाहुल्य मस्तीति भाति । ह्यः प्रवृत्तायां देवसभायां शिवकिङ्कराणां कण्ठारव एव भृशं श्रुतः" इति ।

विष्णुः "ह्यः सभायां मद्भक्ता विरलाः स्युः; तावन्मात्रेण शैवाधिक्यं जातमिति न मन्तव्य" मित्याह । नारदः– "सत्यमुक्तं । भाविन्यां सभायां अस्माभिः निजपरिवारैः सह नेतव्यः" । विष्णु– सा सभा क्वनु प्रचलिष्यति ? किं वा ममाप्याह्वानं आगमिष्यति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारदः– किमुक्तं ? प्रप्रथमतया तत्र भवत एव आह्वानं भविष्यति । तदनन्तरमेवान्येषाम् । अवश्यं भवद्भिरागन्तव्यम् । आगमनसमये भवान् चक्रं गदां च माविस्मरतु ।

इति नारायणं प्रबोध्य नारदः कैलासं गतः । तत्र शिवाय इन्द्रसभावृत्तान्तं यथोद्वेगकरं वर्णयामास एवं– सृष्टिकार्यं रक्षणकार्यं च श्रेष्ठं भवितु मर्हति; लयकार्यं कथं श्रेष्ठं भवतीति भवदीयं सामर्थ्यं लघूकृतं बहुभिः ह्यः सभाया"मिति । एतच्छ्रुत्वा शिवो रौद्रेणाह– " तथा चेत् तेषां नामानि ब्रूहि; अहं मत्तृतीयनेत्रेण तान् भस्मसात्करोमि तावत्" इति ।

नारदः– तत्र भवतः असन्निधौ किल तदुक्तं तथोक्तं च । मेरुपर्वते भाविन्यां सभायां भवत्करे लसत्त्रिशूलं सफूत्कारफणोल्लासान् पन्नगांश्च पश्यता मेव सतां समेषां मुखतः "नमश्शिवाये"ति निस्सरेद्ध्वनिः साञ्जलिबन्धम् ।

शिवः– यदि न तथा कुर्युः, मन्यतां तेषां विनाशकालः सम्प्राप्त इति ।

इति ब्रुवति रुद्रे नारद "स्तत् सत्यं तत् सत्यं" इति वदन् मेरुगिरिं गतः ।

तत्र क्वचि दत्युन्नतस्थले रत्नखचितसिंहासनमेकं स्थापितम् । ततः किञ्चिदधोभागे त्रीणि उन्नतासनानि स्थापितानि । ततोऽप्यधोऽधः बहून्यासनानि सहस्रशः पङ्क्तिशश्च व्यवस्थापितानि सन्ति ।

निर्देशितायामेकादश्यां इन्द्रादयो दिक्पालकाः यक्षगन्धर्वकिन्नराद्या अन्ये देवगणाः महर्षयश्च आगत्य स्वेभ्यः कल्पितान्यासनानि अध्यतिष्ठन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्द दक्षिणायन सिंहमास (1974 September) परीक्षाणां कालसूची

परीक्षाः	7—9—74		8—9—74		9—9—74	
	प्रातः 10 A. M.	सायम् 2 P. M.	प्रातः 10 A. M.	सायम् 2 P. M.	प्रातः 10 A. M.	
परिचयः	—	—	परिचयः	—	—	
अभिज्ञः	—	—	प्रथमपत्रम्	द्वितीयपत्रम्	—	
विचक्षणः	—	प्रथमपत्रम्	द्वितीयपत्रम्	तृतीयपत्रम्	—	
समर्थः	प्रथमखण्डे प्रथमपत्रम्	प्रथमखण्डे द्वितीयपत्रम्	द्वितीयखण्डे प्रथमपत्रम्	द्वितीयखण्डे द्वितीयपत्रम्	—	
कोविदः	प्रथमखण्डः	द्वितीयखण्डः	तृतीयखण्डः	चतुर्थखण्डः	पञ्चमखण्डः	

संस्कृतभाषाप्रचारिणी सभा,
20—7—74

की. श्रीनिवासाचार्यः,
परीक्षामन्त्री.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 1845/60. Postal C. T. R. 11.
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.
Licensed to Post without Prepayment. LICENCE No. 57.

भारतसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ५-००

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

प्रहेलिका

पुष्पेषुमाता पुरुषायमाणा लज्जावती विश्वसृजं विलोक्य ।
नाभीसरोजे नयनं मुरारे र्वामेतरं वारयति स्म चित्रम् ॥

अर्थः– पुष्पेषोः मदनस्य माता लक्ष्मी, पुरुषायमाणा पुरुषवदाचरन्ती विपरीतरतं कुर्वतीत्यर्थः, विश्वसृजं भगवन्नाभिसरोजस्थं ब्रह्माणं विलोक्य लज्जावती सती मुरारेर्दक्षिणं नयनं वारयति स्म, यतो भगवन्नेत्रे हि सूर्यचन्द्रात्मके, तत्र दक्षिणस्य सूर्यात्मकत्वात्तद्वारणेन सरोज मुकुलितं भवेत् । ततश्च ब्रह्मापि सरोजकोशेऽन्तर्हितो भवेत्, इति मनसि कृत्वा तद्वारयामासेति भावः ।

Published by Sri N. Ramanatha Aiyer B. A; B. L., Advocate
& Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri K. V. Raghavan, (in-charge)
at Vijaya Press. Chittoor (A. P.) C. 1500.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Tel: SAMSKRUTAM दूरध्वनिः – "संस्कृतम्"

वाणीं भजत गैर्वाणीम् !

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

गैर्वाणी

मासिकी पत्रिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु. (आं. प्र.) भारतम्.

संपुटः १२ | 15 th OCTOBER 1974 | क्रमांकः १०



आनन्द-आश्वयुजाङ्कः

शकाब्दाः १८९६

मूल्यम् ०–५० पैसाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयसूची

१. दैवीवाक् १
२. अहो ! कालगतिः दुरूह्या (संपादकीयम्) २
३. प्रजासंस्कृतपरिषत्, गुंटूरु ५
४. विजयतां नितरां गैर्वाणी ६
५. श्रीशैलमल्लिकार्जुनाष्टकम् ११
६. पौण्ड्रक वासुदेवकथा १३
७. जीवन्तु शरदः शतम् १७
८. द्रव्योल्बणम् १८
९. विहाय नाना २०
१०. सुभाषितानि २१
११. ग्रन्थपरिचयः २३
१२. भक्तिविपणिः २४
१३. नारदविजयम् २९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तैर्वैदिकमार्गबोधनिपुणैः नीतिप्रदैर्भाषितैः;
लोकोदन्तविचारणाप्रपटुभिर्वाक्यैः मनोहारिभिः ।
गद्यैः पद्यचयैः सदा सुमनसामानन्दसन्धायिनी
"गैर्वाणी" भारतावनौ विजयते संस्तूयमाना जनैः ॥

(रचयिता– के. शि. जयचन्द्रशास्त्री)

दैवीवाक्

राजंत मध्वराणां गोपामृतस्य दीदिविं ।
वर्धमानं स्वे दमे ॥

पूर्वमन्त्रे त्वामुपैम इत्यग्निमुद्दिश्योक्तम् । कीदृशं त्वां? राजन्तं =दीप्यमानं अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां, गोपां = रक्षकं, ऋतस्य = सत्यस्य अवश्य भाविनः कर्मफलस्य, दीदिविं = पौनः पुन्येन भृशं वा द्योतकं । आहुत्याधारं अग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते । स्वे दमे = स्वकीयगृहे यज्ञशालायां हविर्भिः वर्धमानं ।

स नः पितेव सूनवेऽग्ने सूपायनो भव ।
स चस्वा नः स्वस्तये ॥

हे अग्ने! स त्वं नः = अस्मदर्थं, सूपायनः = शोभनप्राप्तियुक्तः भव । तथा नः = अस्माकं स्वस्तये = विनाशराहित्यार्थं, स चस्वा = समवेतो भव । उभयत्र दृष्टान्तः, यथा सूनवे = पुत्रार्थं पिता सुप्रापः, प्रायेण समवेतो भवति तद्वत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अहो ! कालगति र्दुरूह्या

कालप्रवाहे विविधा न्यङ्कृतानि दृश्यन्ते । यस्मिन्प्रदेशे अनावृष्टि रभव, तस्मिन्प्रदेशे अतिवृष्टि रासीत् । कुत्रचिद्देशे त्रिचतुर्वर्षेभ्य अनावृष्टिपीडाऽनुवर्तते । सर्वथाऽयं वत्सरः बाधाकर एव वर्तते । देशे सर्वत्र-विशेषतः दरिद्राः अधिकं कष्टमनुभवन्ति । आहारवस्तूनां मूल्यं प्रतिदिनं तारापथमतिक्रमते । क्रय्यशक्तिः पाताळमधोधः गच्छति । क्रय्यवस्तूनां मृग्यताऽपि सर्वत्र दरीदृश्यते । अस्य जगतः धनमूलत्वात्कियदपि मूल्यं दत्वा धनिकाः यथेष्टं क्रेतुं प्रभवन्त्येव । कृच्छेऽस्मिन् समये नायकाः किंकर्तव्यता मूढाः इव दृश्यन्ते ।

"सर्वस्स्वार्थं समीहते" इति न्याय मनुसृत्य सर्वेऽपि स्वलाभमेव समीहन्ते । कृषिकाः अधिकार्जनबुद्ध्या धान्यादिकं निगूहन्ते । व्यापारिणः स्वैः क्रीतं वस्तु, अधिकमूल्यविक्रयार्थं गोपाययन्ति । धनिका उत्तरत्र आहारवस्तूनि न लभ्येरन्निति धिया, भिया वा यथेष्टं क्रीत्वा स्वभक्तेषु स्थगयन्ति । अधिकारिणोऽपि यथास्वाधिकारं आहारवस्तुसंपादनप्रपटव एव भवन्ति । किन्तु मध्यमकक्ष्याजनाः, दरिद्राश्च किमपि कर्तु मशक्ताः केवल माकाश मेव पश्यन्तः क्लिश्नन्ति ।

आहारवस्तूनां मूल्याधिक्यकारणं किमिति विचारे कृते, एवं ज्ञायते – (१) शासनविरुद्धं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदेशिकवस्तूत्याहृत्य कैश्चिद्दुन्चके र्व्यापार:क्रियते । (२) देशीया: केचन प्रतारका:, प्रभुत्वेन मुद्रापितानां एक द्वि पञ्चदश विंशति - शतरूप्यकपत्राणां, प्रतिकृतिपत्राणि सृष्ट्वा देशे सर्वत्र विसृजन्ति । एतत्कारणप्रयुक्तं वस्तुमूल्याधिक्य मिति मेधाविनामाशय: । तत्त्वं कथनीयमिति चेत्, स्वातन्त्र्यसम्पादनानन्तरं प्रजासु नीति:, भीतिश्च लुप्तप्राये भवत: ।तस्य तु कारणं सर्वै र्ज्ञायत एव ।

किन्त्विदमतीव प्रमोदावहं जनसामान्यस्य; मन्महायज्ञ: कश्चन केन्द्रप्रभुत्वेनेदानीं प्रारब्ध इति । अयं महायज्ञ इत पूर्वमेव कार्यं आसीत् । भारते सर्वत्र येये वैदेशिकवस्तुव्यापारं निगूढतया शासनविरुद्धं यथातथा कुर्वन्ति, अक्रमधनमार्जयन्ति, तद्वारा प्रभुत्वस्य, जनसामान्यस्य च क्लेश मुत्पादयन्ति, तान् सर्वान् विचित्य निगृह्णाति केन्द्रप्रभुत्वम् । जागरूकतया अनुकृतिरूप्यकपत्रमुद्रापकाणा मन्वेषणं कृत्वा तन्निरोधमपि करोत्येव प्रभुत्वम् । किन्तु प्रजाप्रभुत्वेऽस्मिन प्रजाभि: कार्यमधिकतर वर्तते ।

"त्यागाय सम्भृतार्थानां" इति, "आपन्नार्तिप्रशमनफलास्सम्पदो ह्युत्तमानां" इति च महाकवि कालिदासस्य सूक्ती प्रजाभिस्स्मर्तव्ये । यया कयाऽपि विधया सम्पादितं सुमहद्धन मथ: पेटिकासु निभृतं निक्षिप्य, केनाऽपि प्रकारेण तद्व्ययितु मजानन्तो धनिका उदारबुद्ध्या, कुञ्चिकया पेटिका उदघाट्य, स्वय मकिञ्चनानां, ऋणरूपेण, यत्किञ्चित्कर्मकल्पयित्वा वा धनसाह्यं कुर्वन्तु, येन, ते तुष्टा: कृतज्ञाश्च भवेयु: । विवाहादिशुभकार्येषु अधिकतया बहुसंख्याकेभ्य: भोजनवितरणं, नैकविधानां भक्ष्याणां परिकल्पनं इत्यादि अस्यां देशदशायां सर्वात्मना सर्वै: परिहर्तव्य मेव । अपि च आहारपदार्थानां समृद्धिर्येषां भवति, तेऽपि एकादस्यादि पर्वदिवसेषु, स्वाभीष्टदेवताप्रीतिकरेषु (यदि स्यु:) दिनेषु च उपवासं कुर्यु:; येन शरीरारोग्यं, दरिद्रसाहाय्याचरणपुण्यं च लभेयु: । दरिद्रा स्तु अनि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्छन्तोऽपि प्रायशः उपवासव्रतमाचरन्ति खलु।

कर्षकाः व्यापारिणश्च स्वैर्गुप्तमाहारधान्यादिकं स्वेच्छया विपणिवीथिप्रापणं कुर्युः। नो चेत् प्रभुतया प्रजया च कर्षकाणां, वर्तकानाञ्च क्लेशस्समजायेत। भारतप्रधानमन्त्रिण्या श्रीमत्या इन्दिरया आकाशवाणीगोष्ठ्यां "शासनमतिक्रम्य ये वैदेशिकवस्तु निगूढव्यापारं कुर्वन्ति, तेषु विषये यादृशी चर्या इदानीं प्रभुत्वेन स्वीकृता, तादृशी चर्चैव, धनतृष्णया आहारधान्यगोपयितृविषयेऽपि स्वीक्रियते" इति कण्ठरवेणोक्तम् किल। तदक्षरशः यथार्थं भविष्यतीति मन्यते। किन्त्वस्मिन्विषये अधिकारिभिरपि नीतियुक्तै र्भाव्यम्। अन्यथा भारते कृषिप्रधाने आहारार्थं महान् कल्लोल एव सम्भवेत्। अवकाशं पुरस्कृत्य पुनः नक्सलैट् महाशयानां कार्यक्रमोऽपि विजृम्भेत। देशे पर्याप्तमाहारधान्यादिकं वर्तत एवेति नायकाना मभिप्रायः। किन्तु तद्वहि र्नानीयते। "परस्परं भावयन्तः श्रेयः परमवाप्स्यथ" इति भगवद्वचनानुसारेण, आहारधान्यादिकं विदेशेभ्यः झडिति, एतर्हि आनयनमत्यन्तं समुचितमेव।

प्राणधारणमुख्यावश्याकाहाराभावेऽस्मिन्कष्टसमये, सर्वे प्रतिपक्षा अप्येकीभूय, देशस्य, जनतायाः कष्टनिराकरणे प्रभुत्वपक्षस्य साहाय्यं नितरा माचरन्तु। स्वपक्षोत्कर्षसम्पादनायेदीनीं समये यत्नो माऽस्तु।

ऐदानीन्तनकाले असहायोद्यमाः निराहारदीक्षाः परिपालनाप्रतिष्ठम्भनं यानादिकानां निरोधः विपणिबन्धनं पत्रालयकार्यातङ्कः इत्यादि कार्यक्रमाचरणं मेधाविधिः, गान्धीमतावलम्बिभिः, देशभक्तैः यैः कैरपि न कार्यमिति प्रतिभाति। एतादृशक्रियाकरणेन देशस्य, प्रजायाश्च कष्टस्थितिरेव द्विगुणीकृता भवेत्। एतादशकार्यकर्तॄन् अमायिकाः अनुसरेयुरभिनन्देयेयुश्च। परन्तु सर्वे तादृशा न्नविश्वसन्ति। देशस्य, देशे भागस्य वा सौभाग्यकांक्षिणा मेवंविधकार्याचरणाय नाऽयं समय इति। शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजासंस्कृतपरिषत्, गुंटूरु. द्वितीयवार्षिकोत्सवः

परिषदाशयाः

श्री नेति अनन्तरामशास्त्री, एम्. ए.

अध्यक्षाः, महाशयाः, संस्कृतभाषाभिमानिनः, विद्वांसः, अभिवादयेऽहम् ।

इदं सुदिनम् । संस्कृतभाषाभिज्ञाः विद्वांसः अत्र समाविष्टाः अत्यन्त प्रमोदस्थानम् । अहं परिषदः आशयान् विवृणोमि ।

गैर्वाणी सर्वभारतीयभाषाणां आवश्यकीं प्राणशक्ति ददातीति विषये न कोऽपि संदेहः । तथापि सा भाषा वर्तमान व्यवहारे न श्रूयते । तं पुरस्कृत्य केचित् तां मृतभाषामित्यपि वदन्ति । तस्य हेतुः केचित् विद्वांसः पठनपाठनविषये अत्यन्त समर्था अपि भाषण विषये न उत्सहन्ते । अन्यच्च तद्भाषायां संभाषणं कर्तुमर्हस्यान्यजनस्य दुर्लभत्वात् । इत्थं सा भाषा विद्वत्स्वपि विमुखीत्यतीव विचित्रम् ।

एतद्विषमस्थितेर्निवारणाय संस्कृतभाषा व्यवहारसिद्धयेपि बद्धदीक्षः संघः एकः स्थापितः । यद्येषः सिद्धचेत् आदितः विदुषां परस्परसंभाषणं कर्तुमवकाशो लभ्येत । विद्वांसः स्वीयनित्यकार्यक्रमेषु तद्भाषायां व्यवहारः यद्याऽऽरभेरन् तदा संस्कृतभाषायाः दैन्यस्थितिः विलुप्ता भवेत् । अपिच साधारणमानवस्य चित्तवृत्तौ महत्परिवर्तनं भवेत् । यथा आंग्लभाषाव्यवहारः सदाचारो भवति, तथा संस्कृतभाषाव्यवहारः संघकल्पितवातावरणप्राबल्यात् जनसामान्यं अश्रमेण तद्भाषायां पारयन्ति । मुद्रितग्रन्थात् जनसामान्यं एव श्रेयो गुरु ।

प्रस्तुत जातिस्थितिगतेस्समाकलनात् प्रजाबाहुल्ये संस्कृत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषायाः प्रसिद्धेः समानयनम् नितान्तमावश्यकं भवतीति सिद्धयति। एतल्लक्ष्यं मनसि निधाय, संस्कृतभाषाभिज्ञैः संस्कृते एव संभाषणं, संस्कृते एव उत्तरप्रत्युत्तरलेखनं कर्तव्यमिति प्रतिज्ञां प्रत्येकं कुर्वद्भिस्सभ्यैस्संभूय प्रजासंस्कृतपरिषदिति स्थापयितव्या। सुप्तां महाशक्ति प्रबोद्धं तां निजजवसत्वौज्ज्वल्ययुक्तां कर्तुमयमेव मार्ग इति विश्वसिमः।

वाणीं भजत गैर्वाणीम्
जयतु जयतु देवभाषा।

विजयतां नितरां गैर्वाणी

स्फूर्तिश्रीः

श्रीमद्भ्यः, अध्यक्षपादेभ्यः, उपन्यासकमहोदयेभ्यः सर्वेभ्यः सभ्यमहाशयेभ्यश्च नमांसि।

अहं आन्ध्रक्रैस्तव कलाशालायाः आन्ध्रोपन्यासकेषु अन्यतमोस्मि। अस्मत्कलाशालायाः सम्मुखे वर्तते कान्वेण्ट् (Convent) पाठशाला। तस्यां पाठशालायां ये विद्यार्थिनः पठन्ति ते आंग्लभाषायामेव सम्भाषणं कुर्वन्तः साधारणतया दृश्यन्ते। प्राच्यभाषापाठशालासु ये विद्यार्थिनः पठन्ति ते संस्कृतभाषाभाषणं कुर्वन्तः मया कदापि न दृष्टवन्तः। एतस्य अन्तरस्य किं कारणम्? कोऽत्र दोषः? कस्य वा दोषः? आंग्लभाषाविद्यार्थिनः साधारणतया स्वीयभावप्रकटनं आंग्लभाषां आश्रित्य कर्तुं शक्नुवन्ति। तथैव हिन्दीभाषाविद्यार्थिनः हिन्दीभाषाभाषिणो भवन्ति। संस्कृतभाषाविषये अन्यथात्वं केन कारणेन संजातम्? अस्य प्रश्नस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहूनि समाधानानि बहुभिः प्रतिपादितानि । एतानि –

(१) संस्कृतभाषा बहुक्लिष्टा न च व्यवहार सुलभा । त्येकम् ।

(२) संस्कृतभाषा न कदापि व्यवहारे प्रयुक्ता । अद्यापि तां व्यवहर्तुं न शक्यते । इत्यन्यत् ।

(३) संस्कृतभाषा मृतभाषैव । दोहदवस्तुवत् (menure) उपयुज्य अन्यासां भाषाणां पुष्टिं ददाति । परंतु सा स्वतः मृतैव । इत्यपरम् ।

(४) संस्कृतभाषा देवभाषा । उन्नतोन्नतस्थाने प्रतिष्ठितां तां भाषां व्यवहाररज्जुभिः नीत्वा मलिनीकरणं न क्षम्यते । अद्यतने काले वैदेशिकशब्दाः बहवः प्रविशन्ति । तैः भाषायाः शुद्धिमत्ता लुप्यते ।

इत्थं स्वीयान् अभिप्रायान् आविष्कुर्वन्ति महानुभावाः केचन । एतानि समाधानानि क्रमशः परिशीलितुं यथासाध्यं प्रयते ।

(१) प्रत्येकं भाषायां शैलीविभेदाः सन्ति । तथैव संस्कृतस्य अपि साहित्यशैली शास्त्रशैलीतः भिद्यते । शास्त्रे अपि मूलग्रन्थः एकस्यां शैल्यां रच्यते । व्याख्या अन्यस्यां शैल्यां लिख्यते । तथैव व्याकरणग्रन्थेषु सन्तु अत्यधिकसंख्याकाः धातवः । भाषण व्यवहारे सर्वस्य धातुप्रपञ्चस्य न कदापि भवेत् प्रयोगः । परिमितसंख्याकैः धातुभिरेव व्यवहारः संपद्यते । साहित्यशैलीतः व्याख्यानेषु या शैली प्रयुक्ता सैव व्यवहारे उपयुज्यते । सा शैली सुलभैव । अस्मिन् विषये पण्डितमहोदयाः परमं प्रमाणम् ।

(२) संस्कृतं वेदकालात् आरभ्य अष्टादशशताब्दिपर्यन्तं आसेतुशीताचलं व्यवहारे प्रचलितं च नागरिकगोष्ठीषु सम्मानितं च बभूव । नो चेत् उत्तरभारते व्यवह्रियमाणानां भाषाणां जन्म एव न सिद्ध्येत् । मोगल्पालनसमये अपि पारशीकभाषया सह संस्कृतं राजभाषापदवीं अलंचकार । तदानीमेव जगन्नाथपण्डितराजः दिल्लीश्वरस्य शाहजहान सार्वभौमस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मान सम्पद्भिः अत्यन्तशोभां आप्नोत् ।

(३) संस्कृतभाषा मृतभाषा इति केचित् वदन्ति। इदं वचनं तेषां अविमृश्यकारित्वमेव स्पष्टीकरोति। अत्र स्मृत्यापन्नं एक विषयं वक्तुकामोऽहम् । एकदा आन्ध्रप्रदेशराज्यपालाः खण्डूबाइ देशाइ महोदयाः पर्यटनेषु गुण्टूरुपुरं आगच्छन् । तदा शारदानिकेतने प्रवृत्तायां सभायां ते महोदयाः इत्थं उक्तवन्तः आसन् । "केचित् संस्कृतभाषां मृतभाषा इति कथयन्ति। परन्तु न सा मृतभाषा, प्रत्युत अमृतभाषा । सा स्वयं जीवति। अन्यभाषाभेदानपि समुज्जीवयति" । तत् सत्यमेव । 'धर्मो-रक्षति रक्षितः' इति वयं जानीमः । तथैव संस्कृतं रक्षति रक्षितम् । भारतदेशे सर्वभाषाणां सर्वभाषाप्रदेशानां च समैक्यं संपादयितुं संस्कृतमेव समर्थम् । आन्ध्राणां मातृभाषा आन्ध्रम् । तमिळानां मातृभाषा तमिळम् । कर्णाटकानां मातृभाषा कन्नडम्। परन्तु सर्वेषां भारतीयानां मातृभाषा संस्कृतम् । तदेव सांस्कृतिकभाषास्थानम् अपि समलंकरोति । तस्याः भाषायाः विस्तृतव्याप्त्या सर्वाः भाषाः गौरवपदवीं च समुचितसौष्ठवं च प्राप्नुवन्ति । अधुना अपि संस्कृतभाषायां बहवो ग्रन्थाः विरचय्य प्रकाश्यन्ते । अनेकाः संस्कृतपत्रिकाः अपि प्रतिदिनं प्रमोदयन्ति अनेकान् संस्कृतभाषाप्रियंभावुकान् । अन्यद् वक्तव्यम् अस्ति । सन्तु लोके काश्चन भाषाः वृश्चिकसमाः याः प्रसवप्राप्तिमात्रेणैव परां गतिं प्राप्नुवन्ति । सन्तु लोके काश्चन भाषाः कदलीसमाः याः फलभारवहनपर्यन्तं एव जीवन्ति। संस्कृतभाषा न कदापि तादृशी। सा भाषा प्रासूत अनेकान् भाषाप्रभेदान् । तथापि अनन्यदुर्लभं जीवसारं वहन्ती स्वयं जीवति; अन्यान् भाषाप्रभेदान् अपि समुज्जीवयति ।

(४) केचन महाभागाः पश्यन्तः अपि न पश्यन्ति । सर्वासु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषासु, यदि ताः नागरकभाषाश्चेत्, व्यावहारिकीभाषा काचित् अन्यां सरणिं अनुसरति। तस्याः विषये परिपाटिरेव परिगण्यते। अन्योन्यावगाहनक्षमत्वमेव अपेक्ष्यते। ग्रान्थिकभाषायां यादृशी शुद्धिः दृश्यते तादृशी शुद्धिः व्यावहारिकभाषायां न कदापि दृश्यते। बेन्ची, कुर्ची, बैन्क, प्लैन इत्यादयः वैदेशिकशब्दाः आवश्यकतानुसारेण व्यावहारिकभाषायां प्रविशन्ति। तान् रोद्धुं न कश्चिदपि समर्थो भवेत्। तान् स्वीकृत्य भाषायाः पुष्टिं च सौलभ्यं च ये संपादयन्ति ते धीराश्च विवेकिनश्च। एकैकस्यां भाषायां एतादृशाः शब्दाः वर्तन्ते। संस्कृतं अपि अस्मिन् विषये न अपवादः। भाषायाः द्वौ प्रधानभागौ स्याताम्। प्रथमो भागः पदसामग्री। द्वितीयोभागः व्याकरणम्। एतयोः द्वयोः तोलने व्याकरणमेव विशिष्यते। ततः यावत् कालं व्याकरणं सुष्ठु अनुगम्यते। तावत्कालं भाषायाः अपकर्षः असंभवः एव। अलं अनेन विषयविस्तरेण।

भाषायाः त्रीणि अंगानि स्युः शास्त्रतः। तानि पठनं, रचनं, भाषणं च। तासु भाषणं अत्यन्तावश्यकम् अंगम्। विना रचनेन पठनेन च काश्चिद् भाषाः वर्तेरन्। ताः भाषाशास्त्रज्ञैः अनागरकभाषाः इति आम्नायन्ते। या भाषा भाषणात् अपसार्यते सा भाषापदेन न कदापि भूषिता भवति। व्यक्तायां वाचि भाष् धातोः प्रवृत्तिः इति वयं सर्वे जानीमः। अतः ये संस्कृतभाषाभिमानिनः ते सर्वेऽपि तां भाषां परस्पर व्यवहारे स्वीकुर्वतां। तथा तां प्रसारयन्ताम्।

वयं भाषाविषये केवलं शिशवः। यथा शिशवः प्रतिपदम् स्खलन्तोऽपि भूमौ लुठन्तोऽपि पदक्रमे उत्सहेरन् तथा वयं अस्मिन् पदक्रमे संस्कृतभाषाभाषणे उत्साहामहे। केवलोत्साहेन न कार्यम् सिद्धयति। इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वयं जानीमः । वयं जानीमः यत् अस्य कार्यस्य गौरवं च अस्माकं लाघवं च । यदि पण्डितमहोदयाः सहायाः भवेयुः सर्वं सिद्ध्यति । न तत्र सन्देहः ।

अद्यपि सुरगवी पयोदानक्षमा । अद्यापि पण्डिता दोग्धुम् सर्वथा समर्थाः । आस्वादनपरायणाः अपि बहवः सन्ति । तथापि पयः यत्पात्रे गृह्यते तत्पात्रस्य शुद्धिः अपेक्षिता भवेत् । 'संस्कृताभ्यासः नाल्प विषयः; प्रत्युत गौरवाश्रयः'– इत्थं यो भावयति स एव पात्रत्वं विन्दति । तत्तादृशाः नगरे नूनं विरलाः एव भवन्ति । अद्यावधि वयं पट्टाभिपुर्यां दश संख्याकाः प्रति भानुवासरं एकत्र समाविशन्तः गोष्ठीं कुर्मः । तथैव नगरे विविधविभागेषु तत्रत्याः समाविस्य यथोक्तं कार्यक्रमं अनुसरेयुः, तर्हि संख्याबलं अपि लभ्येत । सर्वे विविधविभागसभ्याः प्रतिमासं एकस्मिन् विभागे समाविश्य गोष्ठी कार्यक्रमं निर्वर्तितुं समर्थाः प्रभवेयुः । एतासु गोष्ठीषु यथारुचि चर्चाः, प्रसगा, कुहना शासनसभाः, नाटिकाः, विनोदकार्यक्रमाः, कवि जयन्त्यादयः संस्कृतभाषां समाश्रित्य क्रियेरन् । जातीय पर्वाण्यपि, वार्ता निवेदनमपि कार्यक्रमे स्थानम् विन्देयुः ।

एतैः वचनैः अयं प्रसंगः समाप्यते । विजयतां नितरां गैर्वाणी ।

(प्रजा संस्कृतपरिषदः द्वितीयवार्षिक प्रारंभोत्सवे प्रदत्तः प्रसंगः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशैलमल्लिकार्जुनाष्टकम्

श्री क. आर्. सुब्रह्मण्य, एम. ए. हैदराबाद

यो नित्यं प्रिय-भक्तिपूर्णहृदयैः पातालगङ्गाम्भसा
साक्षात्स्नापित आदराद् दृढतरं चालिङ्गितस्तैः शिवः ।
ज्योतिर्लिङ्गवपु स्वयं करुणयाऽऽविर्भूय जागर्ति तं
सेवे श्रीगिरि-मल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम् ॥

यं भक्त्या समुपासते बसवराडादेशमार्गानुगाः
शैवा लिंगधृतः क्रमात्समुचितैरात्मीयपूजाक्रमैः ।
यं चैवादिमनन्तकाटिभुवनस्यापि श्रुतिर्भाषते
सेवे श्रीगिरि-मल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम् ॥

येनानन्दनटेन भृङ्गिमुनिराट् सन्तोषितो नर्तनैः
सायं पङ्कजनाभवादितमृदङ्गेनानं दिना शंभुना ।
आनन्दाश्रुमुचा सुरासुरगणेनाराधितं तं भवं
सेवे श्रीगिरि-मल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम् ॥

यस्मै श्रीगुरुतल्लजः शिवगुरुप्राक्पुण्यपुञ्जो महान्
शर्वानन्दसुधासुशीतलहरीपूरे निमज्ज्य स्तवम् ।
कृत्वा प्रीतिमुपाजहार परमां क्षेमाय लोकस्य तं
सेवे श्रीगिरि-मल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम् ॥

यस्माद्बिभ्यति वायुसूर्यहुतभुग्वृत्रारिकालादयः
कुर्वन्त्येव च नैजकर्म नियता देवाः सदा भीतितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्मान्नास्ति भयं सुधीरमनसां शुद्धात्मनां तं हरं
सेवे श्रीगिरि-मल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम् ॥

यस्य स्थानमगः शिलादमुनिजो भक्ताग्रणीः "पर्वतो"
नन्दी चैव वृषो यदीयवहनं प्रीतया करोति स्वयम् ।
यत्स्थानाग्रनिरीक्षणेन मनुजा मुक्ता भवन्त्येव तं
सेवे श्रीगिरि-मल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम् ॥

यस्मिन् भक्तिमतो रघूद्वहपृथापुत्रादयः सादरं
राज्ञी चन्द्रवती तथाऽऽदिजननी पूजामतन्वन् पुरा ।
पुष्पैः शोभनगन्धिभिर्भवहरं तं मल्लिकाद्यैः परं
सेवे श्रीगिरि-मल्लिकार्जुनमहालिङ्गं शिवालिङ्गितम् ॥

सद्योजात भवोद्भवार्तिशमन श्रीवामदेव प्रभो
रुद्राघोर मृडाज शर्व भगवन् कालाख्य तत्पूरुष ।
ईशानेश्वर शक्तिपीठविलसच्छ्रीभ्रामरीसंयुतं
सेवे श्रीगिरि-मल्लिकार्जुनमहालिङ्गं भवन्तं सदा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४९

पौण्ड्रक वासुदेव कथा

बोधकरत्नम् , रामायणज्योतिः, उपन्यासचक्रवर्ती,
मु. वि. श्रीनिवासराघवाचार्यः, अवलूर्.

पुरा द्वापरयुगे भगवान् विष्णुः दुष्टनिग्रह - शिष्टपरिपालनार्थं यदुवंशे देवकी - वसुदेव दंपत्योः पुत्रत्वं प्राप्य कंसभयात् गोकुले नन्दगोप - यशोदा - दंपतिभ्यां पुत्रत्वं च प्रदर्श्य ताभ्यां सम्यक् पोषितः शैशवं बाल्यं च अप्रापयत् । सर्वैः सर्वत्र कृष्ण इति आहूत आसीत् । शापकारणेन स्वयं गोकुलं गन्तुं अशक्तः कंसः मथुरापुर्यामेव स्थित्वा स्वशत्रुं कृष्णं बहुभिः उपायैः मारयितुं अशक्यः अक्रूरमुखात् श्रीकृष्णं मथुरां आनाय्य तेन सह आयुद्ध्य भगवता मारितः स्वर्गं अवाप । ततः कृष्णः तद्राज्यं उग्रसेनाय दत्वा स्वयं नगरमेकं निर्माय तस्य "द्वारका" इति नाम च कृत्वा रुक्मिणीं सत्यभामां च परिणीय ताभ्यां, वसुदेव - देवकी - बलराम - रेवती प्रभृतिभिः बन्धुवर्गैः भक्तगणैश्च संवृतः परमानन्दभरितः द्वारकायां निवसति स्म । अथ कदाचित् स्वसभायां कृष्णे विराजमाने सति, श्रीकृष्णस्येव वेषं धरमाणः आत्मानं कृष्णं प्रकटयन् अहमेव भक्तपराधीनः इति सर्वत्र घोषयित्वा काशीराजः पौण्ड्रकः स्वराज्यं पालयति स्म । श्रीकृष्णस्य दुष्टनिग्रहसाधुपरित्राणादीनां कीर्तिपरंपरा भूलोके सर्वत्र प्रसारिता अवर्तत । पौण्ड्रकं कृष्णवेषधारिणमपि कृष्णमिति मन्तुं बहवो जनाः नेच्छन् । केचन कथं कथमपि तं कृष्णमिति अमन्यन्त । कृष्णस्य सपूर्णांकीर्तिं स्वयं आहर्तुं उद्युक्तः काशीराजः इत्थं स्वम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नसि अचिन्तयत् – येन केन प्रकारेण कृष्णेन सह संग्रामं कृत्वा तं यदि संहरेयं तर्हि मामेव सर्वे कृष्णं मत्वा अभिवादयेयुः । इति । इत्थं विचिन्त्य स्वदूतं श्रीकृष्णाय द्वारकां प्रति प्राहिणोत् । काशीराजदूतश्च द्वारकामेत्य सभासदैः परिवृतं श्रीकृष्णं इत्थमाह – "राजन्, अस्मद्राजा सर्वभूतदयापरः, पीतांबरधारी, वेणुहस्तः, कस्तूरीतिलकः, बर्हिपिंछाचूडांकः श्रीवत्सवक्षाः, मेघश्यामः, अतिमनोहररूपलावण्यः कृष्णः भवन्तं इत्थं मन्मुखेन आदिशत्– "किमर्थं त्वया ममैव वेषधारणं क्रियते ? लोकेस्मिन् कृष्णेनैकेन अलं । कृष्णद्वयस्य आवश्यकं न विद्यते । अहमेव ऋजुः कृष्णः । अयतार्थ कृष्णः त्वं झटिति पीतांबरशंखकौस्तुभमणिधारणादिवेषं परित्यज । अहं तु सर्वस्य प्रभुः । तव वेषभूषादिः मम नितरां उपहासहेतुः भवसि । मदनुकारी न भविष्यसि यदि तर्हि रणरंगे मां

प्रत्युत्तरं देहि इति दूतः श्रीकृष्णं अवोचत् ।

भगवान् श्रीकृष्णस्तु सदस्यान् वीक्ष्य सस्मितवदनः दूतं इत्थमाह– "रे सन्देशवाहक, तव स्वामी त्वया इदं ज्ञाप्यताम्, भूलोकेस्मिन् कृष्णद्वयस्य आवश्यकं न विद्यते एव । अयं तु सुतरां मोदावहो विषयः । कृष्णेनैकेनालं । मम वेषस्तु त्याज्य एव । किन्तु तवेच्छया न भविष्यति । आवश्यकसमये ममेच्छानुगुणं मया इदं रूपं परिहार्यं, रूपान्तरमपि प्राप्तुं शक्यम् । यथाशीघ्रं संग्रामातिथ्यपूजाद्वारा कृष्णद्वयोरन्यतरस्य वेष. त्याज्यः भविष्यति । अस्मिन् शोभतः महोत्सवावसरे तव शरीरमांसरक्तपातेन गृध्र-काकप्रभृतिभ्यः पक्षिभ्यः बलिर्दातव्यः । इति वद" इति । दूतश्च शीघ्रं का... आगत्य स्वस्वामिनं राजा... कृष्णस्य सर्वं वचनं अकथयत् । राजा काशीपतिश्च युद्ध... स्वसेनासहितः रणभूमिं ... । अथ भगवान् श्री...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वारकायाः काशीं आगत्य रण-
करणाय शंखध्वनिं अकरोत् ।
तन्निशम्य कृष्णवेषधारी काशी-
पतिः पौंड्रकः युद्धं कर्तुं स्वसेनां
आदिशत् । अथ भगवान् कृष्णः
सेनासमूहं हत्वा पौण्ड्रकमेवमाह—
मद्वेषधारिन् इदानीं कृष्णयोर-
न्यतरस्य वेषत्यागकाल
आगतः । तस्मात् मां सम्यक्
पश्य । कापि न्यूनता अस्ति चेत्
तां सुधार्य वेषं त्यज । इत्युक्त्वा
तस्य शिरः खण्डयित्वा तस्य
प्रासादराजद्वारे न्यक्षिपत् ।
श्रीकृष्णस्तु अथ सकुशलः पुनः
द्वारकां आगच्छत् ।

इत्थं महच्छोकविषयास्पदं
रादद्वारे पतितं स्वपितृशिरः
दृष्ट्वा सुतरां खिन्नः तद्दुःखं
असहमानः पौण्ड्रकसुतः काशी-
राजपुत्रः सुदक्षिण नामा स्वपितुः
और्ध्वदैहिककर्मक्रियाकलापान्
परिसमाप्य स्वपितृहन्तारं द्वार-
कापतिं श्रीकृष्णं हन्तुमैच्छत् ।

श्रीकृष्णहननबलप्राप्तये भवा-
नीवल्लभं विश्वनाथं कामाक्षी-
पतिं तीव्रेण तपसा आराधया-
मास । तेन तुष्टो भगवान् रुद्रः
ईशः सुदक्षिणं आह— तव तपसा
तुष्टोस्मि, वरं वृणीष्व इति ।
सुदक्षिणश्च वरं अवृणोत् । प्रभो,
मम पितृहन्तुः वधोपाय एव मम
वरः उच्यतां तावत् उपायः इति
पार्वतीपतिराह — रे भक्त
दाक्षिणाग्निं श्रोत्रियवर्यैः द्विजो-
त्तमैः ऋत्विग्भिः सहितः कल्पो-
क्त - विधिना आराधय । सः
अग्निदेवः तवाभीष्टं साधयि-
ष्यति इति । सुदक्षिणश्च याग-
शालां परिकल्प्य कल्पोक्तप्रकारं
यथाविधि दाक्षिणाग्निं अपूज-
यत । पूर्णाहुतिसमये अग्नि-
कुण्डात् त्रिशिखं ज्वलन् सर्वत्र-
ज्वालाः अंगारांश्च निगरन्
अतिभयंकरः अग्निरूप पैशाच
एकः अग्निः अस्यानेकभूतगणैः
परिवृतः बहिरागत्य सुदक्षिण-
मेवमाह — रे भक्ताग्रगण्य, मा
भैषीः ? तव पितृशत्रुः अब्रह्मण्य
यदि तर्हि अनुपदमेव हत इत्य
भिधारय । शीघ्रं वद अब्राह्मण
वा ? इति । सुदक्षिणः श्रीकृ
यादवकुलयोनिसंभवं मन्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपितदेव, अब्राह्मण एव इति । किन्तु श्रीकृष्णस्तु अयोनिजत्वात् उपनयनादिसंस्कारसंपन्नः ब्राह्मण एव । ज्वालामुखपैशाचस्तु सुदक्षिणस्य वचनानुगुणं अतिशीघ्रं द्वारकां अभ्यागच्छत् । उष्णं तापं च असहमानाः कृष्णभक्ताः इमं वृत्तान्तं कृष्णाय अकथयन् । भक्तपराधीनः श्रीकृष्णः कोटिसूर्यसमप्रभं स्वचक्रायुधं हेतिराजं सुदर्शनं इत्थम् आदिशत् –

"प्रतिभटश्रेणिभीषण, वरगुणस्तोमभूषण, निखिलदुष्कर्मकर्शन, निगमसद्धर्मदर्शन, षडरचक्रप्रतिष्ठित, सकलतत्वप्रतिष्ठित, जय जय श्रीसुदर्शन, जय जय श्रीसुदर्शन" इति । अतित्वरः सुदर्शनः चक्रायुधः सर्वत्र तापं निगरन् द्वारकां आगच्छन्तं भूतगणैः परिवृतं तादृशं पैशाचाग्नि काशीपर्यन्तं अनुधाव्य तं शमयित्वा सपरिवारयुतं सुदक्षिणं सर्वां काशीनगरीं च दग्ध्वा तत्र शशान्तः यथावत् कृष्णपार्श्वं आगत्य अतिष्ठत् । एकः पापानि कुरुते, फलं भुंक्ते महाजनाः" इति वचनानुगुणं काशीनगरमहाजनाः हताः । द्वारकायां सर्वे कृष्णभक्ताः सुरक्षिताः कुशलिनः बभूवुः । भारतवासिनः सर्वेपि मकरकुण्डलग्रैवेयकहारभूषणभूषितं श्रीकृष्णं स्तुवन्तः सुखिनः आसन् ।

उक्तं च –

"य एतत् श्रावयेन्मर्त्यः
उत्तमश्लोकविक्रमं ।
समाहितो वा शृणुयात्
सर्वपापैः प्रमुच्यते ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

जीवन्तु शरदः शतम्

श्री या. वि. देवासकरः, बटोदरस्थः.

राधाकृष्णा विमलमनसो राष्ट्रनौकर्णधाराः ।
तेषां ग्रंथा गणहितकरास्तत्त्वभाषा सुरम्या ॥
प्राप्तं तैस्तद्गुरुतमपदं, स्वात्मतेजःप्रभावात् ।
स्थानप्राप्तिर्भवति महती तेजसा नान्यथा वै ॥

कर्मकौशलविख्याता राधाकृष्णाः प्रपण्डिताः ।
स्वसंस्कृतेश्च तत्त्वज्ञा, जीवन्तु शरदां शतम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रव्योल्बणम्

श्री नंडूरि सत्यनारायणमूर्ति, यम्. काम्. काकिनाड.

द्रव्योल्बणं नाम धनस्य विनिमयस्य अथवा परिणामशक्तेः क्षीणत्वम् । एतद्धि वस्तूनां मूल्याधिकतेति, अस्याभिः साधारणतः उच्यते । एतदेवार्थशास्त्रे "इनफ्लेषन्" (Inflation) इति कथ्यते । एकः प्रख्यातार्थिकशास्त्रवेत्ता एनां परिस्थि दशवत्सरेभ्यः पूर्वमेवेत्थं चमच्चकार "इदानीं" वयं कंचुकिस्थ धनस्थानेन (Pocket) धनं नीत्वा, विपणिं गत्वा वस्तूनि गोण्यऽऽनयामः । किन्त्वायतो गोण्या धनं नीत्वा वस्तूनि कंचुकिस्थ धनस्थानेन आनेष्याम; इति वर्तमानपरिस्थितेः अनुभवेन एषः विषयः सत्यान्न दूरापास्त इति ज्ञायते ।

एतद् द्रव्योल्बणं प्रायेण प्रकारद्वयेन संभवति । वस्तूनामुत्पादनस्य क्षीणत्वेन, अस्माभि उपयुज्यमानस्य धनस्य परिमितेः आधिक्येन च । एतद् द्रव्योल्बणं देशस्य बहुहानिकरम् । तत एवास्माकं देशे साधारणमनुष्यस्यापि अस्मिन् विषये व्याकुलता संजाता ।

इदानी मस्माकं द्रव्योल्बणं प्रथमस्थित्या न संजातम् । कुत इति चेत गणांकविभागस्य गणनानुसारं प्रतिसंवत्सरं वस्तूनामुत्पत्तिः अधिकैव भवति किन्तु न क्षीणा भवति । एतद् सूचनांकद्वारेणैव वयं जानीमः ।

अनेन व्यक्तं भवति, इदानीं द्रव्योल्बणं द्वितीयमार्गेणैव संभवतीति । किं नाम प्रस्तुतः विनियुज्यमानस्य द्रव्यस्य परिमितिः अधिकाभवत् । एतन्निवारणाय पालकवर्गः अनेकान् कार्यक्रमान् करोति । यथा; येषां पञ्चदशसहस्ररूप्यकाणा मुपरि, आदायः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति ते सर्वेऽवश्यं द्रव्यनिधिषु तद्धनं निक्षेपणं, आदायपरिमितयः, द्रव्यनिधिकुसीदमूल्यस्य वर्धन मित्यादयः केचित् । एते कार्यक्रमा पालकदृष्टौ स्थितस्य धनस्य स्वायत्तीकरणाय, तस्य सदुपयोगार्थं च भवतु नाम ।

किन्तु प्रस्तुतपरिस्थितिं निन्यतुं न शक्नुवन्ति । कुत इति चेदिदानी मस्माक देशे व्यक्तधनादधिकं गुप्तधनं नित्योपयोगे आपतति । केषांचिद् प्रमुखशास्त्रज्ञाना मभिप्रायानुसारं यद्धनं पालकवर्गस्य दृष्टावस्ति तस्मात् द्विगुणं गुप्तधन मस्ति इति । चतुर्गुणं गुप्तधन मिदानीं विनियोगे अस्तीत्येतदपि नाश्चर्यजनकम् । कदाचित् नूतनरूप्यकपत्रं पश्यती साधारणव्यक्तिश्चैवं अभिप्रैति । "एतन्नगुप्तधनं किं वा" इति । एतेषां पत्राणां विनियोगः ततोजातः ।

ततः द्रव्यपत्राणां शोषणेन विना एषास्थितिः न समीचीना भवति । एषा सूचना पालकवर्गस्य दृष्टि मिदानीमेव न प्रापयेदिति न । विख्यातार्थिकशास्त्रवेत्तारः इदानींतनकाले मुंबई नगरे एकत्रिता अभवन् । ते कानिचित् सूत्राणि आर्थिकव्यवस्थाया उपरि पालकवर्गायददुः । तेषु एतद्विषयः सूचनामात्रेण तैः सूचितः एव । केचिदिदानी मपि सूचयन्ति ।

द्रव्यपत्राणां शोषणं प्रभुत्वस्य तत्क्षणकर्तव्यम् । तथापि ते तथा कर्तुं किमर्थं नांगीकुर्वन्ति; इति वयं न जानीमहे । तेषां मनसि किं वा अस्ति ? किन्तु एषा परिस्थितिः आगामिपञ्चवत्सरपर्यन्तं यदि भविष्यति प्राजास्वधिकं भूत्वा सामूहिकांदोलनाय मार्गं विचिनोति । यदेवं भवतु, स्वराज्यानन्तरमस्माकं देशे, देशस्यातीवमुख्यव्यवस्था, आर्थिकव्यवस्था न सुसिक्षित । इत्येतद् गर्हणीय मेव । तस्मादेतद् विषमस्थितेः निवारणाय समुचितचर्याणां प्रकल्पनं सर्वथा श्रेयस्करं समीचीनं च ।

"न युक्तं कूपखननं संदीप्ते वह्निना गृहे ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहाय नाना

डा. वेमूरि आंजनेयशर्मा, तिरुपति

विहाय नानाविषयावलंबान् भावोर्मिजालानसुखानशेषान् ।
सर्वान्तरात्मन्! भवदीयचिंता सुधांबुधौ मज्जतु मानसं मे ।।

विद्या ममास्तीति कदाचि दीश! मान्योऽहमन्यै रिति मन्यमानः ।
भवाम्यहंभावपराजितात्मा व्यपैमि मूढो भवतश्च दूरम् ।।

यदा मन श्चिंतयते भवंतं न मे समोऽस्तीति तदाऽवलिप्तः ।
यदा तु चित्तं विषयाभिलोलं तदा विषण्ण स्तदलाभतोऽहम् ।।

इत्थं मन श्चंचल मानियंतुं मार्गं न जाने करुणैकसिंधो ।
यथैव तत्कर्षति मां तथाऽहं भ्रमा म्यनिच्छ न्नपि दुर्बलात्मा ।।

भावयतु कमपि भावं यस्मिन् कस्मि श्च लगतु चित्तं मे ।
सर्वं त्वमिति मतिर्या मयि तां स्थिरीकुरुष्व विभो ।।

विरमति परदोषान्वेषणाया न चित्तं
न च मम निजदोषज्ञानलेशोऽपि तावत् ।
कथमिव भवदीय ध्यानदूरः सुखी स्याम्
भवदमल कृपायाः पात्र मेवं विधेहि ।।

वदंति वेदांतविदो भवंतं वाचामगम्यं मनसश्च दूरम् ।
तत्त्वां कथं तोषयितुं प्रभुः स्यां लिप्से तवानुग्रहमेकमेव ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

श्री यन्. रामनाथार्यः.

[पूर्वानुबन्धः]

अद्रोह स्सर्वभूतेषु कर्मणा मनसा गिरा ।

अनुग्रह श्च दानं च शील मेत द्विदु र्बुधाः ॥ ॥ ५४९ ॥

Non - injuring other beings by the mind, words or actions, kindness and helping them in need, these qualities are known as "Seela" ie good behaviour.

वृत्तं यत्नेन संरक्षेत् वित्त मायाति याति च ।

अक्षीणो वित्ततः क्षीणः वृत्तत स्तु हतो हतः ॥ ५५० ॥

Wealth comes and goes; one should carefully cherish his own character. One who loses wealth has not lost much but one who loses his character is lost irretrievably.

विदेशेषु धनं विद्या, व्यसनेषु धनं मतिः ।

परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ ॥ ५५१ ॥

Learning is a great asset in foreign countries a study mind is a great asset in distress, righteous conduct is an asset in the other world, and moral rectitude is an asset everywhere.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आपत्सु किं विषादेन ? संपत्तौ विस्मयेन किम् ?
भवितव्यं भवत्येव कर्मणा मेष निश्चयः ॥ ॥ ५५२ ॥

What is the use of being distressed when in difficulties and elated in prosperity. What is destined to happen will certainly happen. The course of one's Karma is irrevocable.

य त्कर्म बीजमुप्तं येन पुरा निश्चितं स तद् भुङ्क्ते ।
पूर्वकृतस्य हि शक्यो विधिनाऽपि न कर्तुमन्यथा भावः ॥ ५५३ ॥

One reaps the seed the fruits of the seed of action sown by him previously; the results of one's actions connot be altered even by God Brahma.

गुणा यत्र न तत्राऽर्थाः यत्राऽर्था स्तत्रनो गुणाः ।
अहो परमसामर्थ्यं संविभागविधौ विधेः ॥ ॥ ५५४ ॥

Wonderful is the cleverness of Fate in dividing objects; where there is an abundance of good qualities, there is no wealth; where there is wealth, there are no good qualities.

परीक्ष्य सत्कुलं विद्यां वयःश्शौर्यं सुशीलताम् ।
विधिर्ददाति निपुणः कन्यामिव दरिद्रताम् ॥ ॥ ५५५ ॥

As one bestows his daughter on a deserving person, the clever Fate endows a person with poverty, after examining carefully one's illustrious descent, erudition, age strength and noble qualities.

(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थपरिचयः

१. श्रीअर्धनारीश्वराष्टोत्तरशतनामस्तोत्रम्

अम्बत्तूर् - वेङ्कटपुरस्य स्कन्दगानविद्यालयाध्यक्षेण, पैङ्गा-नाड् - राजगोपालार्येण (कालिकानन्देन) सङ्ग्रथितम् । मूल्यं सार्धो रूप्यकः । पुस्तकेऽस्मिन् श्रीअर्धनारीश्वरस्य, तदनन्तरपत्रे श्रीकाञ्चीकामकोटिपीठाधिपयोः आचार्यस्वामिनोश्च प्रतिकृती वर्तेते । ग्रन्थोऽयं तदुपासकानां पारायणाय, पूजायै चाऽत्यन्तमुपकरोति, येनेहपरसुखं लभ्यते ।

२. रत्नयुगळी

ग्रन्थेऽस्मिन् (१) नारदभक्तिसूत्राणि भक्तिविवेचनाख्य लघुविवरणेन साकं, (२) श्रीगुणरत्नकोशः (संस्कृतमूलं श्रीपराशरभट्टार्यः) रत्नालरवल्याख्येन आन्ध्रगद्यानुवादेन च वर्तते । रचयिता श्री के. टि. यल. नरसिंहाचार्यः । रचयिताऽयं ग्रन्थमिमं पित्रोरङ्कितं कृत्वा कृतकृत्योभूत् । "मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी" इति वचनानुसारेणाऽयं ग्रन्थः पठितॄणां भक्तिप्रबोधे नितान्तमुपकरोतीति वचने न काप्यतिशयोक्तिः । आन्ध्रलिप्यां वर्तमानेऽस्मिन् ग्रन्थेऽपि मुद्रास्खालित्यानि तत्र तत्र विरलतया दृश्यन्ते ग्रन्थोऽथममूल्यः वर्तते ।

प्राप्तिस्थानम्— गोदाग्रन्थमाला, मुसुनूरु,
कृष्णामण्डलम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. संस्कृतदाशरथिशतकम्

कर्ता – भीमराजुसत्यनारायणः, M. A. B E. D. B. P.

कंचर्ल गोपनार्यकृतस्य आन्ध्रस्य दाशरधिशतकस्य संस्कृतीकरणम् । इदं काव्यमान्ध्रप्रदेशसाहित्य अकाडमी वितरितेन द्रव्यसाहाय्येन मुद्रितम् । की. शे. श्री एन्. चन्द्रशेखरार्येण (Judge of Supreem Court, India) विरचितेन प्रस्तावनेन विराजते । यद्ययं ग्रन्थः संस्कृतलिप्यां मुद्रापितं अभविष्यत्, तर्हि इतोधिकप्रचारोऽस्य भवेत् ।

प्राप्तिस्थानम् – ग्रन्थकर्ता - प्रांशुपालः,
संस्कृतटचुटोरियल् कलाशाला,
१०-६-३२–ए, राजवीथी, कावलि,
नेल्लूरु मण्डलम् ।

भक्तिविपणिः

श्री जे. शेषाद्रि अय्यंगार्, तिरुपति.

ऐकान्त्यात्यन्तिकं दास्यं क्रेयं हरिपदाब्जयोः ।
सद्भक्तैः पण्यवीथीषु स्वदते कविकल्पनैः ॥

इदानीं अर्थपरैः पामरैः मुग्धैः पण्यवीथिषु वणिजः आश्रीयन्ते, बहुलद्रव्यदानेन अत्यल्पासमीचीन वस्तुग्रहणाय । ते च वणिजः अधर्मिकाः पामरान् प्रतार्य धनमधिकं चाकचक्येन सम्पादयन्ति । अपितु पुरातनकाले वाणिज्यं वर्णधर्मः स्वर्गापवर्ग साधनं वेदविहितं कर्तव्यं आसीत् । एवं ज्ञानार्जनेऽपि विपणिव्यवहारः पूर्वकाले

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समकल्पि । यथाद्रव्यं दत्वा द्रव्यान्तरं क्रीतं तथा विद्यां दत्वा विद्यान्तरं सम्पादितम् । तथाहि – "आचार्यात्पादमदत्ते पादंधत्ते स्वमेधया । पादं सब्रह्मचारिभ्यः पादं कालक्रमेणच" इति सब्रह्मचारिभ्यः चिन्तनारूपेण अधीतांशस्य पुनश्चर्वणं ततोऽधिकांशश्च ग्रहणं चेति उपायविशेषस्य प्रदर्शनं कृतम् । अस्मद्गृहीतार्थस्य परेभ्योबोधनं, अस्मदविदितांशस्य परेभ्योग्रहणं चेति, छात्रेषु पारस्परिकः विद्याविनिमयः पूर्वकाले आसीत् । किञ्च "गुरुशुश्रूषया विद्या विपुलेन धनेन वा, अथवा विद्यया विद्या चतुर्थं नोपपद्यते" इति विद्यां गुरुदक्षिणात्वेन प्रतिपदानरूपेण वा प्रदाय विद्याग्रहणमुपादेशि । लोके यथा जनाः तिलैः तण्डुलं, गोभिः क्षेत्रादिकं च पुरा अक्रीणन्त, एवं अयं पण्यव्यवहारतुल्यः विद्याविनिमयः आसीत् । दृश्यते हि श्रुतौ आरुण्यादि गुणया गवा सोमक्रयणादिकम् । अतश्च द्रव्याणां इव विद्यायाः अपि क्रयविक्रयत्यवहारोऽपि संपन्नः आसीत् ।

एवमेव भक्तिरूपेण धनेन भगवता भागवतैश्च परस्परं क्रयविक्रयार्हदशया विपणिव्यवहारतुल्यः कैङ्कर्यसेवादिव्यापारः अन्वभावि । भक्तिर्हि महनीयविषयिणी निरतिशयप्रीति । वात्सल्यं च स्वकीयचेतनविषये स्नेहातिशयः । भक्तेषु भगवतो वात्सल्यं, तथा भक्तानां भगवति भक्तिः च जायते । भगवानपि निरकुशेश्वरतया स्वदासानामपि दासो भवति । यदाह "दास्यमैश्वर्ययोगेन ज्ञातीनां च करोम्यहं, अर्धं भोक्ता च भोगानां वाग्दुरुक्तानि च क्षमे" इति । अत एव गोपीनां गोपालानां च वशं वदः तदुक्तकारी बभूव । पाण्डवानां दौत्यं आचरत् । एवं भागवताः गुणपरवशाः भगवति सर्वस्वं अर्पयंति । किञ्च भक्ताः तदीयानां दासानामपि स्वान् अधीनान्कर्तुं इच्छन्ति । तथाहि कल्पसूत्रव्याख्यातारः श्रीगोदायाः जनकाः विष्णुचित्तसूरयः "केशवा पुरुषोत्तमा वेन्नुं पेशुवार् अडियार् एन्दम्मै विर्कवुं पेरुवार्कळे" इति द्राविडगाथायां अगायत् । ते गोष्ठीपूरे सौम्यनारायणमूर्तिमुपासितुं अगमन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेम्नः परमामोदवत् तत्र भागवताः अन्नवस्त्रादिभिः तदीयाराधनतत्पराः सदा केशव! पुरुषोत्तम, विवृद्धज्योतिः! वामनावतारसुलभ! इति हरि नामान्यावर्तयन्तः दर्शनपथं अध्यतिष्ठत्। तद्गुणपरवशाः विष्णुचित्ताः "ते मां विपणिषु विक्रेतुं अपि पारयन्तीति" तावद्दास्यं अभिलषंति स्म।

हरिभक्तानां अयं स्वभावः— "भगवता प्राजापत्यान्ते ऐश्वर्ये स्वर्गे कामभोगे दत्ते सत्यपि तत्परित्यज्य भगवद्भागवतदास्यं महदैश्वर्यं मत्वा तदेव अभिलषन्ति। पत्युः प्रजानामैश्वर्यं पशूनां वा न कायमे। अहं कदंबो भूयासं कुन्दोवा यमुनातटे।" इति तदनुभवात्। किंतु भगवान् तेभ्यः सायुज्यरूपं सर्वांशतः स्वसाधर्म्यमेव दित्सति।" ममसाधर्म्यमागताः" इति खलु गीयते। भगवद्रामानुजशिष्याग्रगण्याः श्रीवत्सांकसूरयः एवमबादिषुः "त्वत्साम्यमेव विदुषां अभिवाञ्छसि त्वं, तत्सात्कृतैः विभवरूपगुणैः त्वदीयैः। मुक्ति ततोपि परमं तव साम्यमाहुः त्वद्दास्यमेव विदुषां परमं मतं तत्।" इति। विदुषां भक्तानां स्वसाधर्म्यं भगवानभिवाञ्छति। किंतु भक्ताः तद्दास्यमेव परमां मुक्ति अभिमन्वते। इति भावः।

किञ्च भगवान् स्वात्मनः आत्मानं ज्ञानिनं आह— "ज्ञानीत्वात्मैव मे मतम्" इति। अतः स्वं तस्मै विक्रेतुं वाञ्छति। सुदाम्नः पृथुकतण्डलमुष्टीः आदाय श्रीकृष्णः सपरिवारं स्वं तस्मै अर्पयितुं इयेष। किंतु द्वितीयमुष्टिग्रहणसमये रुक्मिण्या प्रतिरुद्धोऽभूत्।

एवं परमात्मा स्वदासभूतान् भक्तान् निरंकुशस्वातन्त्र्येण स्वाधीनतया स्वभक्तानां अपरेषां दास्ये विनियुङ्क्ते। लेकेऽपि स्वाधीनाः गोमहिषादयः पशवः इतरेभ्यः स्वेष्टं विनियुज्यन्ते। अत एव वेदान्तगुरवः एव माहुः "स्वतन्त्रस्वामित्वात्स्वबहुमति पात्रेषु नियतं श्रियःकान्तो देवः स खलु विनियुङ्क्ते चिदचिदौ" इति। इदं च मुनिवाहनभोगसूरीणां लोकसारङ्गमहामुनेः दासत्वं कल्पयतौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरङ्गनाथस्य चेष्टितादवगम्यते । श्रीवत्साङ्कमिश्राः अपि हस्तिगिरिधामानं वरदमेवमभिष्टुतवन्तः "परिजन परिबर्हाः भूषणान्यायुधानि, प्रवरगुणगणाश्च ज्ञानशक्त्यादयस्ते । परमपदं अयाण्डान्यात्मदेहस्तथात्मा, वरद सकलमेतत् संश्रितार्थंचकर्थ" इति अन्वभूवन् । भगवतः दिव्यात्मस्वरूपं दिव्यमङ्गलविग्रहं अस्त्रभूषणादिकं अनन्तगरुडादिपरिजनांश्च लीलाविभूतिं परमपदं च इति सर्वानपि स्वाश्रितानां अधीनान् अकरोद्वरदप्रभुरिति भावः । अपर्यनुयोज्यं हि तत्स्वातन्त्र्यम् ।

भगवतः एवं भक्तपराधीनत्वे सति स्वपत्युः आशयमनुवर्तमाना पतिव्रतेव भागवता अपि तदाऽऽज्ञापरवशाः तद्भक्तदास्यैकरसाः भवन्तीति किमुत । तदुक्तं श्रीवत्साङ्कमिश्रैः "कैङ्कर्यनित्यनिरतैः भवदेकभोगैः, नित्यैरनुक्षणनवीनरसार्द्रभावैः । नित्याऽभिवाञ्छितपरस्परनीचभावै, मद्दैवतैः परिजनैः तव सङ्गसीय" इति । एवं च कश्चन भक्तः अन्यस्मै भागवताय आत्मानं स्वाधीनं क्रयविक्रयार्हं अर्पयतीति, अयमत्र भागवतविपणिव्यवहारः । तथा स्वस्य भक्तपारतन्त्र्यमपि भगवान् बहुधा आविश्चकार । अंबरीषमहाराजे कृतापराधं दुर्वासमुनिं सुदर्शनेन दिशो विदिशश्च विद्राव्यमाणं क्षीराब्धिमुपेत्य आत्मानं शरणमुपगतं प्रति भगवानाह "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।" इति । हरविरिञ्चिसनकादिभिः यथावत् दुर्दर्शोऽपि भगवान् भक्तपरवशतया स्वं पार्थाय दिव्यं चक्षुः प्रदाय प्रदर्शयति । आहचैवम् – "नाऽहं वेदैर्नतपसा, न दानेन नचेज्यया । शक्यः एवं विधोद्रष्टुं, दृष्टवानसि मां यथा । भक्त्यात्वनन्यया शक्यः अहमेवं विधोर्जुन! ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ।" इति । यज्ञदानतपःस्वाध्यायादिभिरपि द्रष्टुं अशक्यं आत्मानं अनन्यभक्तिसुलभदर्शनं अबोधयत् । अत एव पार्थसारथिः पाण्डवदूतश्चेति नामभ्यां तस्य भक्तपराधी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नता आबालं प्रथते । एवंविधभक्तानां दास्यमेव परमपुरुषार्थंतां अशेरते भक्ताः । "मज्जन्मनः फलमिदं मधुकैटभारे ! मत्प्रार्थनीय मदनुग्रहः एषः एव । त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्यभृत्यः इतिमां स्मर लोकनाथ ?" इति खलु कुलशेखरैः सप्तपर्वव्यवधानोत्कर्षा भगवच्छेषत्वकष्ठाऽवलंबितातद्दासदास्येन वेदान्तगुरुणा पादुकासहस्रस्तवेऽयमनुभवः आस्वादनीयः । "आकीर्णरत्ननिकरां मणिपादुके त्वां, रङ्गेश्वरस्य ललितां विपणिं प्रतीमः । यत्संश्रयेण भवति स्थिरभक्तिमूल्यं, कैवल्यं अत्र जगतां क्रयविक्रयार्हम्" इति। अत्र श्रीरङ्गनाथस्य बहुरत्नालङ्कृतां स्वर्णमयीं पादुकायुगळीं शठकोपशेषात्मकतया चेतनीभूतां संबोध्य भक्त्या स्तौति । हे मणिपादुके ? लोके विपणिषु रत्नानि दृश्यंते त्वय्यपि रत्नानि संति । अतः त्वमपि विपणिः । आपणवीथीषु अलभ्यं मोक्षरूपं ऐश्वर्यं भक्तिमूल्येन त्वयि क्रेतुं शक्यते इति । पादुकां शिरसोद्वहन्तः भागवताः, भगवत्प्रसादात् मुक्ति साधयंतीति सारम् । एवं यतिराजसप्ततिस्तुतौ च एते कवयः भक्तिविपणिं प्रकल्प्य स्वादिष्ठं अनुभवं अस्माक वितरन्ति ।"

अभिगम्य सम्यगनघाः सुमेधसः पति चक्रवर्तिपदपद्मपत्तनम् ।
हरिभक्तदास्यरसिकाः परस्परं क्रयविक्रयार्हदशया समिन्धते ॥

यतीनां चक्रवर्तीरामानुजमुनिः । तस्य पद्मवद्भोग्ये पदे एव पत्तनम् । तद्भक्ताः एतन्नगरं समागम्य हरिभक्तानां दासतारूपं परमरसमनुभूय स्वं तेभ्यः क्रयविक्रयार्हं आपाद्य तेन अतीव प्रमोदभरिताः वर्धन्ते । बुद्धिकुशलाः वणिजः नगरे विपणिषु वस्तूनां क्रयविक्रयाभ्यां केवलं धनमेवार्जयंति । एतेतु रामानुजमुनिपदयुगलाख्ये पट्टणे भागवतदास्यरसमनुभवन्तीति वैशिष्टचम् । एवं भगवद्भक्तानां विपणिः परिकल्पिता कविरत्नैः एतैः तत्र वयं भक्तिधनेन व्यवहरेम इति शम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

077925

मारदविजयम्

रचयिता– श्री कूरं तिरुवाळि नरसिंह,
व्याकरण, साहित्य शिरोमणि:, शिक्षाशास्त्री, पि. ओ. एल्.

प्रथमोऽङ्कः

(महाविष्णुः आदिशेषे शयानो वर्तते । तदा महालक्ष्मीः तस्मै सुप्रभातं सुवदति)

सत्यसन्ध जितक्रोध जगदीश मम प्रिय ।
त्रिलोकरक्षणेशूर प्रोत्तिष्ट करुणाकर ॥

(विष्णुः उत्थाय लक्ष्मीं प्रति "मङ्गलं" इति अनुग्रहं कुरुते)

विष्णुः– शोभने गृहाण त्वदासनम् (लक्ष्मीः पार्श्वे उपविशति)

लक्ष्मी– पुण्डरीकाक्ष ? मन्ये भवन्त खिन्ना इति ।

विष्णुः– (शिरश्चालयति) ॐ !

लक्ष्मी– जगन्नाथ ? त्रिलोकरक्षकस्यापि विचारो वर्तत इति चेत् 'तस्मै नमः कर्मणे' इति आर्योक्तिस्सत्यमित्येव आभातिखलु ।

विष्णुः– अक्षरशः ।

लक्ष्मी– भक्तानुग्रहकारक ? को वा विचार इति दीनया मयापि ज्ञातुं शक्येत वा ?

विष्णुः– किं फलं तेन ?

लक्ष्मी– (ईषद् विहस्य) 'व्रजतु चरतु धर्मो भर्तृनाथा हि नार्यः' इत्युद्बोधितन्नु । अतः यथा भवत्सुखे मम भागोऽस्ति तथा दुःखेऽपि भागो ग्राह्य एव मया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुः– यस्मिन् विषये ममैव शोकस्समुदेति । तत्कथनेन को वा लाभः ?

लक्ष्मी– पूतपावन ? पत्नी 'करणेषु मन्त्री' इति विश्वसन्ति बुधाः।

विष्णुः– भूतले जनाः 'न दैवं केशवात् परं' इति सत्यमेवव्यस्मरन् । अतः खलैः घूर्यमाणाः सज्जनाः म्रियन्ते तत्र । तच्छ्रवणेन मे सन्तापस्सञ्जातः । तन्निवृत्तिमार्गः निरीक्षणीयो मया ।

लक्ष्मी– पुरुषेश्वर ? मा चिन्ता कार्येति मत्प्रार्थना । यतः दुष्टनिग्रहणं शिष्टपरिपालनं उभयमपि भवदधीनं खलु ।

विष्णुः– कर्तव्यमवगतं मया । परं को वा उपायः स्वीकार्यः इति नावगच्छामि ।

लक्ष्मी– (विहस्य) अहो भक्तवत्सल ! प्रकारो न स्फुरति वा ?

विष्णुः– (लक्ष्मीमुखं पश्यन्) ॐ ।

लक्ष्मी– विदांनेत ? रोचते मे एषः मार्गः । यस्तु मध्यमलोके सतां सङ्गमः समुत्पादनीयः ।

विष्णुः– केन हेतुना ?

लक्ष्मी– वपुश्श्रेष्ठ ? तत्र बहवः प्रकृत्या सज्जनाः अवतरिष्यन्ति चेत् तर्हि सर्वं समञ्जसं स्यादिति मे मतिः ।

विष्णुः– उपायस्तु रोचते । आचरणन्तु असम्भवम् ।

लक्ष्मी– कथं केशव ?

विष्णुः– उत्पादितानां रक्षणमेव मदधीनम् । न तु उत्पादनम् ।

लक्ष्मी– स्रष्टः ? चतुर्मुखः केनोत्पादितः ?

विष्णुः– मयैव ।

लक्ष्मी– लोकाभिराम ? प्रजापतिं आदिशन्तु भवन्तः, 'सज्जनोत्पत्तिं कुरु' इति ।

विष्णुः– सोऽयं उपायोऽपि निष्फलो भवेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्मी– हे स्वस्तिकृत् ? कथम् ?

विष्णु:– (सविषादम्) नराः सुरप्रायाः सञ्जाताः । ते प्रसव-निरोधं कर्तुं प्रभवन्त्यधुना । यदि मृत्युमपि निरुन्ध्येयुस्तर्हि न स्यादेव भेदः सुरनरयोः । अतः निरोधे सति कथं सज्जनोत्पत्तिः भविष्यति तत्र

लक्ष्मी– पद्मनाभ ? हेत्वन्तर ब्रवीमि ।

विष्णु:– किमेतत् ?

लक्ष्मी-- दुष्कृतविध्वसक अद्य मालवलोके अधर्मिणांसंहारः कार्य. ।

विष्णु:– अहन्तुरक्षक एव ।

लक्ष्मी– यज्ञवाहन ? पशुपतिं प्रेरयन्तु भवन्तः ।

विष्णु – तदपि विफलमेवेति स्फुरति मे ।

लक्ष्मी– प्राणनिलय ? को हेतु ?

विष्णु:– भूलोके अमेरिक्का, रष्या प्रभृति देशास्सन्ति केचन । तत्र तैः 'अणुबाम्' संपादितमस्ति । येन साहाय्येन मूहूर्तकालेन संपूर्ण जगतः नाश कर्तुं प्रभवन्ति ते । एव स्थिते अस्माकं त्रिनेत्री, स्वतृतीय चक्षुषा केवलं किं वा करिष्यति ।

लक्ष्मी– आपद्बान्धव ? तर्हि नास्त्येव मुक्तिः तेषाम् ?

विष्णु:– अहर्निशं अमुमेव विषयमधिकृत्य चिन्तयामि । अज, शङ्कर प्रभृतयः मां "कल्की" अवतार स्वीकुरु इत्युत्तेजयन्ति । किमत्र कार्यमिति व्याकुलोऽस्मि ।

(विष्णुः इतस्ततः चलति)

(यवनिका पतनम्)

समाप्तः प्रथमोऽङ्कः ।

द्वितीयोऽङ्कः

(विष्णुः उपविशन्नास्ते । तदा नारद तत्रायाति, विष्णुं स्तौति च)

जगन्निर्माणकर्तारं लक्ष्मीहृदय वल्लभम् ।
दशावतारधर्तारं सदा वन्दे जनार्दनम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(समीपमागत्य हे पितामह तुभ्यं नमः इति वदति)

विष्णुः– चिरंजीव ? अभीष्टफलसिद्धिरस्तु । उपविश ।

नारदः– (नारदः उपविशति) (विष्णुं सोत्सुकं पश्यति) विश्वंभर ? अपि कुशलम् ?

विष्णु – तथैव (स्वपादंपश्यन् भणति)

नारदः– (विहस्य) देहे विद्यमान कौशलं, स्वरे, वीक्षणे च न दृश्यते मया ।

विष्णुः– दिनेऽस्मिन त्वद्वृत्तिः अत्रैव वा ?

नारदः– शान्तं पाप, शान्तं पापम् (कर्णौ बध्नाति)

विष्णुः– त्रिलोकसञ्चारिन् ? किमर्थं त्वया एवं पृष्टम् ?

नारदः– न किमपि (किञ्चित् सन्दिहानः) तथा वर्तन्ते भवन्तोऽधुना यथा शासनसभायामात्मबलं ससन्देहं प्रतीक्ष्यमाण मुख्यमन्त्रीव । ईदृशी पुरोगतिः सुरलोकेऽपि प्रविष्टा वेति मद्वितर्कः ।

विष्णुः– किं कदळीफले प्रविष्टा सूचिकेव झटिति कलहबीजं निक्षिपसि ? को वा मन्त्री ? का वा शासनसभा ? कस्मिन् लोके एव भवति ? सविस्तरं ब्रूहि ।

नारदः– तथैव सुरप्रधानिन् ? मर्त्यलोके जनतन्त्र व्यवस्था अतीवप्रवर्धिता खलु । अतः तत्रस्थ प्रजानायकानां मध्ये कश्चन मुख्यमन्त्री भवति । गच्छता कालेन तस्य पक्षीया पक्षान्तरमवलम्बन्ते । यथा पक्षिणः आहारार्थं कुक्षिपूरणार्थञ्च डयन्ति तथैव एते एम्. एल्. ए. महाशयाः मन्त्रिस्थानस्वीकरणार्थं बहुविध आर्थिकसौविध्यसिध्यर्थं स्वपुत्रपौत्रादीनां यथोचित उद्योगप्राप्त्यर्थञ्च क्षणे क्षणे पदे पदे प्रतिपक्षं आश्रयन्ते । यदा एवं कुर्वन्ति ते तदा शासनसभायां स्वमुख्यमन्त्रिण मुद्दिश्य अविश्वास वाचकं समर्पयन्ति तदा सः मुख्यमन्त्री भवानिव चेष्टते ।

–(अनुवर्तते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सं. भा. प्र. सभाकार्यदर्शिनः मातृवियोगः

श्री यन्. रामनाथार्यस्य कार्यदर्शिनः माता

श्रीमती मीनाक्षी अम्मा

९–१०–७४ तिथौ बुधवासरे रात्र्यां सार्धत्रयघण्टासमये सप्तसप्ततितमे वयसि पुत्रपौत्रदौहित्रादीन्, बन्धुवर्गञ्च विहाय, अनायासेन पाञ्चभौतिकं शरीरं त्यक्त्वा परमपदमध्यगच्छत्। यद्यपि जगति जन्तूनां सकलानाऽमपि मातृवियोगः दुर्भर एव; किन्त्वनिवार्ये कार्येऽस्मिन् किं कुर्युर्मानवा विनाऽश्रुपातम्? "जातस्य हि ध्रुवो मृत्यु" रिति गीतावचनमनुचिन्त्य, पुत्रादिभिराप्तैश्च धैर्यमवलम्बनीयम्।

श्रीमती मीनाक्ष्यम्बायाः आत्मा परमात्मनि सुस्थिरस्थितिं प्राप्नुयादित्याशास्यते। सकुटुम्बस्य मातृशुश्रूषापरायणस्य श्री यन्. रामनाथार्यस्य सहानुतापमस्माकं निवेदयामः।

इति,

सम्पादकः.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Please mention your membership Number for easy correspondence.

R. N. 1845/60. Postal C. T. R. II.
आन्ध्रप्रदेशसर्वकारेणानुमोदिता R. C. No. 27-A 3/65 Dated 14-7-65.
Licensed to Post without Prepayment. LICENCE No. 57.

गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

...हे ...नसर्वकारेण पुरस्कृता च

गैर्वाणी

वार्षिकम् ५-००

प्रहेलिका

अर्जुनस्य इमे बाणा नेमे बाणा शिखण्डिनः ।
सीदन्ति मम गात्राणि माघमा सेगवा इव ॥

अर्थ.– "माघमा कर्कटी प्रोक्ता सदपत्यानि सेगवाः" इत्युक्तेः कर्कटया अपत्यानि यथा जन्मसमये तस्या अंगानि विदार्य बहिर्यान्ति तद्वदिमे बाणा ममाङ्गानि विदारयन्तीत्यर्थः ।

Published by Sri N. Ramanatha Aiyer B. A; B. L., Advocate & Secretary S. B. P. Sabha, Chittoor (A. P.)
Printed by Sri K. V. Raghavan, (in-charge) at Vijaya Press, Chittoor (A. P.) C. 1600.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar